१ ॥श्रीजगदंबिकायै नमः॥ धर्माधर्मौ तद्विपाकास्त्रयो ये॥ प [illegible] नाप्यन्ते ते॥ यस्मिन्ने
तेनैव रामं स ईशो यस्तं वंदे विष्णुमोंकारवाच्यं॥१॥ याज्ञवल्क्य [illegible] पं ते मुहुर्विश्वरूपविक
टोक्तिविस्तृतं॥ धर्मशास्त्रमृजुभिर्मिताक्षरै बालबोधविधये विविच्यते॥२॥ याज्ञवल्क्यशिष्यः
कश्चित्प्रश्नोत्तररूपं याज्ञवल्क्यप्रणीतं धर्मशास्त्रं संक्षिप्य कथयामास। यथा मनुप्रोक्तं भृगुः
तस्य चायमाद्यः श्लोकः॥ योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् वर्णाश्रमेतराणां नो ब्रू
हि धर्मानशेषतः॥१॥ योगिनां सनकादीनामीश्वरः श्रेष्ठः तं याज्ञवल्क्यसंज्ञं संपूज्य मनोवा
क्कायकर्मभिः पूजयित्वा मुनयः सामश्रवः प्रभृतयः श्रवणधारणयोग्या अब्रुवन् उक्तवंतः
धर्मान्नोऽस्मभ्यं ब्रूहीति कथं अशेषतः कार्त्स्न्येन। केषां वर्णाश्रमेतराणां वर्णा ब्राह्मणा रा
दयः। आश्रमा ब्रह्मचारिप्रभृतयः। इतरे अनुलोमप्रतिलोमजाता मूर्धावसिक्तादयः। इ
तरशब्दस्य द्वंद्वे चेति सर्वनामसंज्ञाप्रतिषेधः॥ अत्र च धर्मशब्दः षड्विधस्मार्तधर्मविषयः
॥तद्यथा। वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मः साधारणधर्मश्चे
ति॥ तत्र वर्णधर्मो विसं ब्राह्मणो मद्यं वर्जयेदित्यादिः। आश्रमधर्मो अग्नींधनभैक्षचर्यादिः
वर्णाश्रमधर्मः पालाशो दंडो ब्राह्मणस्येत्येवमादिः। गुणधर्मः शास्त्रीयाभिषेकादिगुणयु
क्तस्य राज्ञः प्रजापरिपालनादिः॥ निमित्तधर्मो विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रा १

यश्चित्ते। साधारणधर्मश्चाहिंसादिः॥ शौचाचारांश्च शिक्षयेदित्याचार्यकरणविधिप्रयु
क्तत्वाद्धर्मशास्त्राध्ययनस्य प्रयोजनादिकथनं नातीवोपयुज्यते। तत्र चायं क्रमः प्रागुपनयना
त्कामचारः कामवादः कामभक्षः। ऊर्ध्वमुपनयनात्प्राग्वेदाध्ययनोपक्रमाद्धर्मशास्त्राध्य
यनं। ततो धर्मशास्त्रविहितयमनियमोपेतस्य वेदाध्ययनं। ततस्तदर्थजिज्ञासा। तत
स्तदर्थानुष्ठानमिति। तत्र यद्यपि धर्मार्थकाममोक्षाः शास्त्रेणानेन प्रतिपाद्यन्ते। तथापि
धर्मप्राधान्याद्धर्मग्रहणं। प्राधान्यं च धर्ममूलत्वादितरेषां। ननु कामो धर्ममूलोऽर्थोऽर्थमू
लो धर्म इत्यविशेष इति। यतोऽर्थमन्तरेणापि जपतीर्थयात्रादिना धर्मनिष्पत्तिरर्थलेशो
पि न धर्ममूलोऽन्तरेणेति। एवं काममोक्षावपि इति॥ एवं पृष्टः मिथिलास्थः स योगी
न्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन्॥ यस्मिन्देशे मृगः कृष्णः तस्मिन्धर्मान्निबोधत॥ २॥ मिथिला
नाम नगरी तत्र स्थितः स याज्ञवल्क्यो योगीश्वरः क्षणं ध्यात्वा कंचित्कालं मनः समाधाय
एतेभ्य एवंगणाधिकारिणो विनयेन पृच्छतीति युक्तमेतेभ्यो वक्तुमित्युक्तवान्मुनीन्। किं यस्मि
न्देशे मृगः कृष्णः तस्मिन्धर्मान्निबोधतेति। कृष्णसारो मृगो यस्मिन्देशे स्वच्छन्दं विहरति त
स्मिन्देशे वक्ष्यमाणलक्षणा धर्मा अनुष्ठेया नान्यत्रेत्यभिप्रायः॥ शौचाचारांश्च शिक्षयेदि

स्याचार्यस्य धर्मशास्त्राध्यापनविधिः॥ शिष्येण तदध्ययनं कर्त्तव्यमिति कुतोवगम्यत
इत्यत आह॥ पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः वेदाः स्थानानि विद्यानां ध
र्मस्य च चतुर्दश॥ पुराणं ब्राह्मादि· न्यायस्तर्कविद्या· मीमांसा वेदवाक्यविचारः धर्मशा
स्त्रं मानवादि· अंगानि व्याकरणादीनि षट्· एतैरुपेताश्चत्वारो वेदाः विद्याः पुरुषा
र्थज्ञानानि· तासां स्थानानि चतुर्दश धर्मस्य च चतुर्दश स्थानानि हेतवः। एतानि त्रैव
र्णिकैरध्येतव्यानि तदन्तर्गतत्वात् धर्मशास्त्रमध्येतव्यं। तत्रैतानि ब्राह्मणेन विद्या
प्राप्तये धर्मानुष्ठानाय च अधिगन्तव्यानि क्षत्रियवैश्याभ्यां धर्मानुष्ठानाय· तथा
चरांगत्वेन विद्यास्थानानामनुक्रमो युक्तः। एतानि ब्राह्मणोधिकुरुते स च रतिं दर्शयन्नी
तरेषामिति· मनुरपि द्विजातीनां धर्मशास्त्राध्ययनेधिकारो ब्राह्मणस्य प्रवचनेनान्य
स्येति दर्शयति। निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः॥ तस्य शास्त्रेधिकारो
स्मिन् ज्ञेयो नान्यस्य कस्यचित्॥ विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः॥ शिष्येभ्यश्च
प्रवक्तव्यं सम्यङ्नान्येन केनचिदिति॥ अस्तु धर्मशास्त्रमध्येतव्यं: याज्ञवल्क्यप्रणीत
स्यास्य शास्त्रस्य किमायातमित्यत आह॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिराः

यमापस्तंबसंवर्त्ताः कात्यायनबृहस्पती ॥ पराशरव्याससंखलिखिता दक्षगौतमौ ॥ शाता
तपोवसिष्ठश्च धर्मशास्त्रप्रयोजकाः । उशनाः शङ्खपर्यंतो द्वे द्वे केवन्द्वावः ॥ याज्ञवल्क्यप्र-
णीतमिदं धर्मशास्त्रमध्येतव्यमित्यभिप्रायः । नेयं परिसंख्या किंतु प्रदर्शनार्थमेतत् ॥ अ-
तो बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धं ॥ एतेषां प्रत्येकं प्रामाण्येपि साकांक्षाणामाकां-
क्षापूरणमन्यतः क्रियते विरोधे विकल्पः ॥ इदानीं धर्मस्य कारकहेतूनाह ॥ देशे काल उपा-
येन द्रव्यं श्रद्धासमन्वितं । पात्रे प्रदीयते यत्तु सकलं धर्मलक्षणं ॥ यस्मिन्देशे मृगः कृष्णस्तु
न्नलक्षणो देशः । कालः संक्रान्त्यादिः । उपायः शास्त्रोक्तेतिकर्तव्यताकलापः ॥ द्रव्यं प्र-
तिग्रहादिलब्धं गवादि · श्रद्धाऽऽस्तिक्यबुद्धिः । तदन्वितं यथा भवति तथा पात्रं तद्विध-
येत्यादिवक्ष्यमाणलक्षणं । प्रदीयते यथा न प्रत्यावर्त्तते परस्वत्वापत्त्यवसानसम्पन्नं · एत-
द्धर्मस्योत्पादकं । किमेतावदेव नेत्याह सकलमिति · अन्यदपि शास्त्रोक्तं जातिगुणहोमया-
गादि तत्सकलं धर्मस्य कारकं · जातिगुणद्रव्यभावार्थात्मकं चतुर्विधमपि धर्मस्य कारकमि-
त्युक्तं भवति ॥ तत्र च समस्तमस्तं वा यथाशास्त्रं द्रव्यं · श्रद्धा सर्वत्रानुवर्त्तनीया इदानीं
धर्मस्य ज्ञापकहेतूनाह ॥ श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक्संकल्प

जः कामोधर्ममूलमिदंस्मृतं॥ श्रुतिर्वेदः स्मृतिर्धर्मशास्त्रं। तथाचमनुः। श्रुतिस्तुवेदोविज्ञे
योधर्मशास्त्रंतुवैस्मृतिरिति॰ सदाचारः सतां। शिष्टानामाचारोनुष्ठानं। स्वस्यचआत्म
नः। प्रियंवैकल्पिकेविषये॥ यथागर्भाष्टमेष्टमेवाब्द इत्यादावात्मेछैवनियामिका। सम्य
क्संकल्पाज्जातः कामः शास्त्राविरुद्धोयथामयाभोजनव्यतिरेकेणजलंनपातव्यमि
ति॰ एतेधर्मस्यमूलंप्रमाणं। एतेषांविरोधेपूर्वपूर्वबलीयस्त्वं॥ देशादिकारकहेतूनाम
पवादमाह॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां॥ अयंतुपरमोधर्मोयद्योगेनात्मद
र्शनं॥ इज्यादीनांकर्मणामयमेवपरमोधर्मः यद्योगेनबाह्यचित्तवृत्तिनिरोधेनात्मनोदर्श राम
नंयथार्थतत्त्वज्ञानं॰ योगेनात्मज्ञानेदेशादिनियमोनास्तीत्यर्थः। तदुक्तंयत्रैकाग्रतातत्रा
विशेषादिति॥ कारकहेतुषुज्ञापकहेतुषुवासंदेहे निर्णयहेतुमाह॥ चत्वारोवेदधर्मज्ञाः
पर्षत्त्रैविद्यमेववा। साब्रूतेयंसधर्मः स्यादेकोवाध्यात्मवित्तमः॥ चत्वारोब्राह्मणाः वेद
धर्मज्ञाः शास्त्रज्ञाः पर्षत्॰ तिस्रोविद्याअधीयतइतित्रैविद्याः तेषांसमूहस्त्रैविद्यं॰ धर्मशा
स्त्रज्ञत्वमत्राप्यनुवर्तते॰ तद्वापर्षत्॰ सापूर्वोक्तापर्षत्यंब्रूतेसधर्मः॥ अध्यात्मज्ञानेषुनि
पुणतमोधर्मशास्त्रज्ञश्चसएकोवायंब्रूतेसधर्मएव॥ इत्युपोद्घातप्रकरणं॥ ॥ ॥ ॥

एतैर्नवभिः श्लोकैः सकलशास्त्रोपोद्घातमुक्त्वा इदानीं ब्राह्मणादीनां धर्मान्वक्तुं प्रथमं
तावत्तद्वर्णानाह ॥ ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः । निषेकाद्याः श्मशा
नान्तास्तेषां वै मंत्रतः क्रियाः ॥ ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णा वक्ष्यमाणलक्ष-
णास्तेषामाद्यास्त्रयो ब्राह्मणक्षत्रियवैश्या द्विजाः द्विर्जायन्त इति द्विजाः तेषां द्विजानामे
व न शूद्रस्य निषेकाद्याः निषेको गर्भाधानमाद्यो यासां तास्तथोक्ताः श्मशाने पितृवनेन्त
त्संबंधि कर्म यासां ताः क्रिया मंत्रैर्भवंति ॥ इदानीं ताः क्रियाः अनुक्रामति ॥ गर्भाधानमृ
तौ पुंसः सवनं स्पंदनात्पुरा । षष्ठेऽष्टमे वा सीमंतो मास्येते जातकर्म च ॥ अहन्येकादशे ना
म चतुर्थे मासि निष्क्रमः ॥ षष्ठेन्नप्राशनं मासि चूडा कार्या यथाकुलं ॥ गर्भाधानमित्यनु
गतार्थं कर्मनामधेयं । एवं वक्ष्यमाणान्यपि । तद्गर्भाधानमृतौ ऋतुकाले वक्ष्यमाण
लक्षणे । पुंसवनाख्यं कर्म गर्भचलनात्पूर्वं । षष्ठेऽष्टमे वा मासि सीमंतोन्नयनं । एते च
द्वे पुंसवनसीमंतोन्नयने क्षेत्रसंस्कारकर्मत्वात्सकृदेव कार्ये न प्रतिगर्भं । यथाह देव
लः । सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृतेति । प्राइते आगते गर्भे कोशाकुमारे ।
जाते जातकर्म । एकादशेऽहनि नामकरणं तच्च पितामहमातामहादिसंबंधं कुलदेव

४ तासंबद्धंवा·यथाहशंखः।कुलदेवतासंबद्धंपितानामकुर्यादिति·चतुर्थेमासिनिष्क्र
मलक्षणंकर्मसूर्यावेक्षणं·षष्ठेमास्यन्नप्राशनंकर्म·चूडालक्षणंतुयथाकुलं·का
र्यमितिपूर्वस्यैवसंबध्यते·एतेषांनित्यस्याप्यानुषंगिकंफलमाह॥एवमेनःशमंयाति
बीजगर्भसमुद्भवं·एवमुक्तेनप्रकारेणगर्भाधानादिभिःसंस्कारकर्मभिःकृतैःएनः
पापंशमंयाति·किंभूतंबीजगर्भसमुद्भवंशुक्रशोणितसंबद्धं·गोत्रमाधिसंक्रांतिनि
मित्तं·नतूपपातकोत्पन्नत्वादि॥स्त्रीणांविशेषमाह।तूष्णीमेताःक्रियास्त्रीणांविवा
हस्तुसमंत्रकः।एताजातकर्मादिक्रियाःस्त्रीणांतूष्णींविनैवमंत्रैर्यथाकालंकार्याः। राम
विवाहःपुनःसमंत्रकः॥गर्भाष्टमेऽष्टमेवाब्देब्राह्मणस्योपनायनं।राज्ञामेकादशेसै
केविशामेकेयथाकुलं॥गर्भाधानमादिंकृत्वाजन्मतोवाऽष्टमेवर्षेब्राह्मणस्योप
नायनं·उपनयनमेवोपनायनंस्वार्थेअण्वृद्धानुसारात्॥आर्षदीर्घत्वम्॥१३॥ग
र्भादेकादशेराज्ञोगर्भाद्द्वादशेविशइतिस्मृत्यन्तरनिदर्शनात्॥समासेगु
णीभूतस्यापिगर्भशब्दस्यबुद्ध्याविभज्योभयत्राप्यनुवर्तनंकार्यं॥यथाशब्दा

अप

नुशासनं केषां शब्दानां लौकिकानां वैदिकानामिति ॥ अत्रापि कार्यमित्यनुवर्त्तते ४
चतुर्थपक्षे ॥ लिविः ॥ अत्रेच्छयाविकल्पः शरूणामेकादशो विशोर्वैश्यस्य सैके एका
दशो द्वादशे इत्यर्थः । गर्भाग्रहणं सर्वत्रानुवर्त्तते · कुलस्थित्या केचिदुपनयनमिच्छं
ति · उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकं वेदमध्यापयेदनंतरं शौचाचारांश्च
शिक्षयेत् । स्वगृह्योक्तविधिनोपनीय शिष्यं गुरुर्महाव्याहृतिपूर्वकं वेदम-
ध्यापयेदनंतरं शौचं । महाव्याहृतयश्च भूरादिसंज्ञास्ताः सप्तपंच वा गौतमानामिप्रा
येण । किंच · शौचाचारांश्चाशिक्षयेत् · वक्ष्यमाणलक्षणान् · उपनीय शौचाचा
रांश्चशिक्षयदित्यनेन प्रागुपनयनात्कामचारो दर्शितः । वर्णधर्मान्वर्जयित्वा
स्त्रीणामप्येतत्समानं । विवाहादर्वाक् । उपनयनस्थानीयत्वाद्विवाहस्य ॥ शौ
चाचारानाह । दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः । कुर्यान्मूत्रपुरीषे च रा
त्रौ चेद्दक्षिणामुखः । कर्णस्थं ब्रह्मसूत्रं यस्य स तथोक्तः कर्णश्चात्र दक्षिणः पवित्रं
दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत् इति लिंगात् । अहनि संध्ययोश्च उदङ्मुखो मूत्रपुरीषे कुर्यात्तच्च का
मं तु भस्मादिरहिते देशे · रात्रौ तु दक्षिणामुखः ॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः · गंधलेपक्षयकरं

५ शौचं कुर्यादतंद्रितः ॥१७॥ अनंतरं शिश्नं गृहीत्वोत्थायोद्धृताभिरद्भिर्वक्ष्यमाणलक्षणाभिर्मृद्भिश्च गंधलेप
योः क्षयकरं शौचं कुर्यादनलसः ॥ उद्धृताभिरद्भिरिति जलांतः शौचनिषेधात् । अत्र गंधलेपयोः क्षयक
रमिति सर्वाश्रमिणां साधारणमिदं शौचं न त्वत्र संख्यानियमस्तु दृष्टार्थः ॥ अंतर्जानु शुचौ देशे उपविष्ट उ
दङ्मुखः । ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥ शुचौ अशुचिद्रव्यासंस्पृष्टे देशे जानु उपानच्छ
नासनादिनिषेधः ॥ उपविष्टो न स्थितः शयानः प्रह्वो गच्छन्वा उदङ्मुखः प्राङ्मुखो वेति दिगंतरनिवृ
त्तिः शुचौ देशे इत्येतस्मात्स्याद्दप्रक्षालनप्राप्तिः ब्राह्मेण तीर्थेन वक्ष्यमाणेन द्विजो न शूद्रादिः नित्यं
सर्वकाले ॥ आश्रमांतरगतोपि उपस्पृशेदाचामेत् । कथं अंतर्जानुनोर्मध्ये हस्तौ कृत्वा दक्षिणेन हस्ते
नेति ॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ कनिष्ठायाः राम
तर्जन्या अंगुष्ठस्य च मूलानि करस्याग्रं च प्रजापतिपितृब्रह्मदेवतीर्थानि यथाक्रमं वेदितव्यानि ॥ त्रिः
प्राश्याऽपो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् ॥ अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ॥ बार
त्रयमपः पीत्वा मुखमंगुष्ठमूलेन द्विरुन्मृज्य खानि छिद्राणि ऊर्ध्वकायगतानि घ्राणादीनि अद्भिरु
पस्पृशेत् ॥ अद्भिर्द्रव्यांतरासंसृष्टाभिः ॥ पुनरंबुग्रहणं प्रतिछिद्रमुदकस्पर्शार्थं ॥ पुनस्ता एव विशिन
ष्टि ॥ प्रकृतिस्थाभिः गंधरूपरसस्पर्शांतः आतारकोदयात् तारकोदयावधि प्राक्संध्या प्रातः सम
ये एवं पूर्वोक्तविधिमाचरन् प्राङ्मुखः सूर्योदयावधि तिष्ठेत् ॥ अहोरात्रयोः संधौ या क्रिया विधीयते
सा संध्या । तत्राह ॥ संपूर्णादित्यमंडलदर्शनयोग्यः कालः ॥ तद्विपरीतो रात्रिः ॥ यस्मिन्काले रवेर्मंड

लक्ष्योपलब्धिः संधिः ॥ अग्निकार्यं ततः कुर्यात् संध्ययोरुभयोरपि ॥ ततोभिवादयेद्वृद्धान
सावहमिति ब्रुवन् ॥ ततः संध्योपासनानंतरं द्वयोः संध्ययोरग्निकार्यमग्नौ कार्यं समिन्धनं प्रक्षे
पादि यत्तत् कुर्यात् स्वगृह्योक्तेन विधिना । तदनंतरं वृद्धान् गुरुप्रभृतीन् अभिवादयेत् । कथमसौ
देवदत्तशर्माहमिति स्वनाम कीर्तयन् । गुरुश्चैवाप्युपासीत स्वाध्यायार्थं समाहितः । आहूतश्चा
प्यधीयीत लब्धं चास्मै निवेदयेत् ॥ हितं तस्याचरेन्नित्यं मनोवाक्कायकर्मभिः । तथा गुरुं च
वक्ष्यमाणलक्षणमुपासीत । तत्परिचर्यापरस्तदधीनस्तिष्ठेत् ॥ स्वाध्यायार्थमध्ययनसिद्ध्
यै समाहितोऽविक्षिप्तचित्तो भवेत् । आहूतश्चाप्यधीयीत । गुर्वाहूत एवाधीयीत । न स्वयं प्रेर
येत् ॥ यल्लब्धं तत्सर्वं गुरवे निवेदयेत् ॥ तथा । तस्य गुरोर्हितमाचरेन्नित्यं सदा मनोवाक्कायक
र्मभिः । न प्रतिकूलं कुर्यात् ॥ अपिशब्दात् गुरुदर्शने गौतमोक्तं कंठप्रावृत्तादि वर्जयेत् । कृत
ज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः । कृतमुपका
रं न विस्मरतीति कृतज्ञः । अद्रोही दयावान् । मेधावी ग्रंथग्रहणधारणशक्तः । शुचिर्बाह्याभ्यंतर
शौचवान् । कल्यः आधिव्याधिरहितः । अनसूयको दोषानाविष्कारेण गुणाविष्करणशीलः । सा
धुर्वृत्तवान् । शक्तः शुश्रूषायां । आप्तो बंधुः । ज्ञानदो विद्याप्रदः । वित्तदः अपणपूर्वं वित्तप्रदाता ·
एते गुणाः समस्ता व्यस्ताश्च यथासंभवं द्रष्टव्याः एते धर्मशास्त्रानुसारेणाध्याप्याः । दण्डाजिनोप
वीतानि मेखलां चैव धारयेत् । ब्राह्मणेषु चरेद्भैक्ष्यमनिंद्येष्वात्मवृत्तये ॥ स्मृत्यन्तरे प्रसिद्धपा

लाशादिदंडं॥ अजिनं कृष्णाजिनादि॰ उपवीतं कार्पासादिनिर्मितं॰ मेखलां मुंजादिनिर्मितां ब्रह्मचारी
धारयेत्॥ पूर्वोक्तदंडादियुक्तो ब्रह्मचारी ब्राह्मणेषु अनिंद्येषु अनभिशस्तेषु स्वकर्मनिरतेषु भै-
क्ष्यं चरेत्॰ आत्मवृत्तये॰ आत्मनो जीवनार्थं न परार्थं॰ आचार्यतद्भार्यापुत्रव्यतिरेकेण॥ निवे
द्य गुरवे॰ गुरुणानुज्ञातो भुंजीत। तदभावे तद्भार्यातत्पुत्रादौ इति नियमात्॥ अत्र च ब्राह्मणग्र
हणं संभवे सति नियमार्थं॰ यत्तु सार्ववर्णिकं भैक्ष्यचरणमिति त्रैवर्णिकप्राप्त्यर्थं॰ यच्च चातु
र्वर्ण्यं चरेद्भैक्ष्यमिति तदापद्विषयं॰ कथं भैक्ष्यचर्या॥ ~~अकोसननि याप्पूर्व संरत्ने सानमन्तु~~
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता॥ ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रमं॥ ओं भ
वति भिक्षां देहि॰ भिक्षां भवति देहि भिक्षां देहि भवति। एवं वर्णक्रमेण भैक्ष्यचर्या कार्या॥ कृता
ग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञया॥ आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्॥२२॥ पू
र्वोक्तविधिना भिक्षामाहृत्य गुरवे निवेद्य तदनुज्ञया कृताग्निकार्यो वाग्यतो मौनी भूत्वा स
त्कृत्य संपूज्य अकुत्सयन् अनिंदन्॰ आपोशानक्रियापूर्वं॰ अमृतोपस्तरणमसीत्यादिकां पू
र्वं कृत्वा भुंजीत। अत्र पुनरग्निकार्यग्रहणं संध्याकाले कथंचिदकृताग्निकार्यस्य कालांतरा-
विध्यर्थं न पुनस्तृतीयप्राप्त्यर्थं॥ ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि॥ ब्राह्मणः काममश्नी
यात् श्राद्धे व्रतमपीडयन्॥२३॥ ब्रह्मचर्ये स्थितः एकान्नं नाद्यात्। अनापदि व्याध्याद्यभावे ब्राह्म
णः पुनः श्राद्धे अभ्यर्थितः सन् काममश्नीयात्। व्रतमपीडयन् मधुमांसपरिहारेण॰ अत्र श्रा

राम

लवणमृणं सुत्रियादेः श्राद्धभोजनव्युदासार्थं । राजन्यवैश्ययोश्चैवं नैतत्कर्म प्रचक्षत इति वचनात् ॥ म
धुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं ॥ भास्करालोकनाश्लीलपरिवादादि वर्जयेत् ॥ २४ ॥ मधु
क्षौद्रं । न मद्यं । तस्यापि समद्यस्य निषेधात् । निसंमद्यं ब्राह्मणो वर्जयेत् । मांसं छागादेः । पि । अंजनं
घृतादिना गात्रस्य । कज्जलादिना चाक्ष्णोः । उच्छिष्टं गुरोः भुक्तेन निष्ठुरवाक्यं । नान्नरसः । न र
स्याभक्ष्यप्रकरणे निषेधात् । स्त्रियमुपभोगे । प्राणिहिंसनं जीववधः । भास्करलोकनं उदितास्तमि
तादित्यालोकनं । अश्लीले असंभाषणं गुह्यभाषणं वा । परिवादः सदसद्रूपस्य परदोषस्य ख्या
पनं । आदिशब्दात् स्पर्शनं तरोत्तं गंधमाल्यादि । एतानि ब्रह्मचारी वर्जयेत् ॥ गुर्वादिलक्षणमाह ॥
स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति ॥ उपनीय ददद्वेदमाचार्यः स उदाहृतः ॥ २५ ॥ स गुरुः ।
योसौ गर्भाधानाद्या उपनयनांताः क्रिया यथाविधि कृत्वा अस्मै ब्रह्मचारिणे वेदं प्रयच्छति स गुरुः । य
स्तु उपनयनमात्रं कृत्वा वेदं ददाति असौ आचार्यः । एकदेशमुपाध्यायः । ऋत्विजो यथापूर्वं यथा
क्रमेण मान्याः पूज्याः । एभ्यः सर्वेभ्यो माता गरीयसी पूज्यतमा ॥ वेदग्रहणार्थं ब्रह्मचर्यावधिमा
ह ॥ ॥ प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा ॥ ग्रहणांतिकमित्येके केशांतश्चैव षोडशे ॥ २७ ॥
मेधावी देवो वेति प्रवर्त्तते । तदा प्रतिवेदं ब्रह्मचर्यं वेदं प्रति ब्रह्मचर्यं पूर्वो
क्तं । यदा विवाहासंभवेन वेदानधीत्य वेदौ वेति प्रवर्त्तते । पंच वा । ग्रहणांतिकमित्येके वर्णयंति ॥ केशांतः पुनर्गोदानाख्यं क
र्म द्वादशाब्दानि कार्यं । अथ केशांतः पंच वा । ग्रहणांतिकमित्येके वर्णयति ॥ एतच्च द्वादशवार्षिके वेदव्रते बोद्धव्यं ॥ उत्तरस्मिन्न्य
सगर्भोदारभ्य षोडशे वर्षे ब्राह्मणस्य कार्यं । राजन्यवैश्ययोस्तु उपनयनकालवत् द्वाविंशे चतुर्विंशे द्रष्टव्यं ॥ ॥ उपनयन
स्य यथासंभवं वा द्रष्टव्यं ।

१ कालस्य परमावधिमाह ॥ आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ॥ ब्रह्मक्षत्रविशां काल औपनायनिकः ॥२८॥ अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः । सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥२९॥ आषोडशाद्वर्षात् षोडशवर्षं यावत् आद्वाविंशात् आचतुर्विंशाच्च ब्रह्मक्षत्रविशां औपनायनिक उपनयनसंबन्धी परः कालः नातः परमुपनयनकालोऽस्ति । किंतु पतन्त्येते सर्वधर्मबहिष्कृताः सर्वधर्मेष्वनधिकारिणो भवन्ति । सावित्रीपतिताः सावित्रीका भवन्ति । सावित्रीदानयोग्या न भवन्ति । व्रात्यस्तोमादृते क्रतोः । व्रात्यस्तोमाख्यं क्रतुं विना । कृते तु तस्मिन् उपनयनाधिकारिणो भवन्ति ॥ आद्यास्त्रयो द्विजा इत्युक्तं तत्र हेतुमाह ॥ मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ॥ ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥३०॥ मातुः सकाशात्प्रथमं जन्म जायते द्वितीयं तु मौञ्जिबन्धनात् जायन्ते यस्मात्तस्मादेते ब्राह्मणक्षत्रियवैश्या द्विजा उच्यन्ते ॥ ग्रहणाध्ययनफलमाह ॥ यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् ॥ वेद एव द्विजातीनां निःश्रेयसकरः परः ॥३१॥ यज्ञानां श्रौतस्मार्तादीनां तपसां कायसंतापरूपाणां कृच्छ्रचान्द्रायणादीनां शुभानां च कर्मणां उपनयनादिसंस्काराणां अवबोधकत्वेन वेद एव द्विजातीनां परो निःश्रेयसकरः । नान्यः । वेद एवेति तन्मूलत्वात्स्मृतेरुपलक्षणार्थं ॥ ग्रहणाध्ययनफलमुक्त्वेदानीं काम्यब्रह्मयज्ञाध्ययनफलमाह ॥ मधुना पयसा चैव स देवांस्तर्पयेद्द्विजः ॥ पितॄन्मधुघृताभ्यां च ऋचोऽधीते च योऽन्वहम् ॥ यजूंषि शक्तितोऽधीते योऽन्वहं स घृतामृतैः । प्रीणाति देवानाज्येन मधुना च

राम

पितॄंस्तथा॥ ॥ सतुसोमघृतैर्देवांस्तर्पयेद्योन्वहंपठेत्॥ सामानितृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा
॥४४॥ योन्वहंऋचोधीतेसमधुनापयसाचदेवान्प्रीणाति॥ पितॄंश्चमधुघृताभ्यांप्रीणाति।
यस्तुशक्तितोन्वहंयजूंष्यधीतेसघृतामृतैर्देवान्पितॄंश्चमधुघृताभ्यांप्रीणाति। यस्तुसा
मान्यन्वहमधीतेससोमघृतैर्देवान्पितॄंश्चमधुसर्पिर्भ्यांप्रीणाति॥ ऋगादिग्रहणंसामान्ये
नऋगादिमात्रप्रा[illegible]र्थं॥ मेदसातर्पयेद्देवानथर्वांगिरसःपठन्। पितॄंश्चमधुसर्पिर्भ्यामन्वहंश
क्तितोद्विजः॥४५॥ वाकोवाक्यंपुराणंनाराशंसीश्चगाथिकाः॥ इतिहासांस्तथा॥थविद्यायो
धीतेशक्तितोन्वहं॥ मांसक्षीरौदनमधुतर्पणंचदिवौकसां। करोतितृप्तिंकुर्याच्चपितॄणांम
धुसर्पिषा॥४७॥ तेतृप्तास्तर्पयन्त्येनंसर्वकामफलैःशुभैः॥ ॥ यःपुनःशक्तितोन्वहंअथर्वां
गिरसोधीतेसदेवान्मेदसापितॄन्मधुसर्पिर्भ्यांचतर्पयति॥ यस्तुवाकोवाक्यंप्रश्नोत्तर
रूपंवेदवाक्यं पुराणंब्राह्मादि चकारान्मानवादिधर्मशास्त्रं नाराशंसीश्चरुद्रदैवत्यान्मंत्रा
न्गाथाश्चयज्ञगाथेंद्रगाथाद्या इतिहासादिन्महाभारतादीन् विद्याश्चवारुणाद्याःशक्ति
तोन्वहमधीतेसमांसक्षीरौदनमधुभिर्देवान्पितॄंश्चमधुसर्पिर्भ्यांप्रीणाति॥ तेपुनस्तुष्टाःसं
तोदेवताःपितरश्च एनंस्वाध्यायकारिणंसर्वकामफलैःशुभैरन्योपघातलक्षणैस्तर्पयंति
॥ ॥प्रशंसार्थमाह॥ ॥यंयंक्रतुमधीयीततस्यतस्याप्नुयात्फलंत्रिर्वित्तपूर्णपृथिवीदानस्य

मिता॰ आ॰

८ फलमश्नुते॥ तपसश्च परस्येह नित्यं स्वाध्यायवान्द्विजः॥ ४७॥ यस्य यस्य क्रतोः प्रतिपादकं वेदैकदेशमन्व
हं योऽधीते तस्य तस्य क्रतोः फलमवाप्नोति। तथा वित्तपूर्णायाः पृथिव्याः त्रिर्दानस्य यत्फलं परस्य च तप
सः चान्द्रायणादेर्यत्फलं तदपि नित्यं स्वाध्यायवानाप्नोति॥ नित्यग्रहणं काम्यस्यापि सतो नित्यवत्प्राप
णार्थं॥ ॥एवं सामान्येन ब्रह्मचारिधर्मानभिधाय नैष्ठिकस्य विशेषमाह॥ नैष्ठिको ब्रह्मचारी तु वसेदाचा
र्यसन्निधौ॥ तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा॥ अनेन विधिना देहं साधयन्विजितेन्द्रियः॥ ब्रह्मलोक
मवाप्नोति न चेह जायते पुनः॥ ४९॥ अनेन प्रकारेण आत्मानं निष्ठां उत्क्रान्तिकालं नयतीति नैष्ठिकः॥
स यावज्जीवमाचार्यसमीपे वसेत्। न वेदग्रहणानन्तरकालं स्वतन्त्रो भवेत्। तदभावे तत्पुत्रसमीपे तदभावे
तत्पत्नीतज्जायासमीपे वसेत् तदभावे वैश्वानरेऽपि॥ अनेनोक्तविधिना देहं साधयन् क्षपयन् विजितेन्द्रियः
इन्द्रियजयेति विशेषणं यत्नवान् ब्रह्मचारी ब्रह्मलोकमनन्तरमवाप्नोति॥ न कदाचिदिह जायते॥ इति ब्रह्मचारि राम
प्रकरणं॥ ॥यः पुनर्वैवाहस्तस्य विवाहार्थं स्नानमाह॥ ?॥ ॥ गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया॥
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥ ५१॥ पूर्वेण न्यायेन वेदं मन्त्रब्राह्मणात्मकं व्रतानि ब्रह्मचारिधर्मानुक्तां
स्तान्वा उभयं वा पारं नीत्वा समाप्य गुरवे पूर्वोक्ताय वरमभिलषितं यथाशक्ति दत्वा स्नायात्॥ अत्र
कौतदनुज्ञया अदृष्टवरोऽपि। एषां च पक्षाणां शक्तिकालाद्यपेक्षया व्यवस्था॥ स्नानानन्तरं किं कर्तव्य
मित्यत आह॥ ॥अविप्लुतब्रह्मचर्यो लक्षण्यां बाह्याभ्यन्तरलक्षणैर्युक्तां। बाह्यानि लक्षणानि तनुलो
मकेशदशनादीनि मनूक्तानि॥ आभ्यन्तराणि आदिष्टोपिदानस्वाद्यसम्बलायनोक्तेन बुद्धि...

द्दोषाभावे॰ असपिंडां॰ समानः एकः पिंडो देहो यस्याः सा सपिंडा न समानपिंडा न समानस्मिं
नात्तानव्याने।। स्त्रियं नपुंसकत्वनिरसनाय॰ स्त्रीत्वेन परीक्षितां॰ अनन्यपूर्विकां दानेनोपभोगे
न वा पुंसांतरापरिगृहीतां। कांतां कमनीयां॰ वोढुर्मनोनयनानंदकारिणीं॰ यस्यां मनश्चक्षुषो
र्निबंधस्तस्यामृद्धिः इति सापस्तंबस्मरणात्।। एतच्चानूनाधिकांगादिदोषाभावे॰ असपिं
डां॰ समानः एकः पिंडो देहो यस्याः सा सपिंडा न सपिंडा असमानपिंडा तां। सपिंडता च ए
कशरीरावयवान्वयेन भवति। तथा हि पुत्रस्य पितृशरीरावयवान्वयेन पित्रा सह॰ पितामहा
दिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्॰ एवं मातृशरीरावयवान्वयेन मात्रा॰ मा
तामहादिभिरपि मातृद्वारेण एवं मातृष्वसृमातुलादिभिरपि एकशरीरावयवान्वयात् एवं
पितृव्यपितृष्वस्रादिभिरपि। तथा च पत्न्या सह पत्न्या एकशरीरारंभकत्वात् तथा एवं भ्रातृभार्या
णामपि परस्परमेकशरीरारब्धैः सह एकशरीरारंभकत्वेन॰ एवं यत्र यत्र सपिंडशब्दस्त
त्र तत्र साक्षात्परंपरया वा एकशरीरावयवान्वयो वेदितव्यः। यद्येवं मातामहादीनामपि
दशावमाशौचे सपिंडेषु विधीयत इति अविशेषेण प्राप्नोति॰ स्यादेतत्॰ यदि तत्र तत्र प्रतानां
मितरे कुर्युरित्यादिविशेषवचनेन स्यात्॰ अतश्च सपिंडेषु यत्र विशेषवचनं नास्ति तत्र स्था
हमित्येतद्वचनमवतिष्ठते। अवयवैकशरीरावयवान्वयेन सापिंड्यं वर्णनीयं।। आत्मा हि
जज्ञ आत्मनः इति श्रुतेः।। तथा प्रजामनुप्रजायन्त इति च। अथ यद्यपि सए वाये विरुद्धः प्रत्यक्षेणा

९ पलभ्यत इत्यपस्तंबवचनाच्च ॥ तथा गर्भोपनिषदि तस्मात् षट्कौशिकं शरीरं त्रीणि पितृतः त्री
णि मातृतः । अस्थिस्नायुमज्जानः पितृतः । त्वङ्मांसशोणितानि मातृतः । तत्र तत्रावयवान्वय
प्रतिपादनात् । निर्वाप्यपिंडान्वयेन तु मातृसंताने भ्रातृपितृव्यादिषु च सापिंड्यं न स्यात् । समु
दायशक्त्यंगीकरणेन रूढिपरिग्रहेऽवयवशक्तिस्तत्र तत्रावगम्यमाना परित्यक्ता स्यात्
परंपरयैकशरीरावयवान्वयेन सापिंड्ये यथा नातिप्रसंगस्तथा वक्ष्यामः ॥ यवीयसीं व
यसा प्रमाणतश्च न्यूनामुद्वहेत् । परिणयेत् । स्वगृह्योक्तविधिना ॥ ॥ विशेषांतराण्याह ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां ॥ अरोगिणी । अचिकित्सनीयव्याध्यनुपसृष्टा
। भ्रातृमती ॥ पुत्रिकाकरणशंकानिवृत्तये ॥ अनेनापरिभाषितापि पुत्रिका भवतीति ग राम
म्यते । असमानार्षगोत्रजां ॥ [illegible] । ऋषेरिदं आर्षं नाम प्रवर इत्यर्थः ॥ गोत्रं वंशपरं
पराप्रसिद्धं । आर्षं च गोत्रं च आर्षगोत्रे । समाने आर्षगोत्रे यस्यासौ समानार्षगोत्रस्तस्मा
ज्जाता । न समानार्षगोत्रजा असमानार्षगोत्रजाता । गोत्रप्रवरयोश्च पृथक्प्रपञ्चः पर्युद
ासे निमित्तं । तेनासमानार्षजामसमानगोत्रजामिति ॥ तथा च भृगुः समानगोत्रप्रव
रैर्विवाहयन्ति यः । असंभाष्यो ह्यपाङ्क्तेयः पतितः स तु नान्यथा ॥ तथा चासमानप्रवरै
र्विवाह इति गौतमः ॥ तथा च । असपिंडा च या मातुरसगोत्रा च या पितुरिति मनुः ॥ तथा ।
मातृगोत्रामप्यपरिणेयां केचिदिच्छंति ॥ तथा । मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव

व। समानप्रवरां चैव गत्वा चान्द्रायणं चरेत् इति प्रायश्चित्तस्मरणात्॥ अत्र च असपिण्डामित्यनेनापि
तत्पक्षस्य मातृपक्षस्यापि दुहितुः निषेधः। तथा। असगोत्रामित्यनेन चासपिण्डायाः अपि मित्यनेन संतानजा
याः समानगोत्रयानिषेधः। असमानप्रवरामित्यनेनापि असगोत्रायाः अपि समानप्रवरायानिषे
धः तथा च भृगुः। एक एव ऋषिर्यत्र प्रवरेष्वनुवर्तते। तत्रापि स्यात्सगोत्रत्वमृते भृग्वंगिरोगणा
त्। पंचानां त्रिषु सामान्यादविवाहः त्रिषु द्वयोः। भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेत्। तथा।
असपिण्डामित्येतत्त्रैवर्णिकविषयं सर्वत्र सापिण्ड्यसद्भावात्। असमानार्षगोत्रजामित्येतत्
त्रैवर्णिकविषयं। यद्यपि राजन्यवैश्ययोः प्रातिस्विकगोत्राभावात्प्रवराभावः। तथापि पुरो
हितगोत्रप्रवरौ वेदितव्यौ। तथा च यजमानस्यार्षेयान्प्रवृणीत इत्युक्त्वा पौरोहित्यान्राजवि
शां प्रवृणीत इत्याहाश्वलायनः। सपिण्डासु समानगोत्रासु समानप्रवरासु भार्यात्वमेव नोपपद्य
ते। रोगिण्यादिषु तु भार्यात्वे उपपन्नेपि दृष्टविरोध एव॥ असपिण्डास्वत्र एकशरीरावयवान्वय
कारेण साक्षात्सारूप्येण वा सापिण्ड्यमुक्तं। न च सर्वत्र सर्वेषामपि यथाकथंचिदनादौ संसारे संभव
तीत्यतिप्रसंग इत्यत आह॥ ॥ ॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा। मातृतः मा
तुः संताने पंचमादूर्ध्वं। पितृतः पितुः संताने सप्तमादूर्ध्वं सापिण्ड्यं विनिवर्तत इति शेषः। अ
तश्चायं सपिण्डशब्दोऽवयवत्रात्मावर्तमानोपि निर्मथ्य पंकजशब्दवन्नियतविषय एव। तथा
च पित्रादयः षट् सपिण्डाः पुत्रादयः षट् आत्मा च सप्तमः संतानभेदेपि यतः संतानभेदस्तमा

१० दायगणे येन यावत्सप्तम इति सर्वत्र योजनीयं। तथा च भगिन्यो भगिनीभ्रात्री भ्रातृपुत्रपितृव्ययोः
विवाहेऽप्यादिभूतत्वाच्छाखाभेदो न गण्यते॥ यद्यपि वसिष्ठेनोक्तं पंचमीं सप्तमीं चैव मातृतः पितृत
स्तथा इति। त्रीनतीत्य मातृतः पंचातीत्य पितृत इति पैठीनसिना तदप्यर्वाक् निषेधार्थं न पुन
स्तत्प्राप्त्यर्थमिति सर्वस्मृतीनामविरोधः। एतच्च समानजातीये। विजातीये तु विशेषः। यथाह
शंखः। यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः। एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रि
षु॥ एकस्माद्ब्राह्मणादेर्जाता एकजाताः॥ पृथक्क्षेत्राः भिन्नजातीयासु स्त्रीषु जाताः पृथग्ज
नाः समानजातीयासु भिन्नासु स्त्रीषु जाताः ते एकपिंडाः सपिंडाः। किंतु पृथक्शौचा अशौचं पृथक्प्रक
रणे वक्ष्यामः। पिंडस्त्वावर्तते त्रिषु त्रिपुरुषमेव सापिंड्यमित्यर्थः॥ दशपूरुषविख्यातात् राम
श्रोत्रियाणां महाकुलात्॥ पुरुषा एव पूरुषाः। दशभिः पुरुषैः पितृतः पंचभिः पुरुषैः मातृत
श्च पंचभिर्विख्यातं यत्कुलं तस्माच्छ्रोत्रियाणां अधीतवेदानां अध्ययनमुपलक्षणं श्रुता
ध्ययनसंपन्नानां महत्त्वं तत्कुले पुत्रपशुदासीग्रामादिसमृद्ध्या तस्मात्कन्या आहर्तव्येति गम्य
ते॥ एवं सर्वतः प्राप्तौ सत्यामपवादमाह॥ स्फीतादपि न संचारिरोगदोषसमन्वितात्॥ संचा
रिणो रोगाः कुष्ठापस्मारादयः शुक्रशोणितद्वारेणानुप्रविशन्ति। दोषाः पुनर्हीनक्रियत्वं निःपुरुषत्वा
दयो मनूक्ताः। एतैः समन्वितात्स्फीतादपि नाहर्तव्या॥ कन्याग्रहणनियममुक्त्वा कन्यादाने वरनि
यममाह॥ एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः। यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रि १०

यः॥एतैः पूर्वोक्तैरेवगुणैर्युक्तोदोषैश्चवर्जितोवरोभवति·तस्यायमपरोविशेष।सुवर्णउत्त
मोवर्णोनहीनवर्णः।स्वयंचश्रुताध्ययनसंपन्नः।यालोपक्लेनपुंस्त्वपरीक्षितः।परीक्षोपाय
श्चनारदेनोक्तः॥यस्याप्सुप्लवतेवीर्यंह्लादिमूत्रंचफेनिलं॥पुमान्स्याल्लक्षणैरेतैर्विपरीतै
स्तुषंढकः इति।युवानरुद्धः।धीमान्लौकिकव्यवहारेषुनिपुणमतिः।जनप्रियः स्मितम
दपूर्वाभिभाषणादिभिरनुरक्तजनः।रतिपुत्रधर्मार्थत्वेनविवाहस्त्रिविधः॥तत्रपुत्रार्थोद्वि
विधोनित्यःकाम्यश्च॥तत्रनित्यप्रजार्थेसवर्णःश्रोत्रियावरइत्यनेनसवर्णामुखेनादर्शिता
॥ ॥इदानींकाम्यनित्यसंयोगेनानुकल्पोवक्तव्यइत्याह॥ ॥यदुच्यतेद्विजातीनांशूद्रा
दारोपसंग्रहः।नैतन्ममतंयस्मात्तत्रात्माजायतेस्वयं॥यदुच्यते·कामतस्तुप्रवृत्तानामिमाः
स्युःक्रमशोवराः इत्युपक्रम्यब्राह्मणस्यचतस्रोभार्याः क्षत्रियस्यतिस्रोवैश्यस्यद्वे इति·द्विजाती·
नांशूद्रावेदनमितिनैतद्याज्ञवल्क्यस्यमतं·यस्माद्यंद्विजातिस्तत्रस्वयंजायते·तज्जाया
याजायास्त्वात्स्वयंमितिहेतुवदन्तानेत्यकपुत्रो
भवतियदस्यांजायतेपुनरितिश्रुतेः·अत्रचतत्रायंजायतेस्वयंमितिहेतुवदन्तानेत्यकपु
त्रादनायकाम्यकपुत्रोत्स्यान्नैत्यादनायवाप्रवृत्तस्यशूद्रापरिणयननिषेधंकुर्वतानैत्यकपु
त्रोत्स्यादनानुकल्प्यकाम्यःपुत्रोत्स्यादनेब्राह्मणस्यक्षत्रियवैश्येक्षत्रियस्यवैश्याअभ्यनुज्ञाता
भवति॥ ॥इदानींरतिकामोत्सन्नपुत्रस्याविनष्टभार्यस्याश्रमान्तरेष्वनधिकारिणोगृहस्था
श्रमावस्थामात्राभिकांक्षिणः परिणयनक्रममाह॥ ॥तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथा

क्रमं॥ब्राह्मणक्षत्रियविशांभार्याःस्वाःशूद्रजन्मनः॥वर्णानुक्रमेण ब्राह्मणस्यतिस्रः॥क्षत्रियस्यद्वे·वैश्य
स्यैका·शूद्रस्यस्वैवभार्याभवति॥सवर्णासर्वेषामुख्यास्तितैव·पूर्वस्याअभावेउत्तरोत्तराभवति॥अपुत्रे
वक्रमानेस्मिकानुकूल्येकाम्यंचपुत्रोत्पादनविधौ·अतश्चधर्मपुत्रस्यपुत्रसम्बन्धेनगणनंविभागकीर्तनं·
च·तथाविप्रान्मूर्धावसिक्तोहिक्षत्रायांविन्नास्वेषविधिःस्मृतःइत्यत्रकामस्थअश्रमधर्माभिकां
क्षिरोणवानांतरीयकत्वयोःसन्नस्य॥ ॥विवाहानाह॥ ॥ब्राह्मोविवाहआहूयदीयतेशक्त्यालंकृता
॥तज्जःपुनात्युभयतःपुरुषानेकविंशतिं॥ सब्राह्मणाभिधानोविवाहः॥यस्मिन्कुलशीलसम्पन्नायवरायकन्या
आहूययथाशक्त्यलंकृताकन्यादीयते॥ उदकपूर्वं॥तस्यांजातःपुत्रःउभयतःपित्रादीन्दशप्रथमजः
पुनातिसुतरजश्चषट्॥सदैवोविवाहोयस्मिन्यज्ञानुष्ठानेवितत्तेऋत्विजेशक्त्यलंकृतादीयते॥यत्र
पुनर्गोद्वयमादायकन्यादीयतेउदकपूर्वंसआर्षः॥प्रथमजोदैवविवाहजश्चतुर्दशपुनातिससप्तपूर्वा राम
न्सप्तपरान्॥उत्तरजःआर्षविवाहजःषट्पुनाति॥त्रीन्पूर्वान्॥ ॥इत्युक्त्वाचरतांधर्मंसहयादीय
तेर्थिने॥सकायःपावयेत्तज्जःषट्षट्वंश्यान्सहात्मना॥सहधर्मंचरतामितिपरिभाष्यकन्यादीयते
सकायः॥प्राजापत्यः॥तज्जःषट्वंश्यान्पूर्वान्षट्परानात्मानासहैवंत्रयोदशपुनाति॥ ॥
आसुरोद्रविणादानात्गांधर्वःसमयान्मिथः॥राक्षसोयुद्धहरणात्पैशाचःकन्यकाछला
त्॥छद्मनास्वापादिनास्याःसुहृदुणात्॥ ॥सवर्णादिपरिणयनेविशेषमाह॥ ॥पाणिर्ग्राह्यःसव
र्णासुग्रहीयात्क्षत्रियाशरं॥वैश्याप्रतोदमादद्याद्वेदनेत्वग्रजन्मनः॥सवर्णासुविवाहेषुयोक्त
विधिनापाणिरेवग्राह्यःक्षत्रियकन्यातुशरंगृह्णीयात्॥वैश्याप्रतोदंपराणंआददीत॥उद्वह

वेदने·शूद्रापुर्नसनस्य दर्शितत्वां॥ यथाह मनुः॥ वसवस्य दत्ताग्राह्याहाम्सद्भुवोत्त्पनेर्दृति॥ ॥दातृ
क्रममाह॥ ॥पिता पितामहो भ्राता सकुल्यो जननी तथा॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ॥ गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरं॥ एषां पित्रा
दीनां पूर्वस्य पूर्वस्य अभावे परः परः कन्याप्रदः॥ प्रकृतिस्थश्चेत्। यद्युन्मादादिदोषवान्भव
ति॥ अतो यस्याधिकारः सोऽप्रयच्छन्नृतौ भ्रूणहत्यामवाप्नोति॥ एतच्च उक्तलक्षणवरसंभ
वे वेदितव्यं। यदा पुनर्दातॄणामभावस्तदा कन्यैव गम्यं गमनार्हं उक्तलक्षणं स्वयमेव वरं वरय
ते॥ सकृत्प्रदीयते कन्या हरंस्तां चौरदंडभाक्॥ कन्या सकृदेव प्रदीयत इति शास्त्रनियमः॥
अतस्तां कन्यां दत्वाऽपहरन् चौरवद्दंड्यः॥ एवं सर्वत्र निषेधे प्राप्तेऽपवादमाह॥ ॥
दत्तामपि हरेत्पूर्वात् श्रेयांश्चेद्वर आव्रजेत्॥ यदि पूर्वस्माद्वरात् श्रेयान् विद्याभिजनाद्यतिश
ययुक्तो वर आगच्छति। यदि पूर्वस्य पातकयोगो दुर्वृत्तत्वं वा तदा दत्तामपि हरेत्॥ एतच्च सप्त
मपदादर्वाक् द्रष्टव्यं॥ अनाख्याय ददद्दोषं दंड्य उत्तमसाहसं॥ अदुष्टां तु त्यजन्दंड्यो दूषयं
स्तु मृषा शतं॥ यः पुनश्चक्षुषाग्राह्यदोषमनाख्याय यच्छति। असौ उत्तमसाहसं दंड्यः। उत्तमसा
हसमग्रे वक्ष्यति। अदुष्टां तु परिगृह्य त्यजन् उत्तमसाहसं दंड्यः। यः पुनः विवाहात्प्रागेव द्वेषादि
ना असद्भिर्दोषैर्दीर्घरोगादिभिः कन्यां दूषयति स शतान्पणान्वक्ष्यमाणलक्षणान् दंड्यः॥ अनन्यपू

१२ विकां कांतामससपिंडां यवीयसीं ॥ अनन्यपूर्विकामित्यत्रानन्यपूर्वा परिणेयोक्ता · तत्रानन्यपूर्वा
कीदृशी स्याह ॥ ॥अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः । स्वैरिणी या पतिं हित्वा सवर्णं कामतः
श्रयेत् ॥ ॥अन्यपूर्वा द्विविधा ॥ पुनर्भूः स्वैरिणी चेति ॥ पुनर्भूरपि द्विविधा ॥ क्षता वाक्षता च ॥ त
त्र क्षता संस्कारात्प्रागेव पुरुषसंबंधदूषिता । अक्षता पुनः संस्कारदूषिता ॥ या तु कौमारं पतिं त्य
क्त्वा पुनः कामतः सवर्णमाश्रयति सा स्वैरिणी ॥ ॥एवं सर्वप्रकारेण अन्यपूर्वापर्युदासे प्रासे
विशेषमाह ॥ ॥अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया । सपिंडो वा सगोत्रो वा घृताभ्यक्त ऋतता
वियात् । आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथा भवेत् ॥ अनेन विधिना जातः क्षेत्रजोस्य भ
वेत्सुतः ॥ ॥एतामलब्धपुत्रां पित्रादिभिरनुज्ञातः पुत्रार्थं देवरो भर्तुः कनीयान्ज्यायान्वा सपिंडो राम
वा उक्तलक्षणः सगोत्रो वा · एतेषां पूर्वस्य पूर्वस्य अभावे परः परो घृताभ्यक्तः सर्वांगेष्वृता
वेव वक्ष्यमाणलक्षणे इयात् गच्छेत् । आ गर्भोत्पत्तेः । ऊर्ध्वं पुनर्गच्छन्नन्येन वा प्रकारेण गच्छन्
पतितो भवेत् । अनेन विधिना उत्पन्नः पूर्वपरिणेतुः क्षेत्रजः पुत्रो भवति ॥ एतच्च वाग्दत्ता
विषयमित्याचार्याः ॥ यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजो विं
देत देवर इति मनुस्मरणात् ॥ व्यभिचारिणीं प्रत्याह ॥ ॥हृताधिकारां मलिनां पिंडमात्रोपजी
विनीं ॥ परिभूतामधः शय्यां वासयेद्व्यभिचारिणीं ॥ या व्यभिचरति तां हृताधिकारां स्वभरणा

धिकाररहितां मलिनां गंधेनताभ्यंजनशुभ्रवस्त्राभरणशून्यां प्राणयात्रामात्रोपभोगिनी ।। धिक्काराद्भिः परिभूतां ।। भूतलशायिनी ।। स्ववेश्मन्येववासमेत् । वैराग्यजननार्थं न शुध्यर्थं । यस्मात्पुंसः परदारेषु तच्चैनां चारयेद्व्रतमिति प्रथक् प्रायश्चित्तोपदेशात् ।। तस्याश्चाल्पप्रायश्चि त्तार्थमर्थवादमाह ।। ।। सोमः शौचं ददौ स्त्रीणां गंधर्वश्च शुभां गिरं ।। पावकः सर्वमेध्यत्वं मेध्या वै योषितोह्यतः ।। परिणयनात्पूर्वं सोमगंधर्ववह्नयः स्त्रियः भुक्त्वा यथाक्रमं तासां शौचम धुरवचः सर्वमेध्यत्वादि दत्तवंतः तस्मात्स्त्रियः सर्वत्र स्पर्शनालिंगनादिषु मेध्याः शुद्धाः स्मृताः ।। न चैतस्यास्तर्हि दोषो नास्तीत्याशंकनीयमित्याह ।। ।। व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते ।। गर्भभर्तृवधादौ च तथा महति पातके ।। अप्रकाशितात्मनो व्यभिचाराद्वा पुरुषांतरसंभोगसंकल्पादिरूपं तस्य ऋतौ रजोदर्शने शुद्धिः । शूद्रात्तु गर्भे त्यागः ।। ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतराः इति स्मरणात् ।। तथा गर्भवधे भर्तृवधे महापातके ब्रह्महत्यादौ आदिग्रहणात् शिष्यादिगमने च त्यागः । च त्यक्तास्तु परित्याज्याः शिष्यगा गुरुगा श्च याः ।। पतिघ्नी च विशेषेण जुंगितोपगता च याः इति स्मरणात् ।। जुंगितः प्रतिलोमजश्चर्मकारादिः । त्यागश्च या ।। उपभोगधर्मकार्ययोरनु नुज्ञा सनेतस्यामहान् निरुध्या स्वे वेश्मनीति नियमात् ।। ।। द्वितीयापरिणयने हेतुमाह ।। सुरापी व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा ।। स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ।। सुरां पिबंतीति सुरापी अत्रापि पतत्यर्द्धं शरीरस्य भार्या सुरां पिबेदिति समान्येन प्रतिषेधात् ।

२३ आधितामहारोगग्रस्ता॰धूर्त्ताविसंवादिनी॰वंध्याग्निःफला॰अर्थघ्नी अर्थनाशिनी॥ अप्रियंवदा
निष्ठुरभाषिणी॰स्त्रीप्रसूः स्त्रीजननी॰पुरुषद्वेषिणी सर्वेषामहितकारिणी॰अधिवेत्तव्येति प्रत्येकं
संबध्यते॰अधिवेदनं भार्यांतरपरिग्रहः॥ किंच॰अधिविन्नातु भर्त्तव्या महदेनोऽन्यथा भवेत्॥
यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते॥ साधिविन्ना पूर्ववद्वस्त्रदानमानसत्कारैर्भर्तव्या॥ अन्य
था अभरणे महदेनोऽपुण्यं भवति॰वक्ष्यमाणदंडश्च॰नच भरणे केवलात्पुण्यपरिहारः। यतो यत्रा
नुकूल्यं चित्तैक्यं दंपत्योस्तत्र धर्मार्थकामानां प्रतिदिनमभिवृद्धिः॥ स्त्रियं प्रत्याह॥ मृते जीवति
वा पत्यौ या नान्यमुपगच्छति॥ सेह कीर्तिमवाप्नोति॰उमया सह मोदते ~~क्रीड~~ते पुण्यप्रभावादमुत्र
चोमया सह॥ ॥भर्त्तरि मृते जीवति वा पापाचापस्मारसंपुरुषं नैवोपगच्छति साइह विपुलां कीर्ति
मवाप्नोति॰उमया सह मोदते क्रीडते पुण्यप्रभावादमुत्रेति॥ ॥अधिवेदनकारणाभावे अधि राम
वेत्तारं प्रत्याह॥ ॥आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं॥ त्यजन्दाप्यस्तृतीयांशमद्र
व्यभरणं स्त्रियाः॥ ॥आज्ञासंपादिनीं शीघ्रकारिणीं॰दक्षां कर्त्तव्यताचतुरां॰वीरसूं पुत्रवतीं॰
प्रियवादिनीं मधुरभाषिणीं॥ यस्त्यजति अधिविंदति स राज्ञा स्वधनस्य तृतीयांशं दाप्यः निर्ध
नस्तु भरणं ग्रासाच्छादनादिना दाप्यः॥ ॥स्त्रीधर्ममाह॥ ॥स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः
परः स्त्रियाः कार्यमेष धर्म॥ आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः॥ स्त्रीभिः सदा भर्त्तृवच
नं कार्यं। यस्मादयमेव धर्मः परः उत्कृष्टः॥ स्वर्गादिहेतुत्वात्॰यदा तु महापातकदूषितस्तदा
आशुद्धेः संप्रतीक्ष्यः। न तत्पारतंत्र्यं॰उत्तरकाले तु पूर्ववदेव तत्पारतंत्र्यं॥ ॥शास्त्रीयदार
संग्रहस्य फलमाह॥ ॥लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रकैः॥ यस्मात्तस्मात्स्त्रियः सेव्याः

कर्त्तव्याश्च सुरक्षिताः ॥ लोकानंत्यं वंशस्याविच्छेदः । दिवः प्राप्तिश्च दारसंग्रहस्य कथं प्रयो
जनमित्याह ॥ पुत्रपौत्रप्रपौत्रकैः लोकानंत्यं अग्निहोत्रादिकैश्च स्वर्गप्राप्तिरित्यान्वयः ॥ य
स्मात्स्त्रीभ्य एतद्द्वयं भवति तस्मात्स्त्रियः सेव्या उपभोग्याः ॥ प्रजार्थं रक्षितव्याश्च धर्मा
र्थं ॥ तथाचापस्तंबेन धर्मप्रजासंपत्तिः प्रयोजनं दारसंग्रहस्योक्तं ॥ धर्मप्रजासंपन्नेषु दा
रेषु नान्यत्कुर्वीतेति वदता रतिफलं तु लौकिकमेव ॥ ॥ पुत्रोत्पत्त्यर्थं स्त्रियः सेव्या इत्यु
क्तं तत्र विशेषमाह ॥ ॥ षोडशर्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् ॥ ब्रह्मचार्येव पर्वा
ण्याद्याश्चतस्रस्तु वर्जयेत् ॥ स्त्रीणां गर्भाधानयोग्यावस्थापलक्षितः कालः ऋतुः स
च रजोदर्शनदिवसादारभ्य षोडशाहोरात्रः तस्मिन्नृतौ युग्मासु समासु रात्रिषु संविशे
त् गच्छेत् ॥ पुत्रार्थं रात्रिग्रहणाद्दिवसप्रतिषेधः ॥ युग्मास्विति बहुवचनेन समुच्चयार्थ
त्वं तस्याञ्च एकस्मिन्नृतौ अप्रतिषिद्धासु युग्मासु समासु रात्रिषु गच्छेत् ॥ एवं गच्छन्ब्रह्मचा
र्येव भवति । अतो यत्र ब्रह्मचर्यं श्राद्धादिषु चोदितं तत्र गच्छतोपि न ब्रह्मचर्यस्खलनदोषो
स्ति । किंच । पर्वाण्याद्याश्चतस्रश्च वर्जयेत् । पर्वाणीति बहुवचनार्थावगमात् अष्टमीचतुर्दश्यो
ग्रहणं । यत्तु आदिबहुवचनात् तागणस्य संसूचकाभवंतीति वचनात् । यथाह मनुः ॥ अमावा
स्यामष्टमीं च पौर्णमासीं चतुर्दशीं ॥ ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥ इत्यमा
वास्यादीनि रजोदर्शनादारभ्य चतस्रो रात्रीश्च वर्जयेत् ॥ किंच ॥ एवं गच्छन् स्त्रियं क्षामाम्

१४ घामूलेचवर्जयेत्॥ सुस्थइंदौसकृत्पुत्रंलक्षण्यंजनयेत्पुमान्॥ ॥एवमुक्तेनप्रकारेणस्त्रि
यंगच्छेत्क्षामामेवगच्छेत्· क्षामताचतस्मिन्कालेरजस्वलाव्रतेनैवभवति॥ यदिनभवतित
दाकर्त्तव्याक्षामता· पुत्रोत्पत्त्यर्थं·· अल्पास्निग्धभोजनादिना॥ पुमान्पुंसोधिकेशुक्रेस्त्रीभव
त्यधिकेस्त्रियाइतिवचनात्॥ यदायुग्मायामपिरात्रौशोणिताधिक्यंतदास्त्रीएवभवतिपर
पुरुषाकृतिः॥ अयुग्मायामपिशुक्राधिक्येपुमान्भवतिपरंस्त्र्याकृतिः॥ कालस्यनिमित्तत्वा
त्॥ शुक्रशोणितयोश्चोपादानकारणत्वेनप्राबल्यात्· तस्मात्क्षामताकर्त्तव्या· मघामूलेनक्ष
त्रेवर्जयेत्॥ चंद्रेचैकादशादिशुभस्थानगते॥ चकारात्सुनक्षत्रशुभयोगलग्नादिसंपत्तौस
कृत्एकस्यांरात्रौनद्वित्रिर्वा· तत्रोक्तलक्षणेयुक्तंपुत्रंजनयतिपुमानप्रतिहतपुंस्त्वः॥ ॥
एवमृतौनियममुक्त्वाइदानीमनृतौनियममाह॥ ॥यथाकामीभवेद्वापिस्त्रीणांवरमनुस्म
रन्॥ स्वदारनिरतश्चैवस्त्रियोरक्ष्यायतःस्मृताः॥ भार्यायाऋतुकाले·अननतिक्रमेणप्रवृत्तिर राम
स्यास्तीतियथाकामीभवेत्॥ बाह्योनियमांतरपरिग्रहार्थोनपूर्वनियमनिवृत्त्यर्थः॥ ॥
स्त्रीणांवरंइंद्रदत्तंअनुस्मरन्·यथा· ताअब्रुवन्वरंवृणामहाऋत्वियात्प्रजांविंदामहै
काममाविजनितोःसंभवामेतितस्मादृत्वियात्स्त्रियःप्रजांविंदंतेकाममाविजनितोःसंभ
वेवरोवृतोह्यासामिति॥ अपिचस्वदारेष्वेवनितरांरतः। नअन्यस्त्रीकोभवेदित्यनुषज्यते·ए
वकारेणस्त्र्यंतरगमनंनिवर्त्तयति। प्रायश्चित्तस्मरणात्॥ उभयत्रापिहेतुप्रयोजनमाह॥
स्त्रियोरक्ष्यायतःस्मृताइति॥ यस्मात्स्त्रियोरक्ष्याःस्मृताउक्ताः कथमाश्वसुरक्षिताइति·

तत्त्वसुरक्षणं यथाकामित्वेन स्यात् तदा मनेन च भवतीति ।। तन्नेह हन्त स्मिन्नु गमासु संनिवेशो दिति किम
यं विधिर्नियमः परिसंख्या वा उच्यते · न तावद् विधिः । प्राप्तार्थत्वात् · नापि परिसंख्या द्वावत्र पक्षसमास
क्तेः । विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति · तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयत इति दोषप्र
समासक्तेः ।। अतो नियमं प्रतिपादयितुं स्याद्विदः । कः पुनरेषां भेदः उच्यते · अत्यन्ताप्राप्तप्रापणं विधिः यथाग्निहो
त्रं जुहुयात् स्वर्गकामः कर्तव्यमनेनाव इति · पक्षे प्राप्तस्याप्राप्तपक्षान्तरप्रापणं नियमः । यथा समे य
जेतेति दर्शपौर्णमासाभ्यां यजेतेति यागः कर्तव्यतया विहितः सन्न देशमन्तरेण कर्तुं न शक्यत इस
र्थादृशः प्राप्तः ।। स च समो विषमश्चेति द्विविधः : यदा यजमानः समे विषमे च पक्षस्ते तदा समे यजेतेतीदृ
वचनमुपास्ते · स्वार्थस्य प्राप्तत्वात् · यदा तु विषमे देशे योऽपि पक्षस्ते तदा समे यजेतेतीदं वचनं स्वार्थं वि
धत्ते स्वार्थस्य तदानीमप्राप्तत्वात् · विषमदेशनिवृत्तिश्च अर्थाच्चोदितं तद्देशेन यागनिवृत्ते रस्वादि
ष्टदेशोपादानेन यथाशास्त्रं यागोऽनुष्ठितः स्यात् · तथा प्राङ्मुखोऽन्नानि परिसंख्या · तद्यथा · इमा
मगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इति · अत्र मन्त्रः स्वसामर्थ्यादश्वाभिधान्या गर्द
भाभिधान्याश्च रशनामृतस्येत्यस्य सरणे प्राप्ते विनियुक्तः । पुनरश्वाभिधानीमादत्त इति वचनेन
अश्वाभिधान्यां विनियुज्यमानो गर्दभाभिधान्या निवर्त्तत इति · तथा पञ्च पञ्चनखा भक्ष्या इति · अ
त्र हि पञ्चनखाः शशशशादिषु श्वादिषु च भक्षणं प्राप्तं पुनः शशशादिषु श्रूयमाणं श्वादिभ्यो निवर्त्त
त इति ।। किं पुनरत्र युक्तं परिसंख्या स्याह ।। तथाहि · ऋतुदारसंग्रहस्य स्वेच्छयानन्तरतो गमनं प्राप्त
मिति न विधेरयं विषयः । नापि नियमस्य गत्यसमाप्तिविरोधात् · एवं हि स्मरन्ति ग्रन्थकाराः दास

१५ दारसंग्रहानंतरं त्रिरात्रं द्वादशरात्रं संवत्सरं वा यावत्तौ स्यादिति · ननु द्वादशरात्रात्संवत्सराद्वा पूर्वमेवर्त्
तौ गच्छेदेवेति नियमात्तत्र लक्षणं सरणं वा धेत · अपि च प्राप्तिभावार्थस्य वचने विधेयपरं युक्तं · शास्त्रे चर्तौ
गमनं नित्यप्राप्त्यमेवेति · ऋतौ गच्छेदेवेति नियमो नर्थकः स्यात् नियमे चादृष्टकल्पनीयं। किं चर्तौ गंतव्य
मेवेति नियमे सन्निहितस्य व्याध्यादिनाऽसमर्थस्य प्रतिषेध्याशाकोपि तु पदिष्टः स्यात्। विध्यनु
वादविरोधश्च नियमे · तथाहि केः सहदुच्चरितस्तमेवार्थं पक्षे अनुवदति पक्षे अनुविधत्ते चेति · तस्मा
दृतावेव गच्छेन्नान्यत्रेति परिसंख्यैव युक्ता · तदिदं भाष्ये विविच्य रूपादर्शनानुमन्येते · यत्तो निय
मस्तव युक्तः। पक्षे स्वार्थविधिसंभवात्॥ अगमने दोषश्रवणाच्च॥ ऋतुस्नातां तु यो भार्यां सन्नि-
धौ नोपगच्छति · घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इति॥ न च विध्यनुवादविरोधो नुवाद
भावादिरर्थस्तच्च वचनस्य। तत्र हि विध्यनुवादविरोधो यत्र विधेयाबधितपातं देशानुवदितव्य राम
म प्राप्तं यथा अग्नौ देशेन विधातव्यं चेति॥ यथा वाजपेयाधिकरणपूर्वपक्षे वाजपेयेन स्वाराज्यका
मो यजेतेति। वाजपेयलक्षणगुणविधानाद्विधितेन यागानुवदितव्यः। स एव स्वाराज्यलक्षण
फलोद्देशेन विधातव्य इति · न चानुवादे नेह कल्पमस्ति · यच्चानियमे अदृष्टपरिकल्पनेति सुत्त्के
तस्य परिसंख्यायामपि समानं। अन्यतो गच्छतो दोषकल्पनात्। यत्तु नैयमिकः पुत्रोत्पादनविधिरास्ते
ये यो गच्छेत्तो नित्यगमनप्राप्ते नित्यनियम इति · स एवायं नैमामिकः पुत्रोत्पादनविधिः स्यान्न तत एव गच्छ
नास्त्ययं ता मल लक्षण्यपुत्रं जनयेदिति स्वाभिगमनातिरिक्तः पुत्रोत्पादनविधिरिति · न च तत्र ग
मनं तारणिकायाभावं तावदेव पुत्रोत्पत्तिकर्मता प्रदश्यते · एवं गच्छत्तलक्षण्यपुत्रं जनयेदित्यनेन नय
था अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादौ · न चासन्निहितं दरस्यार्थविधिप्रसंगः। सन्निहितं राक्षेयोरेवा १५

पदेशात् · ऋतुस्नातां तु यो भार्यां संनियमविधानादेषः न च विशेषणं परता · पक्षे भावार्थविधि
संभवात् ॥ नापि गृह्यस्य धृतिविरोधः ॥ संवत्सरास्तुर्वमेव ऋतु दर्शने संविशानो न त्रस्त स्वर्वलन
दोषोयथाश्राद्धादिषु इति · स्वार्थे हानि परार्थ कस्य नाप्रासमाधलक्षणदोषत्रये च नीपरिस
ख्यान मुक्तौ · पंच पंचनखा भक्ष्याइ सत्र पधपिशाशादिषु भक्षणस्य पक्षे प्रासे निमिमः ॥ शशा
दिषु श्वादिषु च प्रासे परिसंख्येषु भय संभवस्तथापि नियम पुक्षे शशादिषु भक्षणे दोषप्र
संग ॥ श्वादिषु भक्षणे चादोषप्रसंगेन प्रायश्चित्त स्मृतिविरोधः ॥ इति परिसंख्यावाप्तित्ता ·
एतेन सायं प्रातर्द्विजातीनामशनं श्रुतिनोदितं ॥ इत्यत्रापि नियमो व्याख्यातः ॥ नांतरा भोजनं ·
कुर्यादिति वचनेन पुनरुक्तं स्यात् परिसंख्यायां · एवं च नियमे सति ऋतावृतावीप्सालभ्येन · नि
त्यतावत्तैर्निमित्तिकमप्यावर्तत इति न्यायात् ॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् · इत्यत्र
नित्यावृत्ते निमित्ति कमप्यावर्तत इति न्यायात् ॥ यथाकामीभवेद्वापि स्य यमपि नियम एव · ऋत
तावपि स्त्रीकामनायां ससांस्त्रीयं मभिरमयेदेवेति · ऋतावुपेयात्सर्वत्र वाप्रतिषिद्धवर्जं
मिस्येतदपि गौतमीयं स्त्रत्रयं नियम परमेव · ऋतावुपेयादेवं प्रस्तावपि स्त्रीकामनायां स
त्यां प्रतिषिद्धवर्जमुपेयादेव रसल प्रपंचेन ॥ किंच ॥ ॥ भर्तृभ्रातृज्ञातिश्वश्रूः श्वशुरदेवरै
रैः ॥ बंधुभिश्च स्त्रियः पूज्याः भूषणाच्छादनाशनैः ॥ भर्तृप्रभृतिभिः पूर्वोक्ताः साध्व्यः स्त्रियो
यथाशक्त्यलंकारवसनभोजनपुष्पादिभिः संमाननीयाः ॥ यस्मात्ताः पूजिता धर्मार्थकामा
न्संवर्धयंति ॥ ॥ तया पुनः समर्पितगृहव्यापारया किंभूतया भाव्यमित्याह ॥ ॥ संयता
पस्कराद्दक्षा हृष्टा व्ययपराङ्मुखी ॥ कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा ॥ संयतः

१६ स्थानेनिवेशितउपस्करोगृहोपस्करवर्गोययासातथोक्ता·यथोलूखलमुसलशूर्पादेः कंडनस्था
नेदृषदुपलयोरविघोगेनपेषणस्थानइत्यादि॥दक्षागृहव्यापारकुशला·हृष्टाप्रहसितवद
ना॥व्ययपराङ्मुखीनव्ययप्रशीला·सर्वत्रस्यादितिशेषः।किंच·श्वश्रूश्वशुरयोःश्वश्रूश्वशुरौ·श्व
शुरःश्वश्र्वाइत्येकशेषः।तयोःपादवंदनंनित्यंकुर्यात्॥श्वशुरग्रहणंमान्यानरोपलक्षणार्थं॥भ
र्तृचत्परावर्त्तिनीसतीपूर्वोक्तंकुर्यात्॥ ॥भर्तरिसंनिधावुक्त्वाप्रोषितेभर्तरिकिंकर्तव्यमित्याह॥ ॥
क्रीडांशरीरसंस्कारंसमाजोत्सवदर्शनं॥हास्यंपरगृहेयानंत्यजेत्प्रोषितभर्तृका॥ ॥देशान्त
रगतभर्तृकाक्रीडांकंदुकादिभिःशरीरसंस्कारमुद्वर्तनादिभिः।समाजोजनसमूहः।उत्सवोविवा
हादिः।तयोर्दर्शनंहास्यंविश्रंभेणपरगृहेयानंचसंत्यजेत्तदेतन्निप्रत्येकंसंबध्यते॥किंच·रक्षेत्कन्यां
पिताविन्नांपतिःपुत्रास्तुवार्धके।अभावेज्ञातयस्तेषांनस्वातंत्र्यंक्वचित्स्त्रियाः॥विवाहात्प्राक्पि
ताकन्यामकार्याद्रक्षेत्।ततऊर्ध्वंभर्ता·तदभावेपुत्राःवार्द्धक्ये·तेषामुक्तानामभावेज्ञातयः राम
ज्ञातीनामभावेराजा·पक्षद्वयावसानेतुराजाभर्ताप्रभुःस्त्रियाइतिवचनात्।अतःस्त्रीणांन
कचिदपिस्वातंत्र्यं॥किंच·पितृमातृसुतभ्रातृश्वशुरमातुलैः।हीनानस्याद्विनाभर्त्रागर्हणी
यान्यथाभवेत्॥भर्त्राविनाभर्तृरहितापित्रादिरहितानस्यात्॥यस्मात्तद्रहितागर्हणीयानिंद्या
स्यात्॥एतच्चब्रह्मचर्यपक्षेभर्तरिप्रेतेब्रह्मचर्यंतदन्वारोहणंवेतिविष्णुस्मरणात्·अन्वारोह
णेचमहानभ्युदयः॥तथाचव्यासःकपोतिकाख्यानव्याजेनदर्शितवान्॥पतिव्रतासंप्रदीप्तं
प्रविवेशहुताशनं।तत्रचित्रांगदधरंभर्तारंसान्वपद्यत॥ततःस्वर्गगतःपक्षीभार्ययासहसं
गतः।कर्मणापूजितस्तत्ररेमेचसहभार्यया॥इति॥तथाचशंखांगिरसौ·तिस्रःकोट्योर्धको

टीच यानि लोमानि मानुषे ॥ तावत्कालं वसेत्स्वर्गे भर्त्तारं यानुगच्छति इति प्रतिपाद्यतयोर्वियोगदर्शय
तः । व्यालग्राही यथा सर्पं बिलादुद्धरते बलात् । तद्वदुद्धृत्य सा नारी सह तेनैव मोदते तेन सा भर्तृप
रमा सूयमानाप्सरोगणैः । क्रीडते पतिना सार्धं यावदिन्द्राश्चतुर्दश ॥ तथा च बल्लघ्नो वा कृतघ्नो वा भ
वेत्पतिः ॥ पुनाति सा विधवा नारी तमादाय मृता तु या ॥ मृते भर्त्तरि या नारी समारोहेद्धुताशनं । सारुंध
ती समाचारा स्वर्गलोके महीयते ॥ यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत् । तावन्न मुच्यते सा
हि स्त्रीशरीरात्कथंचनेति । हारीतोपि । मातृकं पैतृकं चैव यत्र कन्या प्रदीयते । कुलत्रयं पुनात्येषा
भर्त्तारं यानुगच्छतीति ॥ आनीते मुदिते हृष्टा परोक्षे मलिना कृशा । मृते च म्रियते पत्यौ सा स्त्री ज्ञे
या पतिव्रता ॥ अयं च सर्वासां स्त्रीणामगर्भिणीनां अबालापत्यानां आचाण्डालं साधारणो धर्मः
॥ भर्त्तारं यानुगच्छतीत्यविशेषोपादानात् ॥ यानि च ब्राह्मण्यनुगमननिषेधपराणि वाक्यानि ॥ मृ
तानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् । जीवति तद्धितं कुर्यान्मरणादात्मघातिनी ॥ या स्त्री ब्रा
ह्मणजातीया मृतं पतिमनुव्रजेत् ॥ सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् इत्यादीनि पृथक् तानि
चितिसमारोहणविषयाणि । पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हतीति विशेषस्मरणात् ॥ अनेन क्ष
त्रियादिस्त्रीणां पृथक्चितिसमप्यनुज्ञा गम्यते ॥ यत्तु केचिदुक्तं । पुरुषाणामिव स्त्रीणामप्यात्महननस्य
प्रतिषिद्धत्वादिति प्रवृद्धस्वर्गाभिलाषायाः प्रतिषेधशास्त्रमतिक्रामं सहगमनमनुगमनोपदेशाः ।
श्येनवत् । श्येनेनाभिचरन्यजेतेति । यथा तीव्रक्रोधाक्रान्तस्यानस्य प्रतिषेधशास्त्रमतिक्रा
मतः श्येनोपदेश इति । तदयुक्तं । यत्र वा श्येनकरणिकाया भाव्यभूत हिंसाया विधिसंस्पर्शो

भावेनप्रतिषेधसंस्पर्शात्फलद्वारेणश्येनस्यानर्थसंसर्गोपपत्तिनेषांमतेहिंसायाएवस्वर्गार्थेनयाऽत्रानुगमन
मनशास्त्रेणविधीयमानत्वात्प्रतिषेधसंस्पर्शाभावदत्तोषामीयवत्स्यश्येनेवानुगमनस्यश्येनवैषम्यं॰ यत्तुम
तेहिंसानाममरणानुकूलोव्यापारःश्येनश्चपरमरणानुकूलव्यापारत्वाद्धिंसैव॰ कामाधिकारस्यकरणां
शेरागतःप्रवृत्तिसंभवेनविधेरप्रवर्तकत्वात्॰ रागप्रवृत्तहिंसास्वरूपत्वाच्छ्येनःप्रतिषिद्धःस्वरूपेणा
नर्थइतित्वयाप्यनुगमनशास्त्रेणमरणस्यैवस्वर्गसाधनतयाविधानात्मरणेवद्युपरागतःप्रवृत्तिःत
थापिमरणानुकूलेव्यापारेऽग्निप्रवेशादावितिकर्तव्यतारूपेविधितात्पर्यमवृत्तेरितिननिषेधस्याव
काशः॥ वायंश्येनतमालेप्रेतस्पृतिकामरतिवृत्यतस्मात्स्यश्येनेवानुगमनस्यश्येनवैषम्यं॰ यत्तु॰ तस्मा
दुहन्नपुरायुषःस्वःकामीप्रेयादितिस्मृतेर्विरोधादनुगमनमयुक्तं॰ तच्चेन॰ स्वःकामीऽप्यायुषःप्राक्
नप्रेयादिति॰ स्वर्गफलोद्देशेनऽप्यायुषःप्रागपूर्व्यपीनकर्त्तव्योमोक्षार्थिना। यस्मादायुषःशेषसमिति
त्यनेमित्तिककर्मानुष्ठानक्षपितांतःकरणकस्यश्रवणमननिदिध्यासनसंपत्तौसत्यामात्मता
त्त्वेननिःसर्निरतिशयानंदब्रह्मप्राप्तिलक्षणमोक्षसंभवः॥ तस्मादनित्याल्पसुखरूपस्वर्गार्थेमा राम
पुरायोनकर्त्तव्यइत्यर्थः॥ अतएवमोक्षमनिच्छंसाऽपिअनित्याल्पसुखरूपस्वर्गार्थिन्याऽनुगमनेयु
क्तं॥ इतरकाम्यानुष्ठानवदितिसर्वमनवद्यं॥ किंच॥ पतिप्रियहितेयुक्तास्वाचाराविजितेंद्रिया॥
सेहकीर्तिमवाप्नोतिप्रेत्यचानुत्तमांगतिं॥ प्रियमननोनुकूलस्यापथ्यस्यकरंतद्धितं। पत्युःप्रियंचहि
तंतस्मिन्युक्तानिरता॰ स्वाचाराशोभनआचारोयस्याःसातथोक्ता॰ शोभनश्चआचारोदर्शितःशं
खेन॰ नानुक्तागृहान्निर्गच्छेन्नानुत्तरीयानत्वरितंव्रजेत्॰ नपरपुरुषमतिभाषेतान्यत्रवणिक्
प्रव्रजितवृद्धवैद्येभ्योननाभिंदर्शयेत्॥ आगुल्फाद्वस्त्रःपरिदध्यात्नस्तनौविवृतौकुर्यात्॰ नो
हसेदपावृतंनभर्त्रारंतद्बंधुंवापद्विष्यात्नगणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामाया

मूलकुरुकौंकारिकादुःशीलादिभिः सह एकत्र न तिष्ठेत् । संसर्गेण हि कुलस्त्रीणां चारित्रं दुष्यति ।
विजितेन्द्रियाः विजितानि स्वयमितानि इन्द्रियाणि श्रोत्रादीनि वा गतो निश्चमनः सहितानि यया सा
इहलोके कीर्तिं प्रख्यातिं परलोके उत्तमां गतिं प्राप्नोति ॥ अथ च सकलकुलस्त्रीधर्मो विवाहादूर्ध्वं
वहितव्यः ॥ प्रागुपनयनात्कामचारवादभक्ष्य इति स्मरणात् । वैवाहिको विधिः स्त्रीणामौपना
यनिकः स्मृत इति च ॥ ॥ अनेकेनार्थप्रस्तारः ॥ ॥ ससामान्यासवर्णायां धर्मकार्यं न कारयेत् ॥ सव
र्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥ ॥ सवर्णायां सत्स्वन्यां असवर्णां धर्मकार्ये नैव का
णांसु विधौ धर्मानुष्ठाने ज्येष्ठया विना ज्येष्ठामुल्लंघ्य इतरां मध्यमां कनि
रयत् ॥ सवर्णास्वपि बह्वीषु धर्म्ये विधिमुक्त्वाप्रमीतभार्यप्रसाह ॥ ॥ दाहयित्वाग्निहोत्रेण
ष्ठावाननियोक्त्व्याप्रमीतपतिकाया विधिलेबयन् ॥ पूर्वोक्तां वृत्तवतीं आचारवती
स्त्रियं वृत्तवतीं पतिः ॥ ॥ आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन् ... श्रौताग्निना तदभावे स्मार्ताग्निना दाहयित्वा पतिर्भर्ता । अनुत्पादित
विपन्नां स्त्रियमग्निहोत्रेण श्रौताग्निना तदभावे स्मार्ताग्निना तदभावे पुनर्दारानग्नींश्च विधिवदाहरेत् ।
पुत्रोऽनिष्टयज्ञो वाऽऽश्रमान्तरे चानधिकृतो वा स्त्र्यन्तराभावे पुनर्दारानग्नींश्च विधिवदाहरेत्
पुत्रोऽनिष्टयज्ञो वा आश्रमान्तरे चानधिकृतो वा स्त्र्यन्तरा अनाश्रमी न तिष्ठेत् दिनमेकमपि द्विजः इति दक्षस्मरणात् । एतच्चाधाने
अविलंबयन् । शीघ्रमेव । अनाश्रमी न तिष्ठेत् दिनमेकमपि ... दहेद्वैतानिकाग्निभिः ॥ जीवत्स्वां प्रथ
सहाधिकृतायाः एव । नत्वस्याः । मनुः द्वितीयां चैव यो भार्यां दहेद्वैतानिकाग्निभिः ॥ जीवत्स्वां प्रथ
मायां तु सुरापानसमं हि तत् ॥ तथा । मृतायां तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत् ॥ ब्रह्मघ्नं तं वि
जानीयात् यश्च कामात्समुत्सृजेत् ॥ एवमादि । तदाधाने सहानधिकृतायाः अग्निदानं वेदितव्यम् ॥ ॥
इति विवाहप्रकरणम् ॥ ॥ ब्राह्मणस्य चतस्रो भार्याः क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैका इत्युक्ता
तासु चैव पुत्रा उत्पाद्यितव्या इत्युक्तमिदानीं कस्यां कस्मात् कः पुत्रो भवतीति विवेक्तुमाह ॥ ॥

१८ ॥सवर्णेभ्यः सवर्णासु जायंते हि सजातयः॥ अनिंद्येषु विवाहेषु पुत्राः संतानवर्द्धनाः॥ सवर्णेभ्यो ब्राह्मणादिभ्यः
सवर्णासु ब्राह्मण्यादिषु सजातीया मातापितृसमानजातीयाः पुत्रा भवंति। विन्नास्वेष विधिः स्मृत इति तस्य
तएव॥ सवर्णशब्दः स्पष्टार्थः॥ अतश्चायमर्थः संपन्नः॥ ऊढेन विधिनोढायां सवर्णायां वोढुः सवर्णादु
त्पन्नस्तत्समानजातीयो भवति। अतश्च कुंडगोलककानीनसहोढादीनां सवर्णत्वमुक्तं भवति। तेच
सर्वेभ्योनुलोमेभ्यश्च भिद्यमानाः साधारणधर्मैरहिंसादिभिरधिक्रियंते। शूद्राणां तु सधर्माणः सर्वेप
ध्वंसजाः स्मृताः इति स्मरणात्॥ अपध्वंसजा अभिचारतः शूद्रधर्मैरपि द्विजशुश्रूषादिभिरधिक्रियंते
॥ननु कुंडगोलकयोर्ब्राह्मणत्वे श्राद्धप्रतिषेधोऽनुपपन्नो न्यायविरोधश्च। यो यज्जातीयात्तज्जा
तीयायामुत्पन्नः स तज्जातीय एव॥ यथा गोर्गवि गौः अश्वाद्वडवायामश्वः। तस्माद्ब्राह्मणाद्ब्राह्म
ण्यामुत्पन्नो न ब्राह्मण इति विरुद्धं॥ तथा कानीनपौनर्भवादीननुक्रम्य सजातीयेष्वयं प्रोक्तस्तन राम
येषु मया विधिरिति वक्ष्यति तद्विरोधश्च। नैतत्सारं ब्राह्मणाद्ब्राह्मण्यामुत्पन्नो ब्राह्मण इति भ्रमनि
वस्यर्थः॥ श्राद्धप्रतिषेधो यथा संतमसस्यापतितस्य श्राद्धे प्रतिषेधः॥ न च न्यायविरोधश्च। यत्र
प्रत्यक्षगम्या जातिस्तत्र तथा। ब्राह्मण्यादिजातिस्तु स्मृतिलक्षणा। यथा स्मरणं भवति। यथा समाने
पि ब्राह्मण्ये कुंडिनो वासिष्ठोऽत्रिगोत्र इति स्मरणलक्षणं गोत्रं। तथा मनुष्यत्वे समानेपि ब्राह्मणा
दिजातिः स्मरणलक्षणा मातापित्रोर्ब्राह्मणत्वे तद्वज्जातिलक्षणं। न चानवस्था अनादित्वात्संसारस्य शब्दा
र्थव्यवहारवत्॥ सजातीयेष्वयं प्रोक्त इति चोक्तानुवादत्वाद्यथासंभवं व्याख्यास्यते॥ क्षेत्रजस्तु मातृ
समानजातीयो नियोग इति स्मरणाच्छिष्टसमाचाराच्च। यथा धृतराष्ट्रपांडुविदुराः क्षेत्रजाः संतो
मातृसजातीया इत्यलमतिप्रसंगेन॥ किंच। अनिंद्येषु विवाहेषु ब्राह्मादिषु पुत्राः संतानवर्धना अरोगिणो

दीर्घायुषो धर्मप्रजाः संपन्ना भवंति सवर्णानुक्त्वेदानीमनुलोमानाह ॥ ॥ विप्रान्मूर्द्धावसिक्तो हि क्षत्रि
यायां विशः स्त्रियां ॥ अंबष्ठः शूद्र्यां निषादो जातः पारसवोपि वा ॥ ब्राह्मणेन क्षत्रियायां विन्नायां उत्पन्नो
मूर्द्धावसिक्तो नाम पुत्रो भवति ॥ वैश्यकन्यायां विन्नायां अंबष्ठः शूद्रायां विन्नायां निषादः निषादो ना
म कश्चिन्मत्स्यघातजीवी प्रतिलोमजः स माभूदिति पारसवोयं निषाद इति संज्ञाविकल्पः विप्रादित्यस्या
नुवर्त्तते· यत्तु· ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव भवति· क्षत्रियेण वैश्यायां वैश्य एव· वैश्ये
न शूद्रायां शूद्र एवेति तदेतत्स्मरणं तत्क्षत्रियादिधर्मप्राप्त्यर्थं· न पुनर्मूर्द्धावसिक्तादिजातिनिराकर
णार्थं· क्षत्रियादिजातिप्राप्त्यर्थं वा ॥ अतश्च मूर्द्धावसिक्तादीनां क्षत्रियादेरुक्तैरेव दंडाजिनोपवीता
दिभिरुपनयनादिकार्यं । प्रागुपनयात्कामचारादि पूर्ववद्वेदितव्यं ॥ वैश्यायां शूद्रायां तु राजन्यान्माहिष्यो
ग्रौ सुतौ स्मृतौ ॥ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः ॥ वैश्यायां शूद्रायां च विन्नायां राजे
न्यान्माहिष्योग्रौ यथाक्रमं पुत्रौ भवतः वैश्येन शूद्रायां विन्नायां करणो नाम पुत्रो भवति ॥ एष सव
र्णमूर्द्धावसिक्तादिसंज्ञाविधिर्विन्नासु ऊढासु स्मृत उक्तो वेदितव्यः ॥ एते च मूर्द्धावसिक्ताम्बष्ठनि
षादमाहिष्योग्रकरणाः षट् अनुलोमजाः पुत्रा वेदितव्याः ॥ अथ प्रतिलोमानाह ॥ ॥ ब्राह्मण्यां
क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा ॥ शूद्राज्जातस्तु चांडालः सर्वधर्मबहिष्कृतः ॥ ~~किंच क्षत्रिया~~
~~मागधं वैश्यात् शूद्रात्क्षत्तार~~मेव च ॥ ब्राह्मण्यां क्षत्रियवैश्यशूद्रेभ्य उत्पादिता यथाक्रमं सूतवैदे
हिकचांडालाख्याः पुत्रा भवंति । तत्र चांडालः सर्वधर्मबहिष्कृतः ॥ किंच क्षत्रिया मागधं वैश्या
च्छूद्रात्क्षत्तारमेव च ॥ शूद्रादायोगवं वैश्या जनयामास वै सुतं ॥ ॥ क्षत्रियायां मिति वैश्यान्मा

१९ गधंनामसुतंजनयति।सएवशूद्रात्क्षत्तारं।वैश्यायांचतुशूद्रादयोगवंनामपुत्रंजनयति॥एते
चसूतवैदेहिकचंडालमागधक्षत्तायोगवाःषट्प्रतिलोमजाः।एतेषांचवृत्तयऔशनसेमा
नवेचद्रष्टव्याः॥संकीर्णसंकरजातानंतरमाह॥ ॥माहिष्येणकरण्यांतुरथकारःप्रजाय
ते॥असत्संतस्तुविज्ञेयाःप्रतिलोमानुलोमजाः॥क्षत्रियेणवैश्यायामुत्पादितोमाहिष्योवै
श्येनशूद्रायामुत्पादिताकरणीतस्यांमाहिष्येणोत्पादितोरथकारोनामजातोभवति।त
स्यचोपनयनादिसर्वंकार्यं-वचनात्॥यथाहशंखः॥क्षत्रियवैश्यानुलोमांतरोत्पन्नोरथ
कारःतस्यचेज्यादानोपनयनसंस्कारक्रियाः।अश्वप्रतिष्ठारथसूत्रवास्तुविद्याध्ययनवृ
त्तितावेस्यैवंब्राह्मणक्षत्रियाद्युत्पन्नमूर्द्धावसिक्तमाहिष्याद्यनुलोमसंकरजासंततरतोउ राम
पनयनादिप्राप्तिश्चवेदितव्या॥तयोर्द्विजातित्वात्-संज्ञास्तुस्मत्स्पतरोत्काद्रष्टव्याः।एतच्च
प्रदर्शनमात्रमुक्तं।संकीर्णसंकरजातानामानंत्याद्वक्तुमशक्यत्वात्-अत्रगणनावदत्रविवक्षि
तं।असंतःप्रतिलोमजाःसंतश्चानुलोमजाःइतिज्ञातव्याः॥सवर्णेभ्यःसवर्णासुजायंतेइ
त्यादिनावर्णप्राप्तौकारणमुक्तं-इदानींकारणांतरमाह॥ ॥जात्युत्कर्षोयुगेज्ञेयःसप्तमेपं
चमेपिवा॥व्यत्ययेकर्मणांसाम्यंपूर्ववच्चाधरोत्तरं॥जात्युत्कर्षोमूर्द्धावसिक्ताद्यास्तासामुत्कर्षो
ब्राह्मणत्वादिप्राप्तिःसजात्युत्कर्षोयुगेजन्मनिसप्तमेपंचमेपिवा।अपिशब्दात्षष्ठेवाबोद्धव्यः।व्यवस्थित
श्चायंविकल्पः।व्यवस्थाचब्राह्मणेनशूद्रायामुत्पादितानिषादीसाचब्राह्मणेनोढादुहितरंको
चिज्जनयति-सापिब्राह्मणेनोढासाप्यन्यामित्यनेनप्रकारेणषष्ठोसप्तमंब्राह्मणंजनयति॥ १९

ब्राह्मणेन वैश्यायामुत्पादितांबष्ठी साप्यनेन प्रकारेण पंचमी षष्ठं ब्राह्मणं जनयति॥ मूर्द्धावसिक्ता
प्यनेन प्रकारेण चतुर्थी पंचमं ब्राह्मणं जनयति॥ एवमुग्रा क्षत्रियोढा माहिष्याय पात्रमेव षष्ठं पंचमं
च क्षत्रियं जनयति। तथा करणी वैश्योढा पंचममेव वैश्यमित्येवमन्यत्राप्यूहनीयं॥ किंच कर्मणां व्य
त्यये वस्य पौनाः कर्मणां मत्स्यैर्विपर्यासे यथा वा सल्लोमुख्या रसाऽग्रजीवन् स्यात्तेन कर्मणाजी
वेत्तद्धस्तनुकल्पस्तेनाप्यजीवन् वैश्यपरस्यात्तेनाप्यजीवन् शूद्रवत्सा॥ क्षत्रियोऽपि स्ववृत्त्याऽग्रजीवन्
वैश्यवृत्त्या शूद्रवृत्त्या वा॥ वैश्योऽपि स्ववृत्त्याऽग्रजीवन् शूद्रवृत्त्यातितत्कर्मणा यस्य यः तस्मिन्न्या
य्ये सतिपद्यापद्विमोक्षेपितां वृत्तिं न त्यजति तदा स सप्तमे षष्ठे पंचमे वा जन्मनि साम्यं यस्य
हीनवर्णस्य कर्मणाजीवति तत्समानजातित्वं भवति॥ तद्यथा॰ ब्राह्मणः शूद्रवृत्त्याजीवंस्ता
मरिस्यन्यदि पुत्रमुत्पादयति सोऽपि तथैव वृत्त्याजीवन्पुत्रांतरमित्येवं परंपरया सप्तमे जन्म
नि शूद्रं वैश्यवृत्त्याजीवन्पंचमे वैश्यं। वैश्योऽपि शूद्रवृत्त्याजीवंस्तामपरित्यजन् पंचमे जन्मनि
शूद्रमेव जनयतीति॥ पूर्ववद्वाधरोत्तरे॥ अस्यार्थः वर्णसंकरे अनुलोमजाः प्रतिलोमजा
श्च दर्शिताः॥ संकीर्णसंकरजातानामपरप्रकारतिदर्शनेन दर्शिताः॥ इदानीं वर्णसंकीर्णसंक
रजाताः प्रदर्श्यन्ते॥ अधरे चोत्तरे। यथा मूर्द्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादिताः तथा
अंबष्ठायां वैश्यशूद्राभ्यां निषाद्यां शूद्रेणोत्पादिताः अधराः प्रतिलोमजाः॥ तथा मूर्द्धाव
सिक्तांबष्ठनिषादीषु ब्राह्मणेनोत्पादिताः माहिष्योग्रयोर्ब्राह्मणेन क्षत्रियेण चोत्पादिताः
करण्यां ब्राह्मणेन क्षत्रियेण वैश्येन चोत्पादिताः उत्तरे अनुलोमजाः॥ एवमन्यत्राप्यूहनीयं॥

२०

एतद्धर्मरोत्तरं पूर्ववदस्य सदृश्येति वेदितव्यमिति ॥ ॥३॥ इति जातिविवेकप्रकरणं ॥ श्रौतस्मार्तानि कर्मा
ण्यग्निसाध्यानि दर्शितानि तानि कस्मिन्नग्नौ कर्त्तव्यानीत्याह ॥ ॥कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्र
त्यहं गृही ॥ दायकालाहृते वापि श्रौतं वैतानिकाग्निषु ॥ स्मार्तं स्मृत्युक्तं वैश्वदेवादिकं कर्म लौकिकं च पचना
दिनं पाकलक्षणं गृहस्थो विवाहाग्नौ विवाहसंस्कृतेऽग्नौ कुर्वीत । दायकालाहृते वा । दायकालो
दनेनानीधे सादिनोक्तसंस्कारसंस्कृतेऽपि शालाग्नौ प्रते वा गृहपतौ प्राहृते संस्कृते एवाग्नौ नतु
श्वकालत्रयातिक्रमे प्रायश्चित्तीयते ॥ श्रुतमुक्तमग्निहोत्रादिकं वैतानिकाग्निषु आहवनीयादि
षु कुर्वत ॥ गृहस्थस्य धर्मानाह ॥ ॥शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः ॥ प्रातःसंध्यामु
पासीत दन्तधावनपूर्विकां ॥ शरीरचिन्ता आवश्यकी दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मु
खदुसायुक्ते विधिना निर्वर्त्य गन्धलेपक्षयकरमित्युक्तविधिना कृतशौचविधिर्द्विजो दन्तधावने राम
पूर्विकां प्रातःसंध्यामुपासीत दन्तधावनविधिश्च कण्टकिक्षीरवृक्षोद्भवं द्वादशाङ्गुलसंमितं ॥
कनिष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्चकं ॥ दन्तधावनमुद्दिष्टं जिह्वोल्लेखनिकां तथा ॥
अत्र द्रष्टव्यः प्रतिपत्षष्ठ्यादिनिषेधः लोष्ठाङ्गुल्यादिनिषेधः । पालाशाश्वत्थादिनिषेधश्च स्मृत्यन्तरा
दवगन्तव्यः ॥ दन्तधावनमन्त्रश्च ॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ॥ ब्रह्म प्रज्ञां च मेधां च
त्वं नो देहि वनस्पते ॥ इति ब्रह्मचारिप्रकरणोक्तस्यापि संध्यावन्दनस्य पुनर्वचनं दन्तधावनपू
र्वत्वप्रतिपादनार्थं । दन्तधावनं च सपीतादि ब्रह्मचारी वर्जयेदिति निषेधात् ॥ हुत्वाग्नीन्सू
र्यदैवत्यान्जपेन्मन्त्रान्समाहितः ॥ वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च ॥ ॥प्रातःसं

ध्यावेदनानंतरं॰आहवनीयादीन्यथोक्तेन विधिनाहुत्वा॰औपासनाग्निं वा तदनंतरं सूर्य
देवस्तानेउदुत्यंजातवेदसमित्यादीन्मंत्राञ्जपसमाहितः॰प्रविविक्तचित्तः।तदनंतरं वेदा
र्थानिरुक्तव्याकरणादीदेश्रवणेनाधिगच्छेत्॥जानीयात्।चकारादधीतंचाभ्यसेत्।विवि
धानि च शास्त्राणि मीमांसाप्रभृतीनि धर्मार्थयोरत्यप्रतिपादकानि अधिगच्छेत्॥ ॥जा
नीयात्।चकारादधीतंचाभ्यसेत्।उपेयादीश्वरंचैव योगक्षेमार्थसिद्धये॥स्नात्वा देवान्
पितृंश्चैव तर्पयेदर्चयेत्तथा॥अनंतरंईश्वरं॰अभिषेकादिगुणयुक्तं॰अन्यं वा श्रीमंतं॰अकु
त्सितं।योगक्षेमार्थं॰अलब्धलाभो योगः लब्धपरिपालनं क्षेमः तदर्थमुपेयात् उपासीत॥
उपादिसनेन सेवां प्रतिषेधयति॰वेतनग्रहणेन॰आज्ञाकरणं सेवा॰तस्याश्च वर्तितेन
निषिद्धत्वात्।ततो मध्याह्ने स्नात्वादित्तेन विधिना नद्यादिषु स्नात्वा देवान्स्वगृह्योक्तान्पित
न्॰चकाराद्ऋषीश्च देवादितीर्थेन तर्पयेत्॥तदनंतरं गंधकुसुमाक्षतैः हरिं हरं हिरण्य
२८ गर्भं श्रुतीनां यथाचारं सनंतरं ऋग्यजुःसाममंत्रैः स्तस्त्रैकाशोनैः स्वनाममभिवाच्य तुभ्यं तेन नमस्का
रयुक्तैराराधयेत्।यथोक्तविधिना॥वेदाथर्वपुराणानि सेतिहासानि शक्तितः॥जपयज्ञ
सिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत्॥वेदाथर्वपुराणेतिहासादीनि समस्तानि वा॰अध्या
त्मिकीं च विद्यां जपयज्ञप्रसिद्ध्यर्थं यथोक्तविधिना यथाशक्ति जपेत्॥बलिकर्मस्वधाहोम
स्वाध्यायातिथिसत्क्रियाः॥भूतपितृमरब्रह्ममनुष्याणां महामखाः॥बलिकर्म भूतयज्ञः।
स्वधा पितृयज्ञः।होमो देवयज्ञः।स्वाध्यायो ब्रह्मयज्ञः।प्रतिथिसत्क्रिया मनुष्ययज्ञः।एते प

२१ च महायज्ञा अहरहः कर्त्तव्या नित्यत्वात्॥ यत्पुनरेषां फलश्रवणं तदेषां पावनत्वख्यापनार्थं
नकाम्यत्वप्रतिपादनाय॥ देवेभ्यश्च हुतादन्नाच्छेषात् भूतबलिं हरेत्॥ अन्नं भूमौ श्वचांडाल
वायसेभ्यो विनिक्षिपेत्॥ देवेभ्यः स्वगृह्योक्तविधिना वैश्वदेवहोमे कृते तच्छेषेणा
न्नेन भूतेभ्यो बलिं हरेत्। अन्नग्रहणं अपक्वव्युदासार्थं। तदनन्तरं यथाशक्ति भूमौ अन्नं श्व
चांडालवायसेभ्यो विनिक्षिपेत्। चकारात् कृमिपापरोगिपतितेभ्यः॥ यथाह मनुः॥ शुनां
च पतितानां च श्वपचां पापरोगिणां॥ वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवीति॥ त
च्च सायंप्रातः कर्त्तव्यं। अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्याश्वलायनस्मरणात्
॥इह केचिद्वैश्वदेवाख्यस्य कर्मणः पुरुषार्थत्वं अन्नसंस्कारकर्मत्वं चेच्छन्ति। अथ सायंप्रा राम
तः सिद्धस्य हविष्यस्य जुहुयादित्यन्नसंस्कारताप्रतीयते। यथा ततः पंचयज्ञानित्युपक्रम्य ता
नेतान्यज्ञानहरहः कुर्वीतेति नित्यत्वाभिधानात् पुरुषार्थत्वं चावगम्यते इति तदयुक्तं। पुरु
षार्थत्वे संस्कारकर्मत्वानुपपत्तेः॥ तथाहि। द्रव्यसंस्कारत्वपक्षे अन्नार्थता वैश्वदेवक
र्मणः॥ पुरुषार्थत्वे वैश्वदेवकर्मार्थता द्रव्यस्येति परस्परविरोधात्॥ अत्र॥ पुरुषार्थत्वमेव युक्तं
॥महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुरिति। तथा। वैश्वदेवे निवृत्ते तु यद्यन्योऽतिथिराव्र
जेत्॥ तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेदिति मनुस्मरणात्॥ पुरुषार्थत्वे वैश्व
देवाख्यं कर्म न प्रतिपाकमावर्त्तनीयं। तस्मादथ सायंप्रातरित्यादिना उत्पत्तिप्रयोगो २१

दर्शितौ। तानेतान्यथाकालमहरहः कुर्वीत। सधिकारविधिरिति सर्वमनवद्यं॥ ॥अन्नं
पितृमनुष्येभ्योऽदेयमप्यन्वहं जलं॥ स्वाध्यायं सततं कुर्यान्न पचेदन्नमात्मने॥ प्रसहः। अन्नं पितृभ्यो
मनुष्येभ्यश्च यथाशक्त्यादेयं। अन्नाभावे कंदमूलफलादि तस्याप्यभावे जलं देयं। अपि स्वा
ध्यायं सततं कुर्यादविस्मरणार्थं। अन्नग्रहणं सर्वफलादनीयद्रव्यप्रदर्शनार्थं। आत्मार्थमन्नं
पचेत् किं तर्हि देवताद्युद्देशेनैव॥ ॥बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः संभोज्याति
थिभृत्यांश्च दंपत्योः शेषभोजनं॥ परिणीता परगृहे स्थिता स्ववासिनीः शेषाः प्रसिद्धाः। बाला
दीनतिथिभृत्यांश्च संभोज्य भोजयित्वा दंपत्योः शेषभोजनं कर्तव्यं॥ ॥अपोशानेनोपरिष्टा
दधस्ताच्चाश्नता तथा॥ अनग्नममृतं चैव कार्यमन्नं द्विजन्मना॥ भुंजानेन द्विजन्मना उपरिष्टा
च्चाधस्ताच्च अपोशानाख्येन कर्मणा। अनग्नमनग्नममृतं च कार्यं। द्विजग्रहणमुपनयनप्रभृति
सर्वाश्रमसाधारणार्थं॥ ॥अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः॥ अप्रणोद्योऽतिथिः सा
यमपि वा भूतृणोदकैः॥ वैश्वदेवानंतरं वर्णानां ब्राह्मणादीनामतिथित्वेन युगपत्प्राप्तानां
ब्राह्मणानुपूर्व्येण यथाशक्ति देयं। सायंकालेऽपि यदि अतिथिरागच्छति तदा सः अप्रणोद्यः। अ
प्रसारणीय एव। पद्यप्रदनीयं किमपि नास्ति तथापि वा भूतृणोदकैरपि सत्कारं कुर्यात्
॥सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च॥ भोजयेच्चागतान्काले सखिसंबंधिबांध
वान्॥ भिक्षवे भिक्षा सामान्येन दातव्या। सुव्रताय ब्रह्मचारिणे यतये च सत्कृत्य स्वस्तिवा
च्य भिक्षादानं। पूर्वं वैश्वदेवेन विधिना भिक्षा दातव्या॥ भिक्षा च ग्रासप्रमिता मात्रा
भवेद्भिक्षा पुष्कलं चैव तु गुणं। हंतास्ति चतुर्भिः स्यादग्रं तत्त्रिगुणं भवेदिति शातात

२२ पसरस्यात्॥ भोजनकाले चागतानामसंबंधिनां धनिनां॥ भोजयेत् सखामित्रं संबंधिनो यथाम्यःके
माप्रस्तापहीतवा॥ मातापितृसंबंधिवा॥ महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्॥ सत्क्रि
यान्वासनं स्वादु भोजनं सूनृतं वचः॥ महान्तमुक्षाणं घोरे यं महाजं वा श्रोत्रियाय उक्तलक्षणमुप
पकल्पयेत्॥ भवदर्थमयमस्माभिः परिकल्पित इति। तत्प्रीत्यर्थं न तु दानाय व्यापाद
नाय वा॥ यथा सर्वमेतन्न तु भवदीयमिति॥ प्रति श्रोत्रियमुक्षासंभवात्- अस्वर्ग्यं लोकविद्विष्टं
धर्ममप्याचरेन्न तु इति निषेधात्। तस्मात्सत्क्रिया पाद्यादिकं कर्तव्या॥ सत्क्रिया स्वागतवचना
सनपाद्यार्घ्याचमनादिदानं। तस्मिन्नुपविष्टे पश्चादुपवेशनमन्वासनं स्वादु भोजनं मृष्टान्नं॥ सू
नृतं च बोधयन्त्या वयमद्य भवदागमनेन धन्याः स्मः इति श्रोत्रिये। पुनरश्रोत्रियस्यासनादिकं सत्कृतिगौत
मोक्तं वेदितव्यं॥ प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः। प्रियो वैवाहिकश्चैव तथा यज्ञे प्रति ऋत्वि
जं पुनः॥ स्नातको विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति- आचार्य उक्तलक्षणः॥ पार्थिवौ व्या
ख्यातलक्षणौ॥ प्रियो मित्रं- वैवाह्यो जामाता- चकारात् श्वशुरपितृव्यमातुलानां ग्रहणं। ऋत्विजो व्या राम
लामधुपर्कमाहरेत् स्नातकाचार्यपार्थिवप्रियवैवाह्यश्वशुरपितृव्यमातुलानां चैषां स्वगृहमुपगतानां प्रतिसं
वत्सरं मधुपर्कमाहरेत् स्नातकायोपस्थिताय राज्ञे चाचार्यश्वशुरपितृव्यमातुलानां च इत्याश्वलायनस्म
रणात्। एते स्नातकादयः प्रतिसंवत्सरं गृहमागताः अर्घ्या मधुपर्केण संपूज्या वेदितव्याः॥ अर्घ्यश
ब्दो मधुपर्कलक्षणपूजावचनः। ऋत्विज उक्तलक्षणाः संवत्सरादर्वागपि मधुपर्केण संपूज्याः॥ अध्वनीनो
ऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः॥ मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः॥ अध्वनि वर्तमानः
अतिथिर्वेदितव्यः। श्रोत्रियो वेदपारगः। अध्वनि वर्तमानो ब्रह्मलोकमभीप्सतो गृहस्थस्य मान्यौ॥ अ
प्रतिग्राह्यौ वेदितव्यः॥ श्रोत्रियो वेदपारगः॥ परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते॥ वाक्पाणिपादचापल्यं वर्जये
धनसमो वेदपारगः॥ परपाकरुचिर्न स्यात् अनिंद्यामंत्रणादृते॥ अनिंद्यामंत्रणं विना॥ अ २२
वाति भोजनं॥ परपाके सचिर्यस्यासौ न पाकः नैव परपाकरुचिः स्यात्॥ अनिंद्यामंत्रणं विना॥ अ

निषेधेनामंत्रितो नापक्रमेदित्तस्मरणात्‌ । वाक्पादपाणिचापलं । मनुः चापाणी चपादौ च वाक्पाणि
पादत्तस्य चापल्यं वर्जयेत्‌ । वाक्चापल्यं ऽसभ्यानृताभिभाषणं पाणिचापल्यं कलातास्याटनादि । पाणि
चापल्यं लघुनोल्लंघनादि । चकारान्नेत्रादिचापल्यं वर्जयेच्च । नहि श्रोद्दश्यपाणिपादश्च सुवांक्चापं
ल्यानि कुर्यान्‌ ॥ इति गौतमस्मरणात्‌ । अतिभोजनं वर्जयेत्‌ । अनारोग्यादिहेतुत्वात्‌ ॥ ॥ अतिथिं श्रो
त्रियं तृप्तमासीमांतं दनुव्रजेत्‌ ॥ अहन्यो शेषं सहासीत शिष्टैरिष्टैश्च बंधुभिः ॥ पूर्वोक्तं श्रोत्रियं वेदपार
गातिथिं च भोजनादिना तृप्तमासीमांतं यावदनुव्रजेत्‌ ॥ ततो भोजनानंतरं ऽहः शेषं शिष्टैरितिहासपु
राणादिवेदिभिः । इष्टैश्च काव्यकौर्यावरंपंच चतुरैर्बंधुभिश्च ऽनुकूलालापकुशलैः सह ऽासी
त ॥ ॥ उपास्य पश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च ॥ भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत्‌
॥ ततः पूर्वोक्तेन विधिना पश्चिमां संध्यामुपास्य ऽग्नीन्‌ ऽग्निहोत्रं हुत्वा तानुपस्थाय भृत्यैः पूर्वोक्तैर्बाल
स्ववासिन्यादिभिः परिवृतो नातितृप्त्या भुक्त्वा चक्रायत्‌ ऽप्यथाविधिवत्तेन निवेशनं ऽनंतरं संविश
त् ॥ ॥ ब्राह्मे मुहूर्ते चोत्थाय चिंतयेदात्मनो हितं । धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत्‌ ॥ ता
तो ब्राह्मे मुहूर्ते उत्थाय पश्चिमाधर्मप्रहरे प्रबुद्ध आत्मनो हितं तत्तत्करिष्यमाणं चेदार्थसंशयं यावत्
येत्‌ । तदा चित्तस्य ऽव्याकुलत्वेन तत्प्रतिभासयोग्यत्वात्‌ । ततो धर्मार्थकामान्स्वोचिते काले यथाश
क्ति न परित्यजेत्‌ । यथा संभवं सेवेत सर्वः । पुरुषार्थत्वात्‌ ॥ यथाह गौतमः । न पूर्वाह्णमध्यंदिनापराह्णा
न्‌ अफलान्कुर्यात्‌ । धर्मार्थकामेभ्यस्तेषु धर्मोत्तरः स्यादिति । अत्र यद्यप्येतेषां सामान्येन सेवनं

मुक्तं तथापि कामार्थयोर्धर्माविरोधेनानुष्ठानं तयोर्धर्ममूलत्वात् एवं प्रतिदिनमनुष्ठानं॥ विद्याकर्मवयो
बंधुवित्तैर्मान्या यथाक्रमं॥ एतैः शूद्रोपि वार्धके मानमर्हति॥ विद्या पूर्वोक्ता· कर्म श्रौतं स्मार्तं च। वयः
आत्मनोतिरिक्तं· सप्तसप्तत्याऊर्ध्वं· बंधुर्बद्धः स्वजनसंपत्तिः वित्तं ग्रामरत्नादिकं। एतैर्युक्ताः क्रमेण
मान्याः पूजनीयाः एतैः कर्मबंधुवित्तैः प्रभूतैः प्र९० स्थैः समस्तैर्व्यस्तैर्वा युक्तः शूद्रोपि वार्धके अ
शीतेरूर्ध्वं मानमर्हति॥ शूद्रोप्यशीतिकोवर इति गौतमस्मरणात्॥ वृद्धभारिनृपस्नातास्त्री
रोगीवरचक्रिणां॥ पंथा देयो नृपस्तेषां मान्यः स्नातकश्च भूपतेः॥ ॥वृद्ध प्रसिद्धः। भारी भा
राक्रांतः नृपो भूपतिः न क्षत्रियमात्रः। स्नातो विद्याव्रतोभयस्नातः। स्त्री प्रसिद्धा· रोगी व्याधि
तः। वरो विवाहोद्यतः। चक्री शाकटिकः। चकारान्मत्तोन्मत्तादीनां ग्रहणं। बालवृद्धमत्तोन्मत्तो शाम
।पहतदेहभाराक्रांतस्त्रीस्नातकप्रव्रजितेभ्यश्चेति शंखस्मरणात्। एतेभ्यः पंथा देयः। एतेषु
अभिमुखायातेषु स्वयं पथोपक्रमेत्। वृद्धादीनां राज्ञा सह पथिसमवाये राजा मान्यः इतिते-
षां पंथा देयः। तेषु। भूपतेरपि स्नातको मान्यः। स्नातकग्रहणं स्नातकमात्रं त्रास्पर्धं। न ब्राह्म
णाभिप्रायेण। तस्य सदैव गुरुत्वात्। यथाह शंखः॥ अथ ब्राह्मणाय पंथा राज्ञे ईस्से के न त्वा
तिष्ठं गुरुं ज्येष्ठं च ब्राह्मणो राजानमतिशेते तस्मै पंथा इति॥ वृद्धादीनामपि परस्परसमवा
ये वृद्धतरायैव पंथा विद्यादिभिर्वा विशेषाद्वह्यः॥ इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य
च॥ प्रतिग्रहोधिको विप्रे याजनाध्यापने तथा॥ वैश्यस्य क्षत्रियस्य· चकारात् ब्राह्मणस्यापि

जानुलोम्यानां चतुर्णामध्ययनदानानि साधारणानि कर्माणि ब्राह्मणस्याधिकाः प्रतिग्रहयाजना
ध्यापनानि। तथैतेषामन्तरेण वक्ष्यमाणं वृत्त्युपसंग्रहः। यथाह गौतमः। कृषिवाणिज्ये चास्वयंकृते कुसीदं
चेति। अध्यापने तु क्षत्रियवैश्ययोर्ब्राह्मणं प्रति तयोर्भवति। न स्वेच्छया। आपत्काले ब्राह्मणस्य ब्रा
ह्मणात्त्रिविधोपयोगो ऽनुमतो। गुरुशुश्रूषा च। समाप्तो ब्राह्मणो गुरुरिति गौतमस्मरणात्॥ एतत्तान्य
नापदि ब्राह्मणस्य षट्कर्माणि। त्रीणि इज्यादीनि धर्मार्थानि। प्रतिग्रहादीनि रक्षार्थानि॥ षण्णां तु
कर्मणामस्य त्रीणि कर्माणि जीविका॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति मनुस्मर
णात्॥ अत इज्यादीन्यवश्यं कर्तव्यानि। न प्रतिग्रहादीनि। द्विजातीनामध्ययनमिज्या दानं। ब्रा
ह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः। पूर्वेषु नियमस्त्विति गौतमस्मरणात्॥ प्राधान्यं क्ष
त्रियकर्म प्राणिनां परिपालनं कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतं॥ प्रधानं क्षत्रियस्य
प्रजानां पालनं प्रधानं। कर्म धर्मार्थं च रक्षार्थं च। वैश्यस्य कुसीदकृषिवाणिज्यपशुपालनानि
रक्षार्थानि कर्माणि। कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः। लाभार्थं क्रयविक्रयौ वाणिज्यं। शेषं प्रसि
द्धं॥ शस्त्रास्त्रभृत्त्वं क्षत्रियस्य। वणिक्पशुकृषिर्विशः। आजीवनार्थं॥ धर्मस्तु दानमध्ययनं
यजिरिति मनुस्मरणात्। शूद्रस्य द्विजशुश्रूषा तयाजीवन् वणिक् भवेत्॥ शिल्पैर्वा विविधैर्जीवे
त् द्विजातिहितमाचरन्॥ शूद्रस्य द्विजशुश्रूषा प्रधानं कर्म धर्मार्थं रक्षार्थं च। ब्राह्मणशुश्रूषा
परमो धर्मः। विप्रसेवैव शूद्रस्य प्रधानं कर्म कीर्त्यत इति मनुस्मरणात्॥

२४ यदा तु द्विजशुश्रूषया जीवितुं न शक्नोति तदा वणिक्कर स्याजीवेत् । नानाविधैर्वा शिल्पैः द्विजाती-
नां हितं कुर्वन् । यादृशैः कर्मभिर्द्विजातिशुश्रूषायामयोग्यो न भवति तादृशानि कुर्वीतेत्यर्थः ॥ तानि
च देवलेनोक्तानि । शूद्रधर्मो द्विजातिशुश्रूषा पापवर्जनं कलत्रादिपोषणं कर्षणपशुपालनभारोद्व-
हनपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामुरजमृदङ्गवादनानीति ॥ किंच । भार्यारतिः शुचि-
र्भृत्यभर्ता श्राद्धक्रियापरः । नमस्कारेण मंत्रेण पंच यज्ञान्न हापयेत् ॥ भार्यायामेव न साधारण
स्त्रीषु परस्त्रीषु वा रतिरभिगमनं यस्य स तथोक्तः । शुचिर्बाह्याभ्यन्तरशौचयुक्तः ॥ भृत्यानां
भर्ता । श्राद्धानि नित्यनैमित्तिकानि । काम्यानि । स्वपत्नीकर्तृकान्यपि रूढानि । तेषु र-
तः । नमः इत्यनेन मंत्रेण पूर्वोक्तान् पंच महायज्ञान् प्रत्यहं न हापयेत् अनुतिष्ठेत् ॥ नमस्का-
रमंत्रं च केचित् देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव
नमो नम इति वर्णयन्ति ॥ नमः स्मृत्ये । तत्र वैश्वदेवे लौकिकेऽग्नौ कर्तव्यः । वैवाहिकेऽग्नौ त्वाचा-
र्याः ॥ ॥ इदानीं साधारणधर्मानाह ॥ ॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः ॥
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनं ॥ अस्तेयमदत्तानुपादानं । शौचं बाह्याभ्यन्तरं च शुद्धिक-
मेंद्रियाणां नियतविषयवर्तित्वं ॥ इंद्रियनिग्रहः । यथाशक्ति प्राणिनामन्नोदकादिदानेन आर्तसं-
पहारो दानं । अंतःकरणसंयमो दमः । आपद्गतरक्षणं दया । अपकारेऽपि चित्तस्याविकारः
क्षान्तिः ॥ एते सर्वेषामेव ब्राह्मणाद्याचंडालानां धर्मसाधनं ॥ ॥ वयोबुद्ध्यर्थवाग्वेषश्रु-

ताभिजनकर्मणां ।। आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा ।। वयोवस्थायौवनादि । बुद्धिर्नैसर्गिकी
लौकिकवैदिककर्मव्यवहारेषु ।। अर्थो वित्तं गृहक्षेत्रादि । वाक् उच्चवचनं चेष्टा । वस्त्रमाल्यादिविन्यासः । श्रुतं
पुरुषार्थशास्त्रश्रवणं । अभिजनः कुलं । कर्म श्रौतस्मार्तप्रतिग्रहादि ।। एतेषां वयः प्रभृतीनां सदृ
शीमनुचितां वृत्तिं आचरेत् । स्वीकुर्यात् । यथा वृद्धः स्वोचितां न यौवनोचितां । एवं धनादिष्वपि योज्यं । अ
जिह्मामवक्रां अशठाममत्सरं ।। एवं स्मार्तानि कर्माण्युक्त्वा इदानीं श्रौतानि [illegible] एतान्यनु
क्रामति ।। ।। त्रैवार्षिकाद्यधिकान्नो यः स हि सोमं पिबेत् द्विजः । प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वा
र्षिकं भवेत् ।। त्रिवर्षजीवनपर्याप्तं त्रैवार्षिकं । अधिकं वा अन्नं यस्य स एव सोमं पिबेत् यागं कुर्यात् ।
नात्तोल्पधनैः ।। अतः स्वल्पोपसिद्धो यः सोमं पिबति द्विजः ।। स पीतसोमपूर्वोपि तस्य नाप्नोति तत्फलं
इति दोषश्रवणात् । एतच्च काम्याभिप्रायेण । नित्यस्य त्वावश्यकर्तव्यत्वान्न नियमः ।। यस्य वर्षजीवनप
र्याप्तमन्नं भवति स प्राक्सौमिकीः सोमयागात्प्राक् प्राक्सोमं प्राक्सोमं भवाः प्राक्सौमिक्यः । स काम्या
अग्निहोत्रदर्शपूर्णमासपशुचातुर्मास्यानि काम्यानि तद्विकाराश्च ताः क्रियाः कुर्यात् ।। एवं काम्या
निश्रौतानि कर्माण्यभिधायेदानीं नित्यान्याह ।। ।। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा ।।
कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ।। संवत्सरे सोमयागः कार्यः पशुः प्रत्ययनं अयनमयनं
प्रति । अयने दक्षिणोत्तरसंज्ञिते निरूढपशुयागः कर्तव्यः । तथा प्रतिसंवत्सरं । संवत्सरे संवत्सरे पशु
ना यजेत । षट्सु षट्सु वा मासेष्विति एके इति श्रवणात् ।। आग्रयणेष्टिश्च सस्योत्पत्तौ कर्तव्या ।। चातुर्मा

२५ स्यानित्यप्रसंवत्सरं कर्त्तव्यानि॥ एवमसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः॥ ॥एषां सोमादीनां पूर्वोक्ता
नां नित्यानां कथंचिदसंभवे तत्काले वैश्वानरीमिष्टिं कुर्यात्॥ किंच॥ हीनकल्पं न कुर्वीत सति द्रव्ये
फलप्रदं॥ ॥योयं हीनः कल्प उक्तः सति द्रव्ये असौ न कर्त्तव्यः। यच्च फलप्रदं काम्यं कर्म तत् हीनकल्पे
न कर्त्तव्यं॥ ॥चांडालो जायते यज्ञकरणाच्छूद्रभिक्षितात्॥ यज्ञार्थं लब्धमददद्भासः काकोपि वा भ
वेत्॥ यज्ञार्थं शूद्रधनयाचनेन जन्मांतरे चांडालो जायते। यः पुनः यज्ञार्थं याचित्वा न सर्वं परित्यजति स
भासः काको वा भवेत्॥ वर्षशतं। यथाह मनुः। यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति॥ स या
ति भासतां विप्रः काकतां वा शतं समाः॥ भासः शकुन्तः काकः प्रसिद्धः॥ कुसूलकुंभीधान्यो वा त्र्यहि
को श्वस्तनोपि वा॥ ॥कुसूलं कोष्ठकं कुंभी उष्ट्रिका। कुसूलं च कुंभी च कुसूलकुंभ्यौ ताभ्यां परिमितं श्यम
धान्यं यस्य स तथोक्तः कुसूलधान्यः स्यात् कुंभीधान्यो वा। अत्र स्वकुटुंबपोषण द्वादशाहमात्र
पर्याप्तधान्यः कुसूलधान्यः। कुंभीधान्यस्तु स्वकुटुंबपोषणषडहमात्रपर्याप्तधान्यः। त्र्यह
पर्याप्तं धान्यमस्यास्तीति त्र्यहिकः॥ श्वो भवं धान्यादि श्वस्तनं। न विद्यते श्वस्तनं यस्य स तथोक्तः कु
सूलधान्यादिसंग्रहोपायमाह॥ ॥जीवेद्वापि शिलोंछेन श्रेयानेषां परः परः॥ शाल्यादेर्निपति
तपरित्यक्तवल्लरीग्रहणं शिलं। एकैकस्य सस्यकणस्योपादानमुंछः। शिलेन च उंछेन वा शिलों
छेन वा। कुसूलधान्यादिश्चतुर्विधो गृहस्थो जीवेत्॥ एतेषां कुसूलधान्यादीनां गृहस्थानां
ब्राह्मणादीनां चतुर्णां परः परः पश्चात्पश्चात्पठितः श्रेयान् प्रशस्यतरः॥ एनस्तु मत्यपि द्विजः

प्रकृतः तथापि ब्राह्मणस्यैव भवितुमर्हन्ति विघोपशमनादियोगात्। तथा च मनुः। अद्रोहेणैव भूताना
मल्पद्रोहेण वा पुनः। या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदीति॥ विप्रमेव प्रस्तुत्य कुसूलधान्यको
वा स्यात्कुंभीधान्यक एव वा स्यादिसमिहितत्वात्। एतच्च प्रतिसंपन्नयायावरं प्रस्तुचन्नोनसामा
न्यविप्राभिप्रायेण। तथा सति त्रैवार्षिकाधिकान्नीयः स हि सोमं पिबेदिति। [illegible]
द्विजस्यानेन विरोधः। तथा च गृहस्थानां द्वैविध्यं तत्रैवोक्तं। यथाह देवलः। द्विविधो गृहस्थो
यायावरः शालीनश्च तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहरिक्थसंचयवर्जनात्। षट्
कर्माधिष्ठितः प्रेष्यचतुष्पदगृहग्रामधनधान्ययुक्तो लोकानुवर्ती शालीन इति॥ शालीनो
ऽपि चतुर्विधः याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपशुपाल्यैः षड्भिर्जीवत्येको याजनादिभि
स्त्रिभिरन्यो याजनाध्यापनाभ्यामपरः। चतुर्थस्त्वध्यापनेनैवेति। तथा च मनुः। षट्कर्मै
को भवत्येषां त्रिभिरन्यः प्रवर्तते॥ द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवतीति॥ अत्र च प्रति
ग्रहोऽधिको विप्रस्य हीनाच्छालीनस्य वृत्त्या प्रदर्शिताः॥ यायावरस्य जीवे दापि शिलोंछ
नेति॥ ॥इति गृहस्थधर्मप्रकरणं॥ ॥एवं श्रौतस्मार्तानि कर्माणि गृहस्थस्याभिधायेदा
नीं स्नातकादाराश्रमब्राह्मणस्यावश्यकर्तव्यानि विधिप्रतिषेधात्मकानि सकलरूपाणि
स्नानानन्तरं प्राग्विवाहाच्च स्नातकव्रतान्याह॥ ॥नित्यं स्वाध्यायविरोध्यर्थमीहे
तेन यतस्ततः॥ न विरुद्धप्रसंगेन संतोषी च भवेत्सदा॥ ब्राह्मणस्य प्रतिग्रहादयोऽर्थप्रास्तु

२६ पापादर्शिता: तत्रविशेषमनुच्यते। स्वाध्यायविरोधिनमर्थं प्रतिषिद्धमपिनेहेत्तनान्विछेत्॥
नयत्नस्तत: कुतश्चिदविदिताचारात्। नविरुद्धप्रसंगेन॥ विरुद्धमयाज्ययाजनादि। प्रसंगोगीता
दि: विरुद्धं चप्रसंगश्च विरुद्धप्रसंगं। तेनेनार्थमीहेतेति संबध्यते। नस्मावृत्तिः प्रसंगेकपर्युदासा
र्थ:। सर्वत्राप्यस्मिन्नकरणेनस्नातक: पर्युदासाधएव॥ अर्थालाभेपिसंतोषीपरितृप्तोभवेत्
॥चकारात्संपन्नश्च। संतोषंपरमास्थायसुखार्थीसंयतोभवेदित्यनुस्मरणात्॥ कुतस्त
र्हिधनमिछेदित्याह॥ ॥राजांतेवासियाज्येभ्य:सीदन्निछेद्धनंक्षुधा॥ दंभिहैतुकपाखंडिब
कवृत्तीश्चवर्जयेत्॥ क्षुधासीदन्नुपीड्यमान: राज्ञाविदितवृत्तांतात्॥ अंतेवासिनोवक्ष्यमा
लक्षणात्॥ याज्याद्वाजनार्हात्तधनमाददीत क्षुधासीदन्नित्यनेनाविभागादिप्रास शम
कुटुंबपोषणपर्याप्तधनोभ[illegible]तनकुतश्चिदर्थमान्विछेदितिगम्यते॥ किं
च॰ दंभिहेतुकादीन्सर्वकार्येषुलौकिकशास्त्रीयेषुवर्जयेत्॥ चकारात्॥ विकर्मस्थावै
डालव्रतिकान्शठान्॥ यथाहमनु:॥ पाखंडिनोविकर्मस्थान्वैडालव्रतिकान्शठान्॥
हैतुकान्बकवृत्तींश्चवाङ्मात्रेणापिनार्चयेदिति॥ लोकरंजनार्थमेवकर्मानुष्ठायीदंभी।
युक्तिबलेनसर्वत्रसंशयकारीहैतुक: त्रैविद्यविद्याऽपिशिरोहीनाश्रमिण: पाखंडिन:। बकवदसद्वर्तननि
तिबकवृत्ति:॥ यथाहमनु:॥ अधोदृष्टिर्नैनिकृतिनिष्ठुरतात्पर्यचरति:। तिक: स्वार्थसाधनतत्पर:। श
ठोमिथ्याविनीतश्चबकवृत्तिचरोद्विज: इतिप्रतिषिद्धसेविनोविकर्मस्था:। बिडालोमार्जार: तस्यस्वभा

वोन्नं यस्यासौ वैडालव्रतिकः ॥ धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदंभकः । वैडालव्रतिको ज्ञेयो हिं-
स्रः सर्वाभिसंधकः इति स्मरणात् ॥ शठः सर्वत्र वक्रः ॥ एतैः संसर्गनिषेधादनेन स्वयमेवंविधो न भवेदिति
गम्यते ॥ किंच । शुक्लांबरधरो नीचकेशश्मश्रुनखः शुचिः ॥ न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थि-
तः ॥ ॥ शुक्लं प्रवरं वाससी धारयतीति स शुक्लांबरधरः ॥ केशाश्च श्मश्रूणि च नखाश्च केशश्मश्रुन-
खं ॥ नीचं कृत्तं केशश्मश्रुनखं यस्यासौ तथोक्तः ॥ शुचिरंतर्बहिश्च स्नानानुलेपनधूपस्रगादिभिः सुगंधी
भवेत् ॥ यथाह गौतमः ॥ स्नानको नित्यं शुचिः सुगंधस्नानशीलः स्यादिति ॥ सुगंधत्वविधानादेवानिर्गंधमात्र-
स्य निषेधः ॥ तथा च देवलः ॥ नागंधां धारयेत्स्रजं ॥ अन्यत्र हिरण्यरत्नस्रज इति ॥ सदा स्नानके एवंविधो
भवेत् ॥ एतच्च विभवे सति ॥ न जीर्णमलवद्वासा भवेच्च विभवे सतीति स्मरणात् ॥ साधारणानपि धर्मानाह ॥ भा-
र्यादर्शने तस्याः पुरोवस्थितायामश्नीयात् ॥ अवीर्यवदपत्योऽस्य स्यादिति ॥ न खात् ॥ तथा च श्रुतिः ॥ जायाया अ-
न्ते नाश्नीयादवीर्यवदपत्यं भवतीति ॥ अतः स्त्रिया सहभोजनं दूरादेव निरस्तं ॥ नैकवासा नापि संस्थितः
उत्थितः अश्नीयादिति संबध्यते ॥ ॥ किंच । न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् ॥ नाहितं नानृतं
चैव न स्तेनः स्यान्न वार्धुषी ॥ कदाचिदपि संशयं प्राणविपत्तिसंशयावहं कर्म न प्रपद्येत न कुर्यात् ॥ य-
था व्याघ्रचौराग्निकूपोल्लंघनाप्सुप्लवनदेशाक्रमणादि ॥ अकस्मान्निःकारणं किंचिदपि परुषमप्रिय-
मुद्वेगकरं वाक्यं न वदेत् ॥ न चाहितमनृतं वाप्रियमपि ॥ चकारादसभ्यबीभत्साकरं च ॥ अकस्मान्न
वदेदिति संबध्यते ॥ एतच्च परिहासादिव्यतिरेकेण ॥ गुरुणापि समं हास्यं कर्तव्यं कुटिलं विनेति स्म-
रणात् ॥ न च स्तेनः अन्यदीयादत्तस्य ग्रहीता न स्यात् ॥ न वार्धुषी स्यात् ॥ प्रतिषिद्धवृद्ध्युपजीवी वा

२७ धृष्टी।किंच-दाक्षायणीब्रह्मसूत्रीवेणुमान्सकमंडलुः॥कुर्यात्प्रदक्षिणंदेवमृद्गोविप्रवनस्पतीन्॥दाक्षा
यणंसुवर्णंतद्वान्दाक्षायणी।ब्रह्मसूत्रंयज्ञोपवीतंतदस्यास्तीतिब्रह्मसूत्री।वेणुर्यष्टिमान्॥कमंड
लुमान्स्यादितिसर्वत्रसंबध्यते॥अत्रचब्रह्मचारिप्रकरणेऽस्यापियज्ञोपवीतस्यपुनर्वचनंद्वि
तीयप्राप्त्यर्थं॥यथाहवसिष्ठः।स्नातकानांद्वितीयंस्याद्वासस्तथोत्तरं।यज्ञोपवीतेद्वेयष्टिः
सोदकंचकमंडलुमिति॥अत्रचदाक्षायणीतिसामान्याभिधानेपिकुंडलधारणमेवकार्यं॥वै
णवींधारयेद्यष्टिंसोदकंचकमंडलुं॥यज्ञोपवीतेवेदर्भमुष्टिःचशुभेरौक्मेचकुंडलेइतिमनु
स्मरणात्॥तथादेवंदेवतार्चां।मृदंउद्धृतां।गां।विप्रं।वनस्पतिमश्वत्थादिंप्रदक्षिणीकुर्यात्
एतान्दक्षिणतःकृत्वाव्रजेत्।एवंचतुष्पथादीनपि।मृद्गांदैवतंविप्रंघृतंमधुचतुष्पथं।प्र राम
दक्षिणानिकुर्वीतप्रज्ञातांश्चवनस्पतीनितिमनुस्मरणात्॥नतुमेहेन्नदीछायावर्त्मगोष्ठांबु
भस्मसु।नप्रत्यग्न्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्मनः॥नद्यादिषुनमेहेत्मूत्रपुरीषोत्सर्गंनकु
र्यात्॥एवंश्मशानादावपि॥यथाहशंखः।नगोमयसस्यक्षेत्रशाद्वलचितिश्मशानखलभस्मप
र्वतपुलिनेषुमेहेत।भूताधारत्वादिति।यथाअग्न्यादीन्प्रति-अग्न्यादीनामभिमुखंनमेहेत।ना
प्यत्तान्पश्यन्-यथाहगौतमः।नवाय्वग्निविप्रादित्यापोदेवतागाश्चप्रतिपश्यन्वामूत्रपुरीषा
मेध्यान्युदस्येत्।नैतान्प्रतिपादौप्रसारयेदिति।एतद्व्यतिरेकेण-भूमिमयज्ञियैस्तृ
णैरंतर्धायमूत्रपुरीषेकुर्यादिति॥ ॥नेक्षेतार्कंननग्नांस्त्रींनचसंसृष्टमैथुनां॥नचमूत्रंपुरी २७

बेवानाशुचीराहुतारकाः॥ नेक्षेतार्कमीक्षेत। यद्यप्यत्र सामान्येनोक्तं तथाप्युदयास्तमयराहुग्रा
सोदके प्रतिबिंबं मध्याह्नवर्तिनमेवग्राह्यं दिसस्यालक्षणं निषिध्यते। न सर्वदा। यथोक्तं मनुना। ने
क्षेतो~~नग्नाम्पो स्त्रीन्नचसंसृष्टमैथुनांभिनेमूत्रपुरीषेचनाम्नुचोस्त~~ द्यन्तमादित्यं नास्तं यान्तं कदा
चन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतमिति॥ उपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत॥ अन्यत्र मै
थुनादिसाम्वलायनः॥ संसृष्टमैथुनां रुत्तोपभोगां॥ उपभोगं तेन म्नामपि नेक्षेत। चकारा
त् भोजनादिकमाचरंतीं। तथा च मनुः। नाश्नीयाद्भार्यया सार्धं नैनामीक्षेत चाश्नतीं॥ क्षुवंतीं
जृंभमाणां वा न चासीनां यथासुखं। नांजयंतीं स्वके नेत्रे न चाभ्यक्तामनावृतां। न पश्येत्प्रस
वंतीं च तेजस्कामो द्विजोत्तम इति स्मरणात्। मूत्रपुरीषे च न पश्येत्। तथा च स्मृतिः। सराहु
तारकाश्च न पश्येत्। चकारादुदके स्वप्रतिबिंबं। न चोदके निरीक्षेत स्वरूपमिति धारणोक्ति
वचनात्॥ अथ येमे वज्र इत्येनं सर्वं मंत्रमुदीरयेत्॥ वर्षे च प्रावृतो गच्छेत् स्वपेत् सकृ शिरा न च
वर्षति सति अथ येमे वज्रः पाप्मानमपहन्त्विति ममुच्चारयेत्॥ अप्रावृतो ऽनाच्छादितो गच्छेन्न धा
वेत्। न धावेच्च वर्षतीति निषेधात्॥ न च प्रसकृ शिराः स्वप्यात्। चकारान्नग्नो न शयीत। ए
कश्च शून्यगेहे न च नग्नः शयीतेति। नैकः स्वप्याच्छून्यगेहे इति च मनुस्मरणात्॥ ष्ठीवनास्
कृताऽसृङ्मूत्ररेतांस्यप्सु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ नान्येन मत्ति। धूलेन सेवेत्॥ ष्ठीवनमु
त्तीरणं असृक् रक्तं। शकृत् पुरीषं। शेषं प्रसिद्धं· एतानि अप्सु न निक्षिपेत्। एवं तुषादीन्

२८ पि। यथाह शंखः। तुषकेशशर्कराभस्मास्थिश्लेष्मनखलोमानि अप्सु न निक्षिपेदिति। न पादेन
न पाणिना वा जलमभिहन्यादिति। अग्नौ च पादौ न प्रतापयेदिति। नाप्यभिलंघयेत्। चकारात्
ष्ठीवनादीन्यग्नौ न निक्षिपेत्। मुखेनोपधमनादि च अग्नेर्न कुर्यादिति॥ तथा च मनुः। अग्निं मुखे
नोपधमेन्नग्नां नेक्षेत च स्त्रियम्। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्॥ अधस्तान्नोप
दध्याच्च न चैनमभिलंघयेत्। न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेदिति॥ ॥जलं पिबे
न्नांजलिना न शयानं प्रबोधयेत्। नाक्षैः क्रीडेन्न धर्मघ्नैः व्याधितैर्वा न संविशेत्॥ जलमं
जलिना संहताभ्यां पाणिभ्यां न पिबेत्। जलग्रहणं पेयमात्रोपलक्षणं॥ विद्यादिभिरात्मनो
धिकं शयानं न प्रबोधयेत्॥ नोत्थापयेत्। श्रेयांसं न प्रबोधयेदिति विशेषणात्॥ अक्षादिभि दाम
र्न क्रीडेत्। धर्मघ्नैः पशुलंघनादिभिः कर्मभिः न क्रीडेत्। व्याधितैर्ज्वरादिभिर्भूतैरेकत्र
न संविशेत्॥ न शयीत विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरं। केशभस्मतुषांगारकपालेषु
च संस्थितिं॥ जनपदग्रामकुलाचारविरुद्धं कर्म वर्जयेत्। प्रेतधूमं बाहुभ्यां नदीतरणं च
वर्जयेत्॥ केशादिषु च संस्थितिं वर्जयेत्॥ चकारादस्थिकार्पासामेध्यादिषु च॥ ॥नाचक्षीत
धयंतीं गां नाद्वारेण विशेत्क्वचित्॥ न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः॥ परस्य क्षी
रादि पिबंतीं गां परस्मै नाचक्षीत॥ न च निवर्तयेत्॥ अद्वारेण कापथेन क्वचिदपि नगरे ग्रामे २८

मंदिरे वा न प्रविशेत् ॥ न चक्रपाणस्य शास्त्रातिक्रमकारिणो राज्ञः सकाशात्प्रतिग्रहणीयात् ॥ ॥
प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः ॥ दुष्टा दशगुणं पूर्वात्पूर्वादेते यथोत्तरं ॥ ॥प्रतिग्रहे साध्ये
सूत्याद्येः पंच पूर्वस्मात्सरः परो दशगुणं दुष्टः ॥ सूना प्राणिहिंसा यस्यास्तीति सूनी । प्राणिहिंसाप
रः । चक्री तैलिकः । ध्वजी सुराविक्रयी । वेश्या रूपापण्यस्त्री ॥ नराधिपः ॥ अत्र नरोक्तेः ॥ अध्ययनध
र्मानाह ॥ ॥अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ॥ हस्तेनौषधिभावे वा पंचम्यां श्राव
णस्य तु ॥ अधीयंतेऽस्मिन्नध्याया वेदाः तेषामुपाकर्मैतदुपक्रमः ॥ ओषधीनां प्रादुर्भावे सति श्रावण
मासस्य पौर्णमास्यां श्रवणनक्षत्रयुक्ते वा दिने । हस्तेन युक्तायां पंचम्यां वा स्वगृह्योक्तविधिना कु
र्यात् । यदा तु श्रावणमासे ओषधीनामप्रादुर्भावस्तदा भाद्रपदमासे श्रावणेन सत्रं कुर्याद्वा
त ॥ ततदूर्ध्वं सार्धांश्चतुरो मासान् वेदानधीयत ॥ तथा च मनुः ॥ श्रावण्यां प्रौष्ठपद्यां वाप्युपा
कृत्य यथाविधि । युक्तः छंदांस्यधीयीत मासान्विप्रोऽर्धपंचमान् इति ॥ ॥पौषमासस्य रो
हिण्यामष्टकायामथापि वा ॥ जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः ॥ पौषमासस्य रो
हिण्यामष्टकायां वा ग्रामाद्बहिर्जलसमीपे छंदसां वेदानां स्वगृह्योक्तविधिनोत्सर्ग
कुर्यात् ॥ यदा तु पुनर्भाद्रपदमासे उपाकर्म माघशुक्लप्रथमदिवसे उत्सर्गं कुर्यात् ॥
यथोक्तं मनुना ॥ पौषे तु छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः ॥ माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्र
थमेऽहनि ॥ तद्दिने तत्पक्षिणीमहोरात्रं वा विरम्य शुक्लपक्षेषु वेदान्कृष्णपक्षेष्वंगानि प्रधीयी
त ॥ यथाह मनुः ॥ यथाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः ॥ विरमेत्पक्षिणीं रात्रिं तदेवैकमह

२७ निशं॥ ॥अतऊर्ध्वंतुछंदांसिशुक्लेषुनियतःपठेत्॥वेदांगानितुसर्वाणिकृष्णपक्षेतुसंपठेत्इति॥ ॥
अनध्यायानाह॥ ॥त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबंधुषु॥उपाकर्मणिचोत्सर्गेस्वशाखा
श्रोत्रियेतथा॥ ॥उक्तेनकर्मणाऽधीयानस्यशिष्यर्त्विग्गुरुबंधुषुमृतेषुत्र्यहमनध्यायः॥
त्रीनहोरात्रान्वर्जयेत्॥उपाकर्मणिउत्सर्गाख्येचकर्मणिकृतेत्र्यहमनध्यायःउत्सर्गेतुमनूक्ते
पक्षिणीमहोरात्र रात्र्याभ्यांसहास्यविकल्पः॥स्वशाखाश्रोत्रिये·स्वशाखाध्यायिनिश्रोत्रिये
चमृतेत्र्यहमनध्यायः॥ ॥संध्यागर्जितनिर्घातभूकंपोल्कानिपातने॥समाप्यवेदंद्युनि
शमारण्यकमधीत्यच॥ ॥संध्यायांमेघध्वनौआकाशनिर्घातेउत्पातध्वनौभूमिचलनेउल्का
पतनेमंत्रस्यब्राह्मणस्यवासमाप्तौआरण्यकाध्ययनेच॥द्युनिशमहोरात्रमनध्यायः॥ ॥पं याम्
चदश्यांचतुर्दश्यामष्टम्यांराहुसूतके॥ऋतुसंधिषुभुक्त्वावाश्राद्धिकंप्रतिगृह्यच॥ ॥पंचदश्यां
अमावास्यायांपौर्णमास्यां·चतुर्दश्यामष्टम्यांच·राहुसूतकेचंद्रसूर्योपरागेचद्युनिशमन
ध्यायः॥यत्तुव्यासेनकीर्तयेद्व्यहंराज्ञोराहोश्चसूतकेइतितद्ग्रस्तास्तमयविषयं॥ऋतुसंधिग
तासुचप्रतिपत्सु·श्राद्धिकभोजनेतत्प्रतिग्रहेचद्युनिशमनध्यायः॥एतच्चैकोद्दिष्टव्यति
रिक्तविषयं॥तत्रतुत्रिरात्रं·प्रतिग्रहाद्द्विजोविद्वानेकोद्दिष्टनिकेतने॥मनुनकीर्तयेद्वले
तिस्मरणात्॥ ॥पशुमंडूकनकुलश्वाहिमार्जारमूषकैः॥कृतेंतरेत्वहोरात्रंशक्रपातेत
थोच्छ्रये॥ ॥अध्येतॄणांपश्वादिभिरंतरागमनेकृतेशक्रध्वजपतनदिवसेआरोपण
दिवसेउच्छ्रयदिवसेचअहोरात्रमनध्यायः॥द्युनिशमितिप्रसक्तेपुनरहोरात्रग्रहणं २७

संध्यागर्जितभूकंपोल्कानिपातनेष्वाकालिकज्ञापनार्थं॥ आकालिकानिर्घातभूकंपाकुदर्शनो
ल्का इति गौतमवचनात्॥ निमित्तकालादारभ्य अपरेद्युर्यावत्स एव कालस्तावत्प्राकालं-तन्म
वआकालिकोनामानध्यायः॥ एतच्चप्रातःसंध्यास्तनितेसायंसंध्यास्तनितेतुरात्रिमेवासायं
संध्यास्तनितेतुरात्रिमेव। सायंसंध्यास्तनितेरात्रिप्रातःसंध्यामहोरात्रिमितिहारीतस्मरणा
त्॥ पश्चनर्गौतमेनोक्तं श्वनकुलसर्पमंडूकमार्जाराणांत्र्यहमुपवासोविप्रासश्चेति॥ तत्र
थमाध्ययनएव॥ ॥श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिःस्वने॥ अमेध्यशवशूद्रांत्यस्म
शानपतितके॥ ॥क्रोष्टाशृगालः बाणोवंशः उलूकोघूकः सामसामानि आर्तोदुःखितः।
एषांश्वादीनांनिःस्वनेतावत्कालमनध्यायः। एवंवीणादिनिःस्वनेपि। वेणुवीणाभेरीमृदंगरा
थ्धगदार्त्तशब्देष्वितिगौतमवचनात्॥ गर्दःशाकटः॥ अमेध्यादीनांसंनिधानेतावत्कालिको
नध्यायः॥ ॥देवेऽभ्रमुच्चनात्मनिचविद्युत्स्तनितसंप्लवे॥ भुक्तार्द्रपाणिरंभोतरर्धरात्रेतिमारु
ते:॥ ॥अभ्रमेघदेवेऽभ्रमुच्चनात्मनिच तथाविद्युत्संप्लवे पुनःपुनर्विद्योतमानायांविद्युति
स्तनितसंप्लवेपुनःपुनर्मेघघोषेतावत्कालिकोनध्यायः। भुक्तार्द्रपाणिर्नाधीयीत॥ जलम
ध्येच-अर्धरात्रेमहानिशाख्यमध्यमप्रहरद्वये अतिमारुते अहन्यपितावत्कालंनाधीयत॥
पांशुवर्षेदिशांदाहेसंध्यानीहारभीतिषु॥ धावतःपूतिगंधेचशिष्टेचगृहमागते॥ ओसाति
केरजोवर्षेदिक्षुदाहेपरत्रज्वलिताइवदिशोदृश्यंतेसंध्यायांनीहारधूमिकायां-भीतिषुचौरग्रा
जादिकृतासुतावत्कालमनध्यायः॥ धावतःत्वरितंगच्छतोऽनध्यायः। पूतिगंधेचकुत्सिते
गंधेच। अमेध्यमद्यादिगंधे। शिष्टेचश्रोत्रियादौगृहंप्राप्तेतदनुज्ञावधिरनध्यायः॥ ॥

३० खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणारोहणे ॥ सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः ॥ या
नेत्यादि ॥ उरणमूषरं मरुभूमिः ॥ एवं चकारोपात्तैः सह सप्तत्रिंशदनध्यायांस्ता
त्कालिकान्निमित्तसमकालान्विदुः ॥ ३ ॥ अध्ययनविधिज्ञा विदुरित्यनेन स्मृत्यन्तरोक्तानध्यायान
पि संगृह्णाति ॥ यथाह मनुः ॥ शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकां ॥ नाधीयीतामिषं
जग्ध्वा सूतकान्नाद्यमेव चेत्यादि ॥ एवमनध्यायानुक्त्वा प्रसक्तानि स्नातकव्रतान्याह ॥ ॥
देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः ॥ नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि
च ॥ ॥ देवानामृत्विक्स्नातकाचार्यराज्ञां परस्त्रियाश्च छायां नाक्रामेत् ॥ नाधितिष्ठेत्
॥ न लंघयेच्च बुद्धिपूर्वकं ॥ यथाह मनुः ॥ देवतानां गुरोराज्ञः स्नातकाचार्ययोरपि ॥ नाक्रा
मेत्कामतश्छायां बभ्रुणो दीक्षितस्य चेति ॥ बभ्रुणो नकुलवर्णस्य यस्य कस्यचित् गुरो राम
रन्यस्य वा सोमादेर्वा बभ्रुण इति नपुंसकलिंगनिर्देशात् ॥ रक्तादीनि च नाधितिष्ठेत् ॥ आ
दिग्रहणात्स्नानोदकादेर्ग्रहणं ॥ उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च ॥ श्लेष्मनिष्ठ्यूतवा
न्तानि नाधितिष्ठेत्तु कामत इति ॥ ॥ विप्राहिक्षत्रियात्मानो नावज्ञेयाः कदाचन ॥ आमृ
त्योः श्रियमाकांक्षेन्न कंचिन्मर्मणि स्पृशेत् ॥ विप्रो बहुश्रुतो ब्राह्मणः ॥ अहिः सर्पः ॥
क्षत्रियो नृपतिः ॥ एते कदाचिदपि नावमंतव्याः ॥ आत्मा च स्वयमेनामवमंतव्यः ॥ आमृत्यो
र्यावज्जीवं श्रियमिच्छेत् ॥ न कंचिन्मर्माणि स्पृशेत् कस्यचिदपि मर्मोद्घाटनं न प्रकाशये
त् ॥ दूरादुच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेत् ॥ श्रुतिस्मृत्युक्तं सम्यगनुतिष्ठेत् ॥ गो
३०

ब्राह्मणानलान्पाणिनोच्छिष्टो न पदा स्पृशेत्॥ नाभिं दात्ताडनं कुर्यात्पुत्रं शिष्यं च ताड
येत्॥ श्रौतस्मार्त्ताचाराचारी॥ गां ब्राह्मणं अग्निं अन्नं मस्तकं विशेषतः पुंसस्तु चिनस्पृशे
त्॥ पादेन लंघनुच्छिष्टोपि मस्तकं पुनः पदाक्रमादावस्पृशातिनहि आचमनोत्तरकाले पन्नकार्यं
स्पृष्टो तानश्चुचिर्निःसमर्थः प्राणेनानुपस्पृशेत्॥ गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु सर्वं
प्राणादीनुपस्पृशेत्॥ किंस्वचिदपि नैव ताडनं न कुर्यात्॥ एतच्चेन्न नपकारिणि॥ अबुध्यमानुस्त्रा
त्या ब्राह्मणस्यासमंततः॥ दुःखं सुमहदाप्नोति प्रेत्य प्राज्ञतया नरः इति॥ पुत्रशिष्यौ शिक्षार्थं
मेव ताडयेत्॥ चकाराद्दासादीनामपि॥ ताडनं च रज्ज्वादिनोत्तमांगव्यतिरेकेण कार्यं॰ शिष्यशि
क्षितवधेनाशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्नन् राज्ञा चौरस्य प्रत्तिगोनमवनात्। पृ
ष्ठतस्तु शरीरस्य नोत्तमांगे कथंचनेति मनुवचनात्॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाच
रेत्॥ अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु॥ ॥कर्मणा कायेन यथाशक्ति धर्ममनुतिष्ठेत्
धर्ममेव मनसा ध्यायेत्॥ वाचा च धर्मं सदैव वदेत्॥ धर्मं विहितमपि लोकविद्विष्टं लोकाभिशस्ति
जननं मधुपर्के गोवधादिकं नाचरेत्॰ यस्मादस्वर्ग्यं॥ अग्नीषोमीयपशुवत्स्वर्गसाधनं न भवति॥ ॥
पितृमात्रतिथिभ्रातृजामिसंबंधिमातुलैः॥ वृद्धबालातुराचार्यवैद्यसंश्रितबांधवैः॥ ऋत्वि
क्पुरोहितापत्यभार्यादाससनाभिभिः विवादं वर्जयित्वा तु सर्वांल्लोकान्जयेद्गृही॥ ॥माता
जननी॥ पिता जनकः॥ अतिथिरध्वनीनः॥ भ्रातरो भिन्नोदरा अपि॥ जामयो विद्यमानभर्तृकाः॥
स्त्रियः संबंधिनो वैवाह्याः॥ मातुलो मातृभ्राता॥ वृद्धः सप्ततिवयस्कः॥ बालः आषोडशाद्व
र्षात्॥ आतुरो रोगी॥ आचार्य उपनेता॥ वैद्यो विद्वान्भिषक् वा॥ संश्रितः उपजीवी॥ बांधवाः पि

३९ त्वपक्षा मातृष्वसा श्वश्रूः। मातुलस्य पत्न्युपादानेऽप्यादरार्थं। ऋत्विक् याजकः। पुरोहितः शान्त्यादेः
कर्ता। अपत्यं पुत्रादि। भार्या सहधर्मचारिणी। दासः कर्मकरः। सनाभयः सोदराः। भ्रातृव्यः प्र
पत्न्युपादानेऽग्रजाभिभगिनी प्रत्यर्थी। एतैर्मात्रादिभिः सह वाक्कलहं परित्यज्य सर्वान्प्राजापत्या
दीन्लोकान्प्राप्नोति॥ पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु। स्नायान्नदीदेवखातह्रदप्रस्र
वणेषु च॥ परवारिषु परसंबंधिषु सर्वसत्त्वोद्देशेनासृष्टेषु तडागादिषु पंचपिंडाननुद्धृत्य
न स्नायात्॥ अनेनात्मीयेष्वसृष्टेष्वभ्यनुज्ञातेषु पिंडोद्धरणमंतरेणापि स्नानमभ्यनुज्ञातं॥ नद्यादि
षु कुत्र तर्हि स्यादित्याह॥ स्नायान्नदीदेवखातेति। साक्षात्सरित्परंपरया वा समुद्रगाः स्रवंत्यो नद्यः। देव
खातं देवनिर्मितं पुष्करादि। उदकप्रवाहाभिघातजनितः सजलो महानिम्नप्रदेशो ह्रदः। पर्वताद्यु
च्चप्रदेशात्प्रसृतमुदकं प्रस्रवणं। एतेषु च पिंडानुद्धरणेऽपि स्नायात्॥ एतच्च नित्यस्नानवि
षयं। सति संभवे नदीषु देवखातेषु तडागेषु सरित्सु च। स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु चे राम
ति॥ नित्यग्रहणान्नैमित्तिकाद्यर्थं तु यथासंभवं परवारिषु पिंडानुद्धरणे सर्वस्य कर्मणो न निषेधः
॥ ॥परशय्यासनोद्यानगृहयानानि वर्जयेत्॥ अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि॥ ॥
शय्या कशिपुः। आसनं पीठादि। उद्यानमाम्रादिवनं। गृहं प्रसिद्धं। यानं रथादि। परसंबंधीन्येता
नि अदत्तान्यननुज्ञातानि वर्जयेन्नोपयुंजीत॥ अभोज्यान्नाह॥ अग्निहीनस्येति श्रौतस्मार्ताग्न्य
धिकाररहितस्य शूद्रस्य। प्रतिलोमस्य चाधिकारवतोऽप्यग्निरहितस्यान्नमनापदि न भुंजीत न प्र
तिगृह्णीयाच्च। तस्मात्प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुंजीत प्रतिगृह्णीयाद्वेति गौतम
वचनात्॥ कदर्यबद्धचौराणां क्लीबरंगावतारिणां॥ वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां॥॥ ३९

कदर्यो लुब्धः ॥ आत्मानं धर्मकार्यं च पुत्रदारांश्च पीडयेत्। लोभाद्यः पितरौ भृत्यान्स कदर्य इति
स्मृतः। उत्सुकः। बद्धो निगडादिना। वाचा संनिरुद्धश्च ॥ चौरो ब्राह्मणसुवर्णव्यतिरिक्तपरस्वापहा
री ॥ क्लीबो नपुंसकः। रंगावतारी नटचारणमल्लादिः। वेणुच्छेदजीवी वैणः। अभिशस्तः पतनीयैः
कर्मभिरभियुक्तः। वार्धुषी निषिद्धवृत्त्युपजीवी। गणिका पण्यस्त्री। गणदीक्षी दीक्षी बहुयाजकः
। एतेषामन्नं नाश्नीयात् ॥ इत्यनुवर्त्तते ॥ ॥ चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां। क्रूरो
ग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनां ॥ ॥ चिकित्सको भिषग्वृत्त्युपजीवी ॥ आतुरो महारो
गोपसृष्टः। वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः। अर्शांसि ग्रहणी चाष्टौ महारोगाः प्र
कीर्त्तिता इति। क्रुद्धः कुपितः। पुंश्चली व्यभिचारिणी। मत्तो विद्यादिना गर्वितः। द्विट् शत्रुः
॥ क्रूरो दृष्टाभ्यान्तरकोपः। उग्रो वाक्कायव्यापारेणोद्वेजकः। पतितो ब्रह्महादिः। व्रात्यः
पतितसावित्रीकः। दाम्भिको वञ्चकः। उच्छिष्टभोजी परभुक्तोच्छिष्टाशी ॥ एते(षां) चिकित्स
कादीनामन्नं नाश्नीयात्। प्रवीरा स्त्री स्वर्णकारस्त्रीजितग्रामयाजिनां शस्त्रविक्र
यकर्मारतन्तुवायश्ववृत्तिनां ॥ प्रवीरा स्त्री स्वतन्त्रा व्यभिचारमन्तरेण। पतिपुत्ररहिते
त्यन्ये। स्वर्णकारः सुवर्णस्य विकारान्तरकर्त्ता। स्त्रीजितः सर्वत्र स्त्रीवशवर्त्ती। ग्रामयाजी
ग्रामस्य शान्त्यादिककर्त्ता ॥ बहूनां वा उपनेता। शस्त्रविक्रयी ॥ शस्त्रविक्रयोपजीवी ॥ क
र्मारो लोहकारः तक्षादिश्च। तन्तुवायः सूचीशिल्पोपजीवी। श्वभिर्वृत्तिर्जीवनं यस्यास्ती
ति श्ववृत्ती ॥ एतेषामन्नं नाश्नीयात् ॥ ॥ नृशंसराजरजककृतघ्नवधजीविनां। पिशुनानृ

त्तिनोश्चैव तथा चाक्रिकवंदिनां॥ एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा॥ नृशंसो निर्द
यः। राजा भूपतिः। तत्साहचर्यात्पुरोहितश्च। तथाह हारीतः। भीतावगीतारुदितांक्रंदिता
वघुष्टसुधितपरिभुक्तविस्मितोन्मभावधूतराजपुरोहितान्नानि वर्जयेदिति रजको वस्त्रा
दीनां नील्यादिरागकरः। कृतघ्न उपकृतस्य हंता। वधजीवी प्राणिनां वधेन वर्त्तते। चैल
धावो वस्त्रनिर्णेजनकृत्॥ सुराजीवी मद्यविक्रयी। उपपतिर्जारः। सहोपपतिना वेश्म य
स्यासौ सहोपपतिवेश्मा। पिशुनः परदोषस्य ख्यापकः॥ अनृती मिथ्यावादी। चाक्रि
कस्तैलिकः शाकटिकश्च। अभिशस्तपतितः चाक्रिकतैलिकवृत्तिभेदेनाभिधानात्
। वंदिनः स्तावकाः। सोमविक्रयी सोमलताया विक्रेता॥ एषामन्नं न भोक्तव्यं। सर्वैश्चैते
कदर्यादयो द्विजा एव। कदर्यत्वादिदोषदुष्टा अभोज्यान्नाः। इतरेषां प्राप्त्यभावात्प्रा राम
प्तिपूर्वकत्वाच्च प्रतिषेधस्य॥ अग्निहीनस्यान्नमद्यादनापदीत्यत्र शूद्रस्य अभोज्या
न्नत्वमुक्तं तत्र प्रतिप्रसवार्थमाह॥ ॥शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः॥ भो
ज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्॥ शूद्रेषु दासो गोपादासा गर्भदासादयः
गोपालो गवां पालनेन यो जीवति। कुलमित्रं पितृपितामहादिक्रमायातं। अर्धसीरी ह
लपर्यायः सीरफलस्य तत्कृषिफलग्राही॥ नापितो गृहव्यापारकारयिता योऽश्वकर्त्ता
च यश्च वाङ्मनःकायकर्मभिरात्मानं निवेदयति तवाहमिति। एते दासादयः शूद्रा
णां मध्ये भोज्यान्नाः। चकारात्कुंभकारश्च। गोपानापितदासकुंभकारकुलमित्रा

ष्टिकं निवेदितात्मा नो भोज्यान्न इति वचनात् ॥ ॥ इति स्नातकव्रतप्रकरणं ॥ ॥ न स्वाध्याय-
विरोध्यर्थमीहेतेत्यारभ्य स्नातकव्रतमभिधायेदानीं द्विजातिधर्मानाह ॥ ॥ अन-
र्चितं वृथा मांसं केशकीटसमन्वितं ॥ शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं चैव पतितेक्षितं ॥ उद-
क्यास्पृष्टं संघुष्टं पर्यायान्नं च वर्जयेत् ॥ गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः ॥ ॥
अनर्चितं अर्चाहीनं यद्दत्तमुपादीयते । वृथा मांसं वक्ष्यमाणप्राणात्ययादिव्यतिरेकेण दे-
वाद्यर्चनरहितं च यन्न भवति आत्मार्थमेव पाचितं ॥ केशकीटादिभिश्च संयुक्तं । यच्च
यमन्नं केवलं कालपरिवासेन द्रव्यांतरसंसर्गकालपरिवासाभ्यां वा अम्लीभवति तत्
शुक्तं दध्यादिव्यतिरेकेण । न पापीयसोन्नमश्नीयादिति । पक्वमशुक्तं न पर्युषितमन्य-
मन्नरात्रिपिशुनगोधूमयवपिष्टविकारेभ्य इति शंखस्मरणात् । पर्युषितं रात्र्यंतरितं
भुक्तोच्छिष्टं तमुच्छिष्टं श्वस्पृष्टं शुना स्पृष्टं । पतितेक्षितं पतितादिभिरीक्षितं । उदक्या
रजस्वला तया स्पृष्टं । संघुष्टं यस्याग्रहणं चंडालादिलक्षणं च । अप्रेमप्यपति चंडालवेश-
विद्वारकश्चांडालविशेषरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेदिति शंखस्मरणा-
त् ॥ कोभुंक्ते इति उद्घोष्य दीयते तत् संघुष्टान्नं । अन्यसंबंधि अन्यपदेशेन यद्दीयते तत् पर्याया-
न्नं ॥ यथा ॥ ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् ॥ उभावेतावभोज्यान्नौ भुक्त्वा
चांद्रायणं चरेदिति । पर्यायाचांतमिति पाठे परिगते माचांतेन गंडूषग्रहणं यस्मिंस्तत्पर्यायाचां-
तं तन्न भोक्तव्यं । एतदुक्तं भवति गंडूषग्रहणोर्द्ध्वं आचमनात् प्राक् भोक्तव्यं । पार्श्वाचां-

तथेतिपाठेएकस्यांपंक्तौपार्श्वस्थआचान्तेनभोक्तव्यंभस्मोदकादिविछेदेनविनावर्जये
दितिप्रसंगेसंबध्यतेतथा॥गोघ्रातं॥गवाघ्रातं।शकुनेनकाकादिना।आस्वादितंशकु
नोच्छिष्टं।पदास्पृष्टंबुद्धिपूर्वंपादेनस्पृष्टंवर्जयेत्॥पर्युषितस्यप्रतिप्रसवमाह॥ ॥
अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितं॥अस्नेहाअपिगोधूमयवगोरसविक्रियाः॥
अन्नमदनीयंपर्युषितमपिघृतादिस्नेहसंयुक्तंचिरकालसंस्थितमपिभोज्यं॥गोधू
मयवगोरसविक्रियामंडकसक्तुकिलाटिकाकूर्चिकाद्याअस्नेहाअपिचि
रसंस्थिताभोज्याः।यदिविकारांतरमनापन्नाः।अपूपधानाकरंभसक्तुयावकतै
लपायसशाकानिनाशुक्तानिवर्जयेदितिवशिष्ठस्मरणात्॥ ॥संधिन्यनिर्दशावत् राम
सागोपयःपरिवर्जयेत्॥औष्ट्रमैकशफंस्त्रैणमारण्यकमथाविकं॥ ॥संधिनीया
वृषेणसंधीयते।वशांवंध्यांविजानीयात्वृषाक्रांतांचसंधिनीमितित्रिकांडीस्मरणात्
याचैकांवेलामतिक्रम्यदुह्यतेपाच्चवसांतरेणसंधीयतेसासंधिनी॥प्रसूताअनति
क्रांतदशाहाअनिर्दशामृतवत्साअवत्सासंधिनीच।अनिर्दशाच्चअवत्साच्चसंधिन्य
निर्दशावत्सानाम्नतासांगवांपयःक्षीरंपरिवर्जयेत्।संधिनीमांवेति॥ग्र
हणेस्यंदिनियमसूवीरूपलक्षणार्थं।यथाहगौतमः॥स्यंदिनीयमसूसंधिनीनां
चेति॥स्रवत्स्यपस्तनीस्यंदिनी॥यमसूर्यमलप्रसविनी॥एवमजामहिष्योरनिर्दशयोः

कोयष्टिकष्टिट्टिभको ॥२ ग्राहाद्न:पाकाश्येन: १ पारावत: कलरव: कपोत: २ पुष्कराह्वस्तु कोकश्चक्रश्चक्रवाको रथांगाह्वयनामक: ।४ सारस: १

पयो वर्जयेत् ॥ गोमहिष्यजानामनिर्दशानामिति वशिष्ठस्मरणात् । येऽग्राह्यणान्नदिकागणाम
पि दध्यादीनां निषेधः ॥ न हि मांसस्य निषेधे तद्विकाराणामनिषेधो युक्तः ॥ विकारनिषेधे तु प्रकृते
र निषेधः । पयोनिषेधान्नवनीतमूत्रादेरपि निषेधः । उष्ट्रजातमौष्ट्रं पयो मूत्रादि ॥ एकशफा
वडवादयः तत्र भवमैकशफं । स्त्रीणां भवं स्त्रैणं ॥ स्त्रीग्रहणमजाव्यतिरिक्तसकलद्विस्तनीना
मुपलक्षणार्थं सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्जमिति शंखस्मरणात् । आरण्यमवा बक: कंक:
आरण्यपशुस्तदीयमारण्यकं क्षीरं माहिषव्यतिरेकेण । आरण्यानां च सर्वेषां मृगाणां माहि
च ष्यं विनेति वचनात् । अवेर्जमाविकं । वर्जयेदिति प्रत्येकं संबध्यते । अत्र [illegible] विकारप्रसक्ति
तापसी देशान्नविकारमात्रस्य पयोमूत्रादेः सर्वदा निषेधः । तस्मादिकमपेयम[illegible]मेकशफवे
तिगौतमस्मरणात् ॥ देवतार्थं बलयुपहारनिमित्तं साधितं हविर्देवतार्थं सिद्धं प्राक्होमा
त् ॥ शिग्रुः शोभाञ्जनः । लोहितान् वृक्षनिर्यासान् वृश्चनप्रभवं ॥ वृश्चच्छेदजातान् लोहिता
नपि । यथाह मनुः ॥ लोहितान् वृक्षनिर्यासान् वृश्चनप्रभवांस्तथा लोहितग्रहणं न हिंगुकर्पूरा
दीनामनिषेधः अनुपाकृतमांसानि यज्ञेऽहुतस्य परोक्षाणि मांसानि ॥ विड्जातानि मनुष्यादिज
वीमपुरीषोत्सर्गात्पुरीषस्थानेषु समुत्पन्नानि च । तेऽप्लीयकप्रभृतीनि । केवकानि छत्रकाणि
वर्जयेदिति प्रत्येकमभिसंबध्यते ॥ क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान् ॥ सारसैक
॥ क्रव्यादा आममांसादनशीलाः पक्षिणो गृध्राद
शफान्हंसान्सर्वांश्च ग्रामवासिनः ॥
यः । दात्यूहश्चातकः । शुकः कीरः । चञ्च्वा प्रतुद्य भक्षयन्तीति प्रतुदाः श्येनादयः । टिट्टिभस्ते
चातक: कलविंक: स्यात् ॥२ शारिका तिराटिश्च चक्रवाकादि सर्वेऽकाः

३४ च्छन्दानुकारी॥ सारसं लक्ष्मणः॥ एकशफा अश्वादयः हंसाः प्रसिद्धाः। ग्रामवासिनः पारा
वतप्रभृतयः। एतांश्चाश्वादीन्वर्जयेत्॥ ॥ कोयष्टिप्लवचक्राह्वबलाकाबककवि
ष्किरान्। वृथाकृसरसंयावपायसापूपशष्कुलीः॥ ॥ कोयष्टिः क्रौञ्चः। प्लवो जलकु
कुटः। चक्राह्वश्चक्रवाकः। बलाकाबकौ प्रसिद्धौ। नखैर्विदार्य विकीर्य भक्षयन्तीति विष्किरा
श्चकोरादय एव गृह्यन्ते। लावकमयूरादीनां भक्ष्यत्वविधानात् कुक्कुटस्य ग्रामवासित्वादेव नि
षेधः॥ एतान्कोयष्ट्यादीन्वर्जयेत्। वृथा देवताद्युद्देशमन्तरेण साधिताः कृसरसंया
वपायसापूपशष्कुलीर्वर्जयेत्॥ कृसरस्तिलमुद्गसिद्ध ओदनः॥ संयावः क्षीरगुडघृतादि
कृत उत्करिकाख्यः॥ पायसं पयसा शृतमन्नम्। अपूपः घृतस्नेहपक्वो गोधूमविकारः स्नेह
पक्वो गोधूमविकारः शष्कुली। न पचेदन्नमात्मने इति लिङ्गसरारादीनां निषेधसिद्धे पुन शम
रभिधानं प्रायश्चित्तगौरवार्थं॥ ॥ कलविङ्कं सकाकोलं कुररं रज्जुदालकम्॥ जालपा
दान्खञ्जरीटानज्ञातांश्च मृगद्विजान्॥ ॥ कलविङ्को ग्रामचटकः। ग्रामनिवासित्वे
न प्रतिषेधे सत्यपि अरण्यवासार्थं पुनर्वचनं। काकोलो द्रोणकाकः। कुररः उत्क्रोशः। रज्जुदालो
वृक्षकुट्टकः। जालपादा जालाकारपादाः। अजालपादा अपि हंसाः सन्तीति हंसानां
पृथग्वचनं। खञ्जरीटः खञ्जनाः। जातितोऽपि अज्ञाताः मृगाः पक्षिणश्च एतान्कल
विङ्कादीन्वर्जयेत्॥ ॥ चाषाः किकिदीवयः। रक्तपादाः कादम्बप्रभृतयः। सौनं घा

ततस्नानं भवेन्मांसान्मत्स्याएगमपि। वल्लूरं शुष्कमांसं॥ मत्स्या मीनाः। एतांश्चापादीन्वर्ज
येत्॥ चकारात्तनालिकाद्याणच्छत्राककुसुंभादीन्॥ नालिकाद्याणच्छत्राककुसुंभालाबु
विडूनात्॥ कुंभीकिंशुककवंताककोविदाराश्च वर्जयेत्॥ तथाऽकालप्रसूतानि पुष्पा
णिचफलानिचफलानिच॥ विकारवत्त्वपक्विचित्तसयस्तेन वर्जयेत्॥ तथा वटसंदृश
श्वष्टदधिपिष्टनीपमातुलिंगफलानि वर्जयेत्॥ इत्यादिस्मरणात्॥ अनंतसंधिनीक्षीर
प्रभृतीननुक्तानाकामतो भक्षयित्वा त्रिरात्रमुपवसेत्॥ अकामतस्त्वहोरात्रं शेषेषु
पवसेदहोरेजिं ननुस्मरणात्॥ यत्तु नः शंखेनोक्तं। बकबलाकाहंससवचक्रवा
ककारंडवडगृहचटककपोतपारावतपलांडुशुकसारिकासारसटिट्टिभोलूकक
रक्तपादखाषभासवायसकोकिलशार्ङ्गलिककुक्कुटहरीतभक्षणे द्वादशरात्रमनाह
रः पिबेद्गोमूत्रयावकं इति तद्दककालाभ्यासमतिपूर्वसमस्तभक्षणे वारवादिन
ष्यं॥ ॥पलांडुं विड्वराहं च छत्राकं ग्रामकुक्कुटं॥ लसुनं गृंजनं चैव भुक्त्वा चांद्रा
यणं चरेत्॥ पलांडुः स्थूलकंदनालो लसुनानुकारी॥ विड्वराहो ग्रामसूकरः॥ छ
त्राकं सर्पछत्रा। ग्रामकुक्कुटः प्रसिद्धः॥ लसुनं रसोनं सूक्ष्माश्वेतकंदनालं॥ ॥
गृंजनं लसुनानुकारि लोहितसूक्ष्मकंदं। एतानि षट् सकृत्कामतो जग्ध्वा भ

३५ ऌपि चान्द्रायणं च स्त्रीमालल्लसणं चरेत्। यामकुक्कुटछत्राकयोः। पूर्वप्रतिषिद्धयोरिहाभिधा
नं पलांड्वादिसमानप्रायश्चित्तार्थं। मतिपूर्वे निरंतराभ्यासे तु। छत्राकं विड्वराहं च लसुनं ग्रा
मकुक्कुटं।। पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विज इति मनूक्तं। अमतिपूर्वाभ्यासे। अमत्यैता
निषड्जग्ध्वा कृच्छ्रं सांतपनं चरेत्।। मतिचांद्रायणं वापीति द्रष्टव्यं।। अमतिपूर्वाभ्यासे तु शे
खोकोलेसुनपलांडुगृंजनविड्वराहग्रामकुक्कुटकुसीभक्षणे द्वादशरात्रं पयः पिबेदिति।।
।।भक्ष्याः पंचनखास्सेधागोधाकच्छपशल्लकाः। गंधर्वः शाबरएमः समरोगवयः शशाः। शशश्च
श्चमत्स्येष्वपि हि सिंहतुंडकरोहिताः।। तथा पाठीनराजीवसशल्काश्च द्विजातिभिः।। ।।
सेधाश्वावित्। गोधा हलकलासानुकारिणी महती। कच्छपः कूर्मः। शल्ली। शशकः प्रसिद्धः।।
पंचनखादीनां श्वमार्जारवानरादीनां मध्ये एते सेधादयो भक्ष्याः। चकारात्खड्गकेरवह राम
खड्गिनोऽपि। यथाह गौतमः।। पंचनखाश्च शशशल्लकश्वाश्वावित्तु शल्लकस्तके। मिशलली
शललं शल्लं वित्तगोधाखड्गकच्छपा इति।। तथा मनुरपि। श्वाविधं शल्लकं गोधां खड्गकूर्मशशां
स्तथा। भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदतः इति। यस्तु नरसिंहे खड्गे तु विवदंते नरस्य
भक्ष्यत्वमुक्तं न तत् श्राद्धादन्यत्र। खड्गमांसेनानंत्यं भवेद्दत्तं ग्रसपं पितृकर्मणीति।। श्राद्धे फलश्रुति
दर्शनात्।। तथा मत्स्यानां मध्ये सिंहतुंडादयो भक्ष्याः। सिंहतुंडः सिंहमुखः। रोहितो लोहि
नवस्यः।। पाठीनसश्चंद्रकाख्यः। राजीवः पद्मवर्णः।। सशल्कैः शुक्त्याकारैर्वर्तत इति सशो

क्ताः॥ एते च सिंहतुंडादयो नियुक्ता एव भक्ष्याः। पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः॥ राजीवाः सिंहतुंडाश्च सशल्काश्चैव सर्वशः इति मनुस्मरणात्॥ द्विजातिग्रहणं शूद्रव्युदासार्थं॥ अनर्चितं वृथामांसं स्वाध्यायो द्विजातिधर्मानुक्त्वेदानीं चातुर्वर्ण्यप्रसादः॥ अन्नः शूद्रस्य मांसस्य विधिभक्षणवर्जने॥ मांसस्य प्रोक्षितादेर्भक्षणं तद्व्यतिरिक्तस्य वा निषिद्धस्य वर्जने प्रोक्षितादिव्यतिरेकेण मांसं न भक्षयामीत्येवं संकल्परूपेण विधिः साम अन्वव अभक्ततथाह मनुः आपणुध तत्र भक्षणे विधिं दर्शयति॥ ॥प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया॥ देवानपि तॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्॥ ॥अन्नाभावेन व्याध्यभिभवेन वा मांसभक्षणमन्तरेण यदा प्राणबाधा भवति तदा नियमेन मांसं भक्षयेत्। सर्वत एवात्मानं गोपायेदित्यात्मरक्षाविधानात् तस्माद्दुहनपुरापुष्टः स्वकामीत्यप्रमादित्वमरणनिषेधाच्च। तथा श्राद्धमांसे निमंत्रितो नित्यं समेन भक्षयेत् तदभक्षणे दोषश्रवणात्। यथाविधि नियुक्तस्तु यो मांसं नात्ति मानवः॥ स प्रेत्य पशुतां याति संभवानेकविंशतिमिति प्रोक्षणाख्यः श्रौतसंस्कारः संस्कृतस्य पशोरग्नीषोमीयादेः हेतावसिष्टं मांसं प्रोक्षितं तन्मांसं भक्षयेन्न अभक्ष्याणि यागानि व्यत्र द्विजकाम्यया ब्राह्मणभोजनार्थं देवपित्रर्थं च यत्साधितं तेनैतन्नाभ्यर्च्य वसिष्ठं भक्षयन्न दोषभाग्भवति॥ एवं भक्ष्यभक्षणावशिष्टमपि यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः॥ भृत्यानां चैव भृत्यर्थमगस्त्यो ह्याचरत्तथा॥ इति मनुस्मरणान्न दोषाभावमात्रं वदता प्रतिप्रसवमर्चनाव

सुरा

३६ शिष्टस्याप्यनुज्ञामात्रं निःप्रोक्षितादिवन्नियम इति दर्शितं ॥ एवमप्रतिषिद्धानामपि शशादीनां प्रा
णात्ययादिव्यतिरेकेणाभक्ष्यत्वावगमात् श्राद्धस्यापि मांसप्रतिबद्धसर्वविधिनिषेधाधि
कारो गम्यते ॥ ॥इदानीं प्रोक्षितादिव्यतिरिक्तस्य वृथामांसामिषस्यानेन प्रतिषिद्धस्य भक्षणे
निंदार्थवादमाह ॥ ॥वसेत्स नरके घोरे दिनानि पशुरोमभिः ॥ संमितानि दुराचारो यो हंत्य
विधिना पशून् ॥ ॥अविधिना देवाद्युद्देशमंतरेण यः पशून् हंति स तस्य पशो यावंति रो
माणि ता~~वंतं नरके नी ॥ संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः इति~~ ॥ वंति दिनानि
घोरे नरके वसेच्च ॥ हंतृ इत्यस्य विधोघातकोपलक्षणं यथाह मनुः ॥ अनुमंता विशसिता नि
हंता क्रयविक्रयी ॥ संस्कर्ता चोपहर्ता च खादकश्चेति घातका इति ॥ इदानीं वर्जने वि राम
धिमाह ॥ ॥सर्वान्कामानवाप्नोति हयमेधफलं तथा ॥ गृहेऽपि निवसन्विप्रो मुनिर्मां
सविवर्जनात् ॥ ॥यः प्रोक्षितादिव्यतिरेकेण वृथामांसं न भक्षयितव्यमिति ससंक
ल्पो भवति स सर्वान्कामांस्तत्साधने प्रवृत्तो निर्विघ्नं प्राप्नोति ॥ विघ्नदोषायत्वात् ॥ य
थाह मनुः यद्ध्यायति यत्कुरुते रतिं बध्नाति यत्र च ॥ तदवाप्नोत्ययत्नेन यो हिनस्ति न
किंचनेति ॥ एतच्चानुषंगिकं फलं ॥ मुख्यफलमाह हयमेधफलं तथेति ॥ एतच्च सांवत्सरीक
संकल्पस्य ॥ वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ॥ मांसानि च न खादेद्यस्तयोः पुण्य
फलं समतिति मनुस्मरणात् ॥ तथा गृहेऽपि निवसन्ब्राह्मणादिर्वानुवेलिकोमुनिवन्मा ३६

नतीयो भवति मांसस्याग्रात्। एतच्च न प्रतिषिद्धमांसविषयेनापि प्रोक्षितादिविषये। पारि
शेष्याद् इति ध्यायच्चेन शिष्टाभ्यनुज्ञातविषयमिति॥ इति भक्ष्याभक्ष्यप्रकरणं॥ इदानीं द्रव्य
शुद्धिमाह॥ ॥सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनां॥ शाकरज्जुमूलफलवासोविद
लचर्मणां॥ पात्राणां चमसानां च वारिणा शुद्धिरिष्यते॥ ॥सौवर्णं सुवर्णेन रचितं राजतं र
प्यरचितं॥ अब्जं मुक्ताफलशंखशुक्त्यादि। ऊर्ध्वपात्रं यज्ञियोलूखलादि। ग्रहाः सोमचर्पा
ता ग्रहाः षोडशिप्रभृतयः॥ अश्मा दृषदादि। शाकं वास्तुकादि। रज्जुर्बल्वजादिनिर्मिता। मूला
मार्द्रकादि फलमाम्रादि। वासो वस्त्रं। विदलं वेणवादि। चर्म अजादीनां। विदलचर्मणोर्मृद
णं तद्विकाराणां छत्रवरत्रादीनामुपलक्षणार्थं। पात्राणि प्रोक्षणीपात्रप्रभृतीनि। चमसो
होतृचमसादयः। एतेषां सौवर्णादीनां लेपरहितानामुच्छिष्टस्पर्शमात्रे वारिणा प्रक्षालनेन
शुद्धिः॥ ॥चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा॥ ॥चरुः चरुस्थाली। स्रुक्स्रुवौ
प्रसिद्धौ॥ सस्नेहपात्राणि प्राशित्रहरणादीनि। एतानि च लेपरहितानि उष्णेन वारिणा शुद्ध्य
न्ति॥ ॥निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति॥ अब्जमश्ममयं चैव राजतं चानुपस्कृत
मिति मनुस्मरणात्॥ अनुपस्कृतं अरेखातपूरितं॥ सलेपानां तु तैजसानां मलीनां च स
र्वस्याश्ममयस्य च॥ भस्मनाद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिरिति मनूक्तं द्रष्टव्यं॥ मृद

३७ स्मनोरेककार्यत्वाद्विकल्पः॥ आपस्तु समुच्चीयन्ते। काकादिमुखोपघाते तु रुक्मताम्रकुनिमुखा
वमृष्टपात्रं निर्लिखेत्। श्वापदमुखावमृष्टपात्रं न प्रयुंजीतेति द्रष्टव्यं। एतच्च मार्जारादन्यत्र
।मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति मनुस्मरणात्॥ ॥संहतानां धान्यानां
मुशलोलूखलानसां॥ स्फ्यानजैयज्ञांगं॥ अनः शकटं। शेषं प्रसिद्धं॥ एतेषामु नवारिणा
शुद्धिः॥ पुनरजिनग्रहणं यज्ञांगाजिनप्रस्पर्थं॥ ॥प्रोक्षणं संहतानानां च बहूनां धान्यवाससां
॥संहतानामुक्तं शुद्धिद्रव्याणामपविनानां बहूनां वाससांवाससां ग्रहणमुक्तशुद्धीनामुप
लक्षणार्थं। उक्तशुद्धीनां धान्यवासः प्रभृतीनां बहूनां राशिकृतानां प्रोक्षणेनैव शुद्धिः॥ बहुत्वं च
स्वल्पापेक्षया एतदुक्तं भवति। यदा धान्यानि वस्त्रादीनि वा राशीकृतानि तत्र चंडालादिस्पृ राम
ष्टान्यल्पानि बहूनि वा अस्पृष्टानि स्पृष्टानामुक्तेन शुद्धिः॥ इतरेषां प्रोक्षणमिति। तथा
च स्मृत्यंतरे। वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे॥ तावन्मात्रं समुद्धृत्य शेषं प्रोक्षण
मर्हतीति। यदा पुनः स्पृष्टानां बहुत्वमस्पृष्टानां चाल्पत्वमिति। तदा सर्वेषामेव क्षालनं। य
थाह मनुः॥ अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां॥ प्रक्षालनेन त्वल्पानामद्भिः शौ
चं विधीयते॥ इति स्पृष्टानामस्पृष्टानां च समत्वेपि प्रोक्षणमेव बहूनां प्रोक्षणविधाने
नाल्पानां क्षालने सिद्धे पुनरल्पानां क्षालनवचनं स्पसमेषु क्षालननिरसार्थत्वात्।

इयत्स्पृष्टमियदस्पृष्टमित्यविवेके तु क्षालनमेव। पाक्षिकस्यापि दोषस्य परिहर्त्तुमशक्या-
त्।। अनेकपुरुषोद्धार्याणां तु धान्यवासःप्रभृतीनां स्पृष्टानामस्पृष्टानां च प्रोक्षणमेवे-
ति निबंधः कृतः।। निर्लेपानां स्पर्शमात्रदुष्टानां शुद्धिमुक्त्वेदानीं सलेपानां शुद्धिमाह।। ।।
तक्षणं दारुशृंगास्थ्नां गोवालैः फलसंभुवां।। मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि।। दा-
रूणां। मेषमहिषादिशृंगाणां। करिवराहाद्यस्थ्नां।। अस्थिग्रहणेन दन्तानामपि ग्रहणं। उ-
च्छिष्टस्नेहादिलिप्सानां मन्दस्नेहोदकादिभिः अनपगतलेपानां। यावन्नापैत्यमेध्याक्तो
गन्धो लेपश्च तत्कृतः।। तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु।। इति। सामान्यशुद्धिविधा-
नात्।। तक्षणं तावन्मात्रद्रव्यावयवापनयनं शुद्धिः। फलसंभुवां बिल्वालाबुनालि-
केरादिफलसंभूतानां पात्राणां गोवालैः रूढघर्षणं शुद्धिः। यज्ञपात्राणां स्रुक्स्रुवादीनां य-
ज्ञकर्मणि प्रयुज्यमानानां दक्षिणेन हस्तेन दर्भैर्वा शौचपवित्रेण वा यथाशास्त्रं कर्मांगत्व-
या मार्जनं कर्त्तव्यं।। एतच्च श्रौतमुदाहरणं।। अन्येषामपि सुवर्णादीनां पात्राणां स्मार्त्त-
लौकिककर्मसु हस्तेन शौचनाम वा गवामिति द्रष्टव्यं तु। यज्ञांगानां पुनः हस्तसौचनामि-
रद्दशौपवित्राद्भिर्मार्जनं संस्कारार्थमिति विशेषः।। ।। इदानीं सलेपानामेव काषा-
चिलेपापकर्षणहेतूनाह।। ।। सोषैरुदकगोमूत्रैः शुध्यत्याविककौशिकं।। सश्रीफ-
लैरंशुपट्टं सारिष्टैः कुतपं तथा।। ।। ऊषरमृत्तिकासहितेन गोमूत्रेणोदकेन वा लेपाप-

३८ क्षय॥ आविकं कुतपमेवं।कौशिकं कौशेयमनयोः सगौरसर्षपैरादिक्षालितं शुध्यति।उदक
गोमूत्रैरिति विवक्षितं च नैव पश्चादुदकप्रक्षालनार्थं।अंशुपट्टं वल्कलतंतुजं।सश्रीफलैः
बिल्वफलसहितैः।कुतपं पर्वतीयच्छागरोमनिर्मितं कंबलं।अरिष्टफलसहितैः
फेनकसहितैरुदकगोमूत्रैः शुध्यतीत्यनुवर्तते।एतच्चोच्छिष्टस्नेहादियोगे सति वेदि
तव्यं अल्पोपघाते तु प्रोक्षणादि क्षालनासहत्वात्।सर्वत्र द्रव्यविनाशिनैव शुद्धिरिष्ट
त्वात्।तथा च देवलः।कौशेयकुतपपट्टक्षौमदुकूलकाः।अल्पशौचा भवंत्येते शोषण
प्रोक्षणादिभिरित्यभिधायाह।तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः।धान्य
पिष्टैः कल्कैस्तृणफलैर्जलैः रसैः क्षारानुगैरपि।क्षौमवद्वल्कलानां स्यात्समानयोनितात्।।कुशा राम
दिग्रहणं तृणादारभ्य तूलिकादिप्राप्त्यर्थं।।अत्र स्तस्याल्पोपघाते नैव क्षालनं कर्तव्यं।
अमेध्यलेपादन्यत्र तूलिकामुपधानं च पुष्परक्तांबरं तथा।।शोषयित्वातपे किंचित्क
रैर्निर्मार्जयेन्मुहुः।।पश्चात्तु वारिणा प्रोक्ष्य विनियुंजीत कर्मणि।।तान्यप्यतिमलिष्टा
नि यथावत्परिशोधयेदिति देवलस्मरणात्।पुष्परक्तग्रहणं कुंकुमकुसुंभादिरक्तानि
।पुष्परक्तग्रहणमन्यस्यापि हरिद्रादिरक्तस्य क्षालनासहस्य प्राप्त्यर्थं।न मांजिष्ठादि
रक्तस्य क्षालनसहत्वात्।शंखं नाप्युक्तं। रागद्रव्याणि प्रोक्षितानि शुचीनीति।। ॥
सगौरसर्षपैः क्षौमं पुनः पकान्महीमयं॥ गौरसर्षपसहितैरुदकगोमूत्रैः क्षौमं।

क्षेपके

शुभाभ्रात्तसी। तस्य च नेर्मितेन शुध्यति पुनःपाकेन मन्मयं घटादि। एतच्चोच्छिष्टस्नेहालेपे
वेदितव्यं मद्यमूत्रपुरीषश्लेष्मपूयाश्रुशोणितैः। संस्पृष्टं नैव शुध्येत पुनःपाकेन मृन्म-
यं। चंडालाद्युपहतं तत्तु साराज्यव।। यथाह पाराशरः। चंडालघटसंस्थं यत्तोयं पिबति चेद्द्विजः
मन्यापि वा।। प्रक्षालनेन शुध्यतपरित्याग मृन्मयमिति।। कारुहस्तः शुचिः प-
ण्यं भैक्ष्यं योषिन्मुखं तथा।। ।।कारवो रजकचेलधावकसूपकारादयस्तेषां हस्तः शु-
चिः शुचि ~~सूतकादौ~~ वेचनस्य। ऐककर्मणि न स्त्र्यधावनादौ सूतकादि संभवे-
पि। तथा च स्मृत्यन्तरं। कारवः शिल्पिनो वैद्या दासीदासास्तथैव च।। राजानो राजभृ-
त्याश्च सद्यः शौचाः प्रकीर्तिता इति। परार्थं पण्यार्थं विक्रेयं पण्यं व्रीह्यादि। अनेक क्रेतृ-
जनकरपरिघट्टितमप्यप्रयतं न भवति। सूतकादिनिमित्तेपि च वणिजो। भिक्षणं समूहो
भैक्ष्यं। तद्ब्रह्मचर्यादिगतं। प्रतानाचांतस्त्रीप्रदानादि शुचि। रथ्याकर्मणादिनापि न
दुष्यति। तथा योषिन्मुखं संभोगकाले शुचि। स्त्रियश्च रतिसंसर्गे इति स्मरणात्।
।।इदानीं भूशुद्धिमाह।। ।।भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा। सेकादुल्लेखना-
ल्लेपाद्गृहं मार्जनलेपनात्।। ।।मार्जन्यापांसुतृणादीनामपसारणं मार्जनं। दाह-
स्तृणकाष्ठादिभिः। कालो यावता कालेन लेपादिक्षयो भवति तावान्। गोक्रमणं गवां पा-
दपरिघट्टनं। सेकः गोमूत्रगोमयवारिभिः। प्रवर्षणं वा। उल्लेखनं तक्षणं खननं वा। ले-
पो गोमयादिभिः। एतैर्मार्जनादिभिः समस्तैर्व्यस्तैर्वा अमेध्याद्युपहतमलिना च भूमिः शु-

३९ ध्याति॥ तथा च देवलः॥ यत्र प्रसूयते नारी म्रियते दह्यते पि वा। चंडालाध्युषितं यत्र य
त्र विष्ठादिसंगतिः॥ एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता। श्वसूकरखरोष्ट्रा
दिसंस्पृष्टा दुष्टतां व्रजेत्॥ अंगारतुषकेशास्थिभस्माद्यैर्मलिना भवेत्। इत्यमेध्या
दुष्टा मलिनेति शोधभूमेस्त्रैविध्यमभिधाय शुद्धिविभागं दर्शयति। पंचधा च चतुर्धा
च भूरमेध्या विशुध्यति। दुष्टा द्विधा त्रिधा वा शुध्यते मलिनैकधा इति। यत्र मनुष्या
दि दह्यते यत्र चंडालैरध्युषितं तस्याः पंचभिर्दहनकालेगोक्रमणसेकोल्लेखनैः
शुद्धिः। यत्र मनुष्या जायंते म्रियंते वा यत्र वा संततं विष्ठादिसंगतिः। तस्या दहनर
हितैस्तैरेव चतुर्भिः। श्वसूकरखरैश्चिरकालमध्युषिताया गोक्रमणसेकोल्लेखन
नैस्त्रिभिः। उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमधिष्ठितायाः सेकोल्लेखनाभ्यां शु राम
द्धिः। अंगारतुषादिभिश्चिरकालमधिवासिताया उल्लेखनाच्छुद्धिः। मार्जनानुले
पने तु सर्वत्र समुच्चीयेते। एवं गृहं मार्जनलेपनाभ्यां शुध्यति। गृहस्य च यद्युपात्तं तु
संमार्जनलेपनयोः प्रतिदिवसं प्राप्त्यर्थं। ॥ गोघ्राते न्ने तथा केशमक्षिकाकीटदूषि
ते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये॥ ॥ गोघ्राणे निःस्नेहोपहते न्ने
अदनीयमन्ने॥ तथा मक्षिकाकेशकीटैर्दूषिते। केशग्रहणं लोमादिनां स्पर्थं।
कीटाः पिपीलिकादयः। सलिलं भस्म मृद्वापि उदके भस्म मृद्वा यथासंभवं प्रक्षेस

वंशुध्यर्थं । यत्तु गौतमोक्तं । निःसमभोज्यं केशकीटोपपन्नमिति । तत्केशकीटादिभिः
सहपसर्कं तद्विषयं ॥ त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः ॥ भस्माद्भिः
कांस्यलोहानां शुद्धिः प्लावो द्रवस्य च ॥ त्रपुप्रभृतीनि प्रसिद्धानि तेषां क्षारोदके
पित्तले २४ न अम्लोदकेन वारिणोत्तरीतिका च अलोहस्याग्रहणमेकयोनित्वात् । एतच्च ताम्रादी
नामम्लोदकादिभिः शुद्ध्यभिधानं नियमार्थं । मलसंयोगजे तज्जयस्य येनापह्रियते ।
तस्य तद्योधनं प्राप्तं सामान्यद्रव्यशुद्धिरुक्तेति । अविशेषस्मरणात् । अतो नानाम्रदे रसिद्धो
दकादिलेपस्यापगमसंभवे नियमेनाम्लादिना शुद्धिः कार्या । अतएव मनुः सामान्येनोक्त
ताम्रायः कांस्यरैत्यानां त्रपुणः सीसकस्य च । शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः ।
यत्तु भस्मना शुध्येत्कांस्यं ताम्रमम्लेन शुध्यतीति । तत्ताम्रादेः शौचस्य पराकाष्ठाप्रतिपाद
यितुं नान्यनिषेधाय । यदा तूपघातातिशयस्तदाम्लोदकादीनामावृत्तिः ॥ गवाघ्रातानि कां
स्यानि शूद्रोच्छिष्टानि यानि च । शुद्ध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि चेति स्मरणात्
शुद्धिः प्लावो द्रवस्य चेति । द्रवद्रव्यस्य घृतादेः प्रस्थ । पलद्वयेन प्रसृतं द्विगुणं कुडवं मतं ॥ प्रासंगिकं
चतुर्भिः कुडवैः प्रस्थ आढकस्तैश्चतुर्गुणो । चतुर्भिश्च भवेद्द्रोण इत्येतन्मानलक्षणं ॥ प्रमाणाधि धवद्यं
कस्य प्रकाशार्धपात्रस्यामेध्यसंस्पृष्टद्रव्यस्य च प्लावः ॥ प्लवनं समानजातीयेन प्रद

४० क्षेत्रभांडस्यातिप्ररणे यावन्निःसरणं शुद्धिरित्यनुवर्त्तते। ततोऽल्पस्य त्यागः॥ बहुलस्य च देश
कालापेक्षया वेदितव्यम्। यथाह बौधायनः। देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिम
वस्थां च ज्ञात्वा शौचं प्रकल्पयेत्। कीटाद्युपहतस्य तु सवनं। यथाह मनुः। द्रवाणां चैव
सर्वेषां शुद्धिरुत्सवनं स्मृतं। उत्सवनं चात्र वस्त्रान्तरितेन पात्रक्षेपः। अन्यथा कीटाद्युपग
मासंभवात्। शूद्रभांडस्थितस्य तु मधूदकादेः पात्रान्तरानयनात् शुद्धिः। मधूदके पयस्तद्विका
रश्च पात्रात्पात्रान्तरानयने शुद्धम् इति बौधायनः। मधुघृतादेर्गोरसदहस्तात्पात्रात्सस्य
पात्रान्तरानयने पुनः पवनं च कार्यं। यथाह शंखः। अध्यवहार्याणां च तेनातिधारिता
नां सर्वेषां शुचित्वं स्नेहाद्युपघाते शुद्धिमुक्त्वेदानीं तेषामेवामेध्योपहतानां शुद्धिमाह॥ राम
॥अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धादिकर्षणात्॥ ॥अमेध्याः शरीरजा मला वसा
शुक्रादयः। वसा शुक्रमसृङ्मज्जा मूत्र विट् कर्णविण्नखाः। श्लेष्माश्रु दूषिका स्वेदो द्वाद
शैते नृणां मलाः॥ तथा मानुषास्थि शवविष्ठारेतोमूत्रार्त्तववसा। स्वेदाश्रुदूषिका
श्लेष्ममद्यं चामेध्यमुच्यते। इति मनुदेवलादिप्रतिपादिताः। तैर्वसादिभिरक्तं लिप्तममेध्या
क्तं तस्य मृत्तोयेन शुद्धिः कार्या गन्धापकर्षणेन। आदिग्रहणाल्लेपस्यापि ग्रहणं। यथा
ह गौतमः। लेपगन्धापकर्षणे शौचममेध्यलिप्तस्येति सर्वशुद्धिषु च प्रथमं मृत्तोयैरेवले

पर्गंधापकर्षणं कार्यं। अशक्तावन्येन तद्भिः पूर्वमदाचेति गौतमवचनात्। वसादिग्रहणं
च सर्वेषाममेध्यत्वप्रतिपादयितुं समानोपयोगाय। मद्यमूत्रपुरीषश्लेष्मपूयाश्रुशोणि
तैः। संसृष्टं नैव शुध्येत पुनः पाकेन मृन्मयमिति सुपघात विशेषाभिधानात्। अमेध्यत्वं चै
षां दृष्टा चैव मलाश्रुतौ इति वचनाद् दृष्टच्युतानामेव न तु स्वस्थानावस्थितानां। पुरुषस्य ना
भेरूर्ध्वं करम्पर्त्तिरिक्तांगानामन्यामेध्यस्पर्शे स्नानं। यथाह देवलः। मानुषास्थिवसावि
ष्ठामार्त्तवं मूत्ररेतसी। मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत्। तान्येव स्वानि सं
स्पृश्य प्रक्षाल्याचम्य शुध्यतीति।। ।। वाक्रे रात्तमंबु निस्सिक्तमज्ञातं च सदा शुचि
।। इत्ते पियद्याक्त शौचे मनसो परितोषाय तत्र शुद्धिसंदेहो भवति तदा के रात्तोशुद्ध्यमेतद
स्त्विति। ब्राह्मणवचनेन शुद्धं भवतीत्यर्थः। अंबुनि सिक्ते यस्य प्रानिपदे के शुद्धिनोस्ति
तस्य प्रक्षालनेन शुद्धिः। प्रक्षालनासहस्य प्रोक्षणेन। अज्ञाते चा। सदा यत्काकाद्युपह
तमुपयुक्तेन कदाचिदपि ज्ञायते तत्र शुचि। तदुपयोगादृष्टदोषो नास्तीत्यर्थः। मन्वेतदि
रध्यते। संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः। अज्ञातभुक्तशुद्ध्यर्थं ज्ञानस्य च विशेष
तः। इत्यदृष्टदोषे पि प्रायश्चित्तप्रतिपादनात्।। नैतत्प्रायश्चित्तस्य जग्धिविषयत्वात्। अदृष्ट
दोषाभावस्य चान्योपयोगविषयत्वात्।। ।। शुद्धिगोष्ठस्थितिर्हृत्तोयं प्रवृत्तिस्तं महीगतं।।

४१ तथा मांसं श्वचांडालक्रव्यादादिनिपातितं॥ ॥ महीगतं भूमिस्थमुदकमेकगवीतृप्तिज
ननसमर्थं चांडालादिभिरसंस्पृष्टं प्रकृतिस्थं रूपरसगंधस्पर्शांतरमनापन्नं शुचि। आ
चमनादियोग्यं भवति। महीगतमिति अशुद्धभूमिगतस्य शुचित्वनिषेधार्थं। न चैतदंतरिक्षो
दकस्य शुद्धत्वं व्यावर्त्यं। नाप्युद्धृतस्य। उद्धृता आपि शुध्यंति शुद्धैः पात्रैः समुद्धृताः।
एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वयमिति देवलवचनात्। तथा केदारादिस्थे
तडागादौ न दोषः। अंत्यैरपि खातेषु कूपेषु तेषु वाप्यादिकेषु तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चि
त्तं न विद्यते॥ इति शातातपस्मरणात्। तथा मांसं श्वचांडालक्रव्यादादिनिपातितं शुचि।
आदिग्रहणात् पुल्कसादेरपि ग्रहणं। निपातितग्रहणं भक्षितनिराकरणार्थं॥ ॥रश्मिर राम
ग्नी रजश्छाया गौरश्वो वसुधानिलः। विप्रुषो मक्षिकाः स्पर्शे वत्सः प्रस्नवने शुचिः॥ ॥
रश्मयः सूर्यादिः प्रकाशाद्द्रव्यस्य। अग्निः प्रसिद्धः। रजः अजादिसंबंधिव्यतिरेकेण। तत्र
श्वकाकोष्ट्रखरोलूकशूकरग्रामपक्षिणां। अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीय
ते इति दोषश्रवणात्। तत्स्पर्शे संमार्जनादिकार्यं। छाया वृक्षादेः। गौः। अश्वः। वसुधा पृ
नीहाराये थ्वी। अनिलो वायुः। विप्रुषः अवरूपाः बिंदवः मुखजा नाचमनस्पर्शनात्वात्। मक्षिकाश्च।
स्वः२ एते चंडालादिस्पृष्टा अपि स्पर्शे शुचयः॥ वत्सः प्रस्नवने ऊधोगतदुग्धाकर्षणे शुचिः।

वस्त्रग्रहणं बालस्योपलक्षणार्थं। बालैरनुपरिक्रांतं नित्यं मेध्यमिति नास्त्यैतिरितिवचनात्।।
।।अजाश्वं मुखतो मेध्यं न गौर्न नरजा मलाः।। पंथानश्च विशुध्यंति सोमसूर्यांशुमारुतैः।। ।।
अजाश्वयोर्मुखं मेध्यं। न गोः। न नरजा मलाः। नरशब्दो लक्षणया देहमभिधत्ते तेन जा मला
वसादयो न मेध्याः। पंथानो मार्गाः। चंडालादिस्पृष्टा अपि रात्रौ सोमांशुभिर्मारुतेन च शुध्यं
ति। दिवा च सूर्यांशुभिर्मारुतेन च।। ।मुखजा विप्रुषो मेध्यास्तथा चमन बिंदवः। श्मश्रु चा
स्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः।। ।मुखे जाता मुखजाः श्लेष्मविप्रुषो मेध्याः। उच्छिष्टं
कुर्वंति न निपतितास्थावंगे।। न मुख्या विप्रुषः उच्छिष्टं कुर्वंति। न चेदंगे निपतंतीति गौत
मस्मरणात्। तथा चमन बिंदवः पादौ स्पृशंति ते पि मेध्याः। श्मश्रु चास्यप्रविष्टं उच्छिष्टं
न करोति। दंतसक्तं चान्नादिकं स्वयमेव च्युतं सत् कोशुचिर्भवति। अच्युतं तु दंतसमं तथा
च गौतमः। दंतश्लिष्टेषु दंतवदिति। अन्यत्र जिह्वाभिमर्शनात् प्राक्च्युतेरित्येके। च्युतेष्वा
स्रावविद्याल्लिगिरन्नेव तच्छुचिरिति। निगिरणं पुनरनेनयात्र बल्यो क्तं त्यागेनाविशु
ध्यते। निगरणे वैसेव कारः। चर्वणे लेह्ये चैव नास्ति संमुखकृत्तांबूले चैव वेले। कं छौविलोमको।
स्पृष्टा वासो विपरिधाय चेति विमूत्राचमनानिषेधार्थं। तांबूलग्रहणं फलादेरुपल
क्षणार्थं। तांबूले च फले चैव भुक्तस्नेहावशिष्टके। दंतलग्नस्य संस्पर्शे नोच्छिष्टो भवति द्वि

जइत्तिशान्तात्तपस्मरणात्॥ स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे। आचान्तःपुनरा द्विराचामेत्
चामेद्वासोविपरिधायच॥ ॥स्नानेपानेक्षुतेस्वप्नेभोजनेरथ्योपसर्पणेवासोविपरिधाने
षुकृतेष्वाचान्तःपुनराचामेत्। द्विराचमेदित्यर्थः।चकाराद्रोदनाध्ययनानृतचापल्यान
तोक्त्यादिषु।तथाचवसिष्ठः।सुप्त्वाभुक्त्वाक्षुत्वास्नात्वापीत्वारुदित्वाचान्तःपुनराचामेदि
ति।मनुरपि।सुप्त्वाक्षुत्वाचभुक्त्वाचनिष्ठीव्योक्त्वानृतंवचः।पीत्वापोध्येष्यमाणश्चआ
चामेत्प्रयतोपिसन्निति।भोजनस्यादावपिद्विराचमनंभोक्ष्यमाणःप्रयतोद्विराचमेदित्या
पस्तम्बस्मरणात्।स्नानपानयोरादौसकृत्।अध्ययनेत्वारंभेपि।शेषेष्वंतएवयथो
क्तंद्विराचमनं॥ ॥रथ्याकर्दमतोयानिस्पृष्टान्यन्त्यश्ववायसैः।मारुतेनैवशुध्यन्ति राम
पक्वेष्टकचितानिच॥ ॥रथ्यामार्गमात्रंकर्दमःपंकः।तोयमुदकं।रथ्यास्थानिकर्द
मतोयान्यंत्यश्वचंडालादिभिःस्पृष्टानिमारुतेनैवशुध्यन्तिबहुवचनंतृणगोमयपर्णा
कुरादिप्राप्त्यर्थं।पक्वेष्टकाचितानिधवलगृहादीनिचंडालादिस्पृष्टानिमारुतेनैवशु
ध्यन्ति।एतच्चप्रोक्षणसहजानामभियुक्तैःप्रोक्षणनिषेधार्थं।तृणकाष्ठपर्णादीनांतुप्रो
क्षणमेवेति॥ ॥इतिद्रव्यशुद्धिप्रकरणं॥ ॥इदानींदानधर्मप्रतिपादयिषुस्तदंगभू
तपात्रप्रतिपादनार्थंतपःप्रशंसामाह॥तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये।तृ

स्यर्थे पितृदेवानां धर्मसंरक्षणाय च॥ ॥ब्रह्मा हिरण्यगर्भः कल्पादौ तपस्तप्त्वा ध्यानं कृत्वा
कान्मुखात्सृजामीति पूर्वं ब्राह्मणं सृष्टवान्। किमर्थं। वेदरक्षणाय। श्रुतिरक्षणा
र्थं। पितृणां देवानां च तत्स्पर्थं। अनुष्ठानोपदेशद्वारेण धर्मरक्षणार्थं च। अनंतरं तपोर
तं श्रेयःफलं भवतीत्याह॥ ॥सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः॥ते
भ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मविक्तमाः॥ ॥सर्वस्य क्षत्रियादेर्विप्राः प्रभ
वः श्रेष्ठाः जात्या कर्मणा च। ब्राह्मणेष्वपि श्रुताध्ययनशालिनः श्रुताध्ययनसंप
न्ना उत्कृष्टाः। तेभ्योऽपि क्रियापरा विहितानुष्ठानशीलाः। तेभ्योऽप्यध्यात्मविक्तमाः। ब्रह्म
मार्गेण शमदमादियोगेन आत्मतत्त्वज्ञाननिरताः श्रेष्ठा इत्यनुषज्यते। एवं ज्ञा
ति विद्यानुष्ठानतपसो प्रशंसामुखेन एकैकयोगेन पात्रताम् अभिधायाधुना तेषां समु
च्चये संपूर्णपात्रतामाह॥ ॥न विद्यया केवलया तपसा वापि पात्रता॥ यत्र वृत्तमि
मे चोभे तद्धि पात्रं प्रकीर्तितं॥ ॥केवलया विद्यया श्रुताध्ययनसंपत्त्या नैव संपूर्णपा
त्रता नैव केवलेन तपसा शमदमादिना। अपिशब्दात् केवलानुष्ठानेन केवलज्ञानेन सा
वा नैव संपूर्णपात्रता। कथं तर्हि। यत्र पुरुषे च वृत्तमनुष्ठानं इमे चोभे विद्यातपसी सा॥
च शब्दात्। ब्राह्मणजातिश्च तद्धि मन्वादिभिः संपूर्णपात्रं प्रकीर्तितं। हि यस्मादर्थः

परमुत्कृष्टपात्रं नास्ति॥ अनु च जातिविद्यावृत्तानतपःसमुच्चयानामुत्तरोत्तरमाशस्त्ये
न फलतारतम्यं द्रष्टव्यं॥ ॥गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितं॥ नापात्रे विदुषा किं
चिदात्मनः श्रेय इच्छता॥ ॥पूर्वोक्तपात्रे गोभूम्यादिकमर्चितं दातव्यं। अर्चितं शास्त्रोक्तोद
कदानादिनिकर्तव्यतासहितं देयं॥ अपात्रे क्षत्रियादौ ब्राह्मणे च पतितादौ॥ विदुषा पा
त्रविशेषेण फलविशेषं जानता श्रेयः संपूर्णफलमिच्छता किंचिदल्पमपि न दातव्यं॥ श्रे
योग्रहणेन तु अपात्रदानेपि किमपि नाम संफलमस्तीति सूचितं। यथाह द्वैपायनः
॥अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतमि
ति॥ अपात्रेन दानवर्मिति वदता विशिष्टदेशकालद्रव्यसंनिधौ पात्रस्यासंनिधाने राम
द्रव्यस्य वा तदुद्देशेन त्यागं न सो प्रतिश्रवणं वा सर्वथा समर्पयन्न। न त्वपात्रे न दातव्य
मिति सूचितं। तथा॥ प्रतिश्रुतमपि पश्चात्पातकादिसंयोगे ज्ञाते न देयं। प्रतिश्रुत्यापि
अधर्मसंयुक्ताय न दद्यादिति निषेधात्॥ ॥अपात्रे तु दातुर्निषेधमुक्त्वा प्रतिग्रही
तारं प्रत्याह॥ विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः॥ गृह्णन्प्रदातारमधो नयत्या
त्मानमेव च॥ ॥विद्यातपोभ्यां हीनेन प्रतिग्रहः सुवर्णादिर्न ग्राह्यः॥ यस्माद्विद्यादि
हीनः प्रतिगृह्णन्नु दातारमात्मानं च अधो नरकं प्रापयति। ॥गवादि पात्रे दातव्यमित्यु

क्तेतत्र विशेषमाह ॥ ॥दानं येन संहपात्रे निमित्तेषु विशेषतः । याचितेनापि दातव्यं श्रद्धा
पूतं तु शक्तितः ॥ ॥प्रतिदिवसं शक्त्यनुसारेण यथोक्तविधिना पात्रे गवादिकं स्वकु
वाविरोधेन दातव्यं निमित्तेषु चन्द्रोपरागादिषु विशेषतोधिकं यत्नेन दातव्यं याचि
तेनापि श्रद्धापूतं ॥ अत्र सूयावचित्रीरुक्तं शयादातव्यमयाचितेनापि दातव्यमिति वद
तापधोक्तं पात्रे स्वयमेव गत्वा आहूय वा यद्दानं तन्महाफलमुक्तं । यथा च स्मरणं ॥ ॥ग
त्वा यद्दीयते दानं तदनंतफलं स्मृतं । सहस्रगुणमाहूय याचितेन तु तद्दर्धकं ॥ गवादि
के देयमित्युक्तं तत्र गोदाने विशेषमाह ॥ ॥हेमशृंगी शफै रौप्यैः सुशीला वस्त्रसंयुता
॥ सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥ हेममये शृंगे यस्याः सा हेमशृंगी ॥ ॥
शफैरौप्यैराजतैः खुरैः संयुता वस्त्रेण च संयुक्ता कांस्यपात्रसहिता बहुक्षीरा गौ
र्यथाशक्ति दक्षिणासहिता दातव्या ॥ ॥गोदानस्य फलमाह ॥ दातास्याः स्वर्ग
माप्नोति वत्सरान् रोमसंमितान् ॥ ॥कपिला चेत्तारयति पूर्वंश्चासप्तमं कुलं ॥ ॥अ
स्या गोः रोमसंमितान् रोमसंख्याकान् वत्सरान् स्वर्गमाप्नोति दाता ॥ सा यदि सा कपि
ला तदा न केवलं दातारं तारयति । किंतु कुलमप्यासप्तमं सप्तममभिव्याप्य पित्रादी
न् षट् पुत्रादीन् षट् आत्मानं च सप्तमं प्यर्थे पूर्वः शब्दः ॥ सवत्सा रोमतुल्यानि यु
गान्युभयतोमुखी । दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत् ॥ ॥सवत्सा री

४८ सतुल्यानि सहैव वत्सेनैव वर्तत इति सवत्सा तस्या रोमतुल्यानि वत्सस्य गोश्च यावंति रो
माणि तावत्संख्याकानि युगानि तत्रैवाह। उभयतोमुखीं दत्त्वा स्वर्गमाप्नोति।
अनुभवति पूर्वेण विधिना ददता चेत्॥ ॥कापुनरुभयतोमुखी कुर्यं वा तद्दानं सहे
कलमित्यत आह॥ यावद्वत्सस्य पादौ मुखं योन्यां च दृश्यते॥ तावद्गौः पृथिवी ज्ञेया
यावद्गर्भं न मुंचति॥ ॥गर्भान्निर्गच्छतो वत्सस्य द्वौ पादौ मुखं च यावत्स्वकाले योन्यां च
दृश्यते तावत्काले उभयतोमुखमस्या अस्तीति उभयतोमुखी यावत्काले गर्भं न मु
चति भावत्सा गौः पृथिवी ज्ञेया॥ अतः फलातिशयो युक्तः॥ ॥यथाकथंचिद्दत्त्वा गां
धेनुं वा धेनुमेव वा अरोगामपरिक्लिष्टां दत्त्वा स्वर्गे महीयते॥ यथाकिंयविहि राम
तमंगाद्यसंभवेपि यथासंभवं पूर्वोक्तेन विधिना। धेनुं दोग्ध्रीं अधेनुं वा अदो-
ग्ध्रीं अरोगिणीं रोगरहितां॥ अपरिक्लिष्टां असंतानवेलां दत्त्वा दत्त्वा स्वर्गे मही
यते॥ ॥गोदानसमान्याह॥ ॥श्रांतसंवाहनं रोगिपरिचर्या सुरार्चनं॥ पादशौचं
द्विजोच्छिष्टमार्जनं गोप्रदानवत्॥ ॥श्रांतस्य आसनशयनादिदानेन श्रमापनयनं
श्रांतसंवाहनं। रोगिणां परिचर्या आरोग्यौषधादिदानेन। सुरार्चनं हरिहरहिरण्य
गर्भादीनां गंधमाल्यादिभिराराधनं। पादशौचं द्विजानां समानामधिकानां च। तेषामे

वोछिष्टसमार्जनं। एतान्यनंतरोक्तानि गोदानेन समानि॥ ॥भूदीपांश्चान्नवस्त्रांभस्तिल
सर्पिः प्रतिश्रयान्। नैवेशिकं स्वर्णधुर्यं दत्वा स्वर्गे महीयते॥ ॥भूः फलप्रदा। दीपादे
वतायतनादिषु। प्रतिश्रयः प्रवासिनामाश्रयः। निवेसार्थं गार्हस्थ्यार्थं यत्कन्यादीयते
तन्नैवेशिकं। स्वर्णं सुवर्णं। धुर्यो भारसहो बलीवर्दः। शेषं प्रसिद्धं। एतान्भूदीपादीन्
दत्वा स्वर्गलोके पूज्यते। स्वर्गफलं वस्तुमिदा दनादीनान फलांतरस्तु दासार्थे। यत्किंचि
त्कुरुते घापंज्ञानतोपि वा॥ अपि गोचर्ममात्रेण भूमिदानेन शुध्यति। तथा। वारिदस्तृ
प्तिमाप्नोति सुखमक्षय्यमन्नदः। तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमं। भूमिदो भू
मिमाप्नोति दीर्घमायुर्हिरण्यदः॥ गृहदोग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमं। वासोदश्चं
द्रसालोक्यमश्विसालोक्यमश्वदः। इत्यादि फलांतरश्रवणात्। गोचर्मलक्षणं बृह
स्पतिना दर्शितं। दशहस्तेन दंडेन त्रिंशद्दंडं निवर्तनं। दशतान्येव गोचर्म दत्वा स्वर्गे
महीयते॥ ॥गृहधान्याभयोपानच्छत्रमाल्यानुलेपनं। यानवृक्षं प्रियं शय्यां दत्वात्यंतसु
खी भवेत्॥ ॥गृहं प्रसिद्धं। धान्यानि व्रीहिशालिगोधूमादीनि च। अभयं भीतत्राणं। उ
पानहौ छत्रं। माल्यं मालतिकादि। अनुलेपनं चंदनादि। यानं रथादि। वृक्षमुपजीव्य
माम्रादिकं। प्रियं यद्यस्य प्रियं धर्मादिकं। शय्यां च दत्वा प्रसंनमतिशयेन सुखी भवतीति।

४५ नचहिरएयादिवत्। हस्तेदानुमशक्यस्यधर्मस्यदानासंभवो भूमिदानादयपीसमानत्वावसर
संतरेपि धर्मदानस्य स्मरणात्॥ देवतानांगुरूणांचमातापित्रोस्तथैवच॥ पुण्यंदेयंप्रयत्नेननापुण्यंचोदितंकचित्॥ अपुण्यदानंतद्देवबद्धते॥ प्रतिग्रहीतुरपिलोभादिनाप्रवृत्तस्य॥ यःयापनबले ध्यात्वप्रतिग्रहानतिस्मोते॥ हिंसाचरणंतस्यपापंनावसमाश्रयेत्। समद्विगुणसाहस्रंचप्रदातव्यु। इतिस्मरणात्। इहचसर्वत्रादिदेशकालपात्रविशेषादेयविशेषाद्दातृविशेषाच्चफलातिशयत्वमपद्रष्टव्यं॥ ॥सर्वधर्ममयंब्रह्मप्रदानेभ्योधिकंयतः। तद्ददत्समवाप्नोतिब्रह्मलोकमभीप्सितं॥ ~~॥यस्मात्सर्वधर्ममयंब्रह्मप्रदानेभ्योधिकंयतः। तद्ददत्समवाप्नोतिब्रह्मलोकमभीप्सितं~~॥ मयंब्रह्मपरबोधकत्वेनतस्मात्तद्दानंसर्वदानेभ्यो स्तम
धिकं॥ अतस्तद्ददत्अध्यापनादिद्वारेणब्रह्मलोकमवाप्नोति। अविच्युतंविच्युतिर्नभवति॥ आभूतसंप्लवंयावत्ब्रह्मलोकेवतिष्ठते। अत्रचब्रह्मदानेपुरस्तात्पादानमात्रंदानं॥ स्वत्वमनिवृत्तेःकर्तुमशक्यत्वात्॥ ॥दानफलमुक्तंदानव्यतिरेकेणापिदानफलावाप्तिहेतुमाह॥ ॥प्रतिग्रहसमर्थोपिनादत्तेयःप्रतिग्रहं॥ येलोकादानशीलानांसतानाप्नोतिपुष्कलान्॥ ॥यःपात्रभूतोपिप्राप्तंप्रतिग्रहंसुवर्णादिकंनादत्तेनस्वीकरोति। असौयथप्राप्तंसेनोपात्तेनतद्दानशीलानांयेलोकास्तानाप्नोतिसमग्रान्॥ ॥इदानीं

४५

सर्वत्रप्रतिग्रहनिवृत्तिप्रसंगेऽपवादमाह ।। ।।कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधि
क्षितिः ।। मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ।। ।।धानाः भ्रष्टास्तंडुलाः क्षितिर्मृ
त्तिका ।। शेषं प्रसिद्धं ।। एतत्स्वयमाकाचितं स्वयमुपनीतं न प्रत्याख्येयं । चकाराद्गृहादि ।। शय्यां
गृहान्कुशान्गंधानपः पुष्पं मणीन्दधि ।। मत्स्यान्धानाः पयो मांसं शाकं चैव न निर्णुदेत्
।। तथा एधोदकं मूलफलमन्नमभ्युद्यतं च यत् ।। सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षि
णामिति स्मरणात् ।। ।।किमिति न प्रत्याख्येयमित्याह ।। ।।अयाचिताहृतं ग्राह्यमपि दुः
ष्कृतकर्मणः । अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः ।। यस्मादयाचितमेतत् कुलटाषं
ढपतितेभ्यः शत्रोश्चाकुलटा कुलमटतीति कुलटा स्वैरिण्यादिका षंढस्तृतीयाप्रकृतिः ।।
।।प्रतिग्रहनिवृत्तेरपवादांतरमाह । देवातिथ्यर्चनकृते गुरुभृत्यार्थवृत्तये ।। सर्वतः प्रति
गृह्णीयात् ।। आत्मवृत्त्यर्थमेव वा ।। ।।देवतातिथ्यर्चनादेरावश्यकत्वात् तदर्थमनापत्का
रणोत्पत्तिनापि शंतकुत्सितवर्जं सर्वतः प्रतिगृह्णीयात् । गुरवो मातापित्रादयः । भृत्या
भरणीया भार्यापुत्रादयः ।। ।।इति दानधर्मप्रकरणं ।। ।।इदानीं श्राद्धप्रकरणमा
रभ्यते ।। ।।श्राद्धं नाम अदनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देशेन श्रद्धया त्यागः ।
तच्च द्विविधं । पार्वणमेकोद्दिष्टं चेति । तत्र त्रिपुरुषोद्देशेन यत्क्रियते तत्पार्वणं । एकपुरु
षोद्देशेन क्रियमाणमेकोद्दिष्टं । पुनश्च तत्त्रिविधं । नित्यं नैमित्तिकं काम्यं च । तत्र नित्यं

नियतनिमित्तोपाधौचोदितं। अहरहः अमावास्याष्टकादिषु। अनियतनिमित्तोपाधौचो
दितं नैमित्तिकं यथा पुत्रजन्मादिषु। फलकामनोपाधौचोदितं काम्यं यथा स्वर्गादिकामा
नां त्रित्रिकादिषु नक्षत्रेषु। पुनश्च पंचविधं। अहरहः श्राद्धं वृद्धिश्राद्धं पार्वणमेकोद्दिष्टं
सपिंडीकरणं चेति। तत्राहरहः श्राद्धमन्नेन पितृमनुष्येभ्य इत्यादिनोक्तं। अधुना पार्वणं वृद्धि
श्राद्धं च दर्शयिष्यंस्तयोः कालानाह॥ ॥अमावास्याष्टका वृद्धिः कृष्णपक्षोयनद्वयं। द्र
व्यं ब्राह्मणसंपत्ति विषुव सूर्यसंक्रमः॥ व्यतीपातो गजछाया ग्रहणं चंद्रसूर्ययोः॥ श्रा
द्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिताः॥ ॥यस्मिन् दिने चंद्रमा न दृश्यते सा अमा
वास्या। तस्यामहर्द्वयव्यापिन्यां परा व्यापिनी ग्राह्या। अष्टकाश्च तिस्रो हेमंतशिशिर राम
योश्चतुर्णाम परपक्षाणामष्टम्यो अष्टकाइत्याश्वलायनोक्ताः। वृद्धिः पुत्रजन्मादिः।
कृष्णपक्षोपरपक्षः। अयनद्वयं दक्षिणोत्तरसंज्ञं। द्रव्यं कृष्णसारमांसादिकं। ब्राह्मणसंपत्ति
र्वक्ष्यमाणा। विषुवद्द्वयं मेषतुलयोः सूर्यगमनं। सूर्यसंक्रमः आदित्यस्य राशेराश्यं
तरगमनं। अयनविषुवतोः संक्रांतित्वेन सिद्धेपि पृथगुपादानं फलातिशयप्रतिपाद
नार्थं। व्यतीपातो योगविशेषः। गजछाया॥ यदेंदुः पितृदैवत्ये हंसश्चैव करे स्थितः।
याम्या तिथिर्भवेत्सा हि गजछाया प्रकीर्तिता। इति परिभाषिता। हस्तिछाया इति केचित्। सा
इह न गृह्यते। कालप्रक्रमात्। ग्रहणं चंद्रसूर्ययोरुपरागः। यदा च कर्तुः श्राद्धं प्रति रुचि

र्भवतितदापि। वचनाद्युगादिप्रभृतयः।। एतेश्राद्धकालाः।। यद्यपिचंद्रसूर्यग्रहेनाद्या
दितिग्रहणेभोजननिषेधः।। तथापिभोक्तुर्दोषोदातुरभ्युदयः।। ।।अहरहःश्राद्धव्यतिरि
क्तवक्ष्यमाणेषुचतुर्विधश्राद्धेषुब्राह्मणसंपत्तिमाह।। ।।अग्र्याःसर्वेषुवेदेषुश्रोत्रियो
ब्रह्मविद्युवा।। वेदार्थविज्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णकः।। ।।सर्वेषुऋग्वेदादि
षुअनन्यमनस्कतयाव्याख्यासहिताध्ययनक्षमाअग्र्याः।। श्रोत्रियःश्रुताध्ययनसंपन्नः।
वक्ष्यमाणंब्रह्मयोवेत्तिसब्रह्मवित्।। युवामध्यमवयस्कः।। सर्वस्येदंविशेषणं।। मंत्र
ब्राह्मणयोरर्थंवेत्तीतिवेदार्थवित्।। ज्येष्ठसामसामविशेषस्तदध्ययनांगव्रतंचतद्व्र
ताचरणेनयस्तदधीतेसज्येष्ठसामा।। त्रिमधुःऋग्वेदैकदेशस्तद्व्रतंचतद्व्रताचरणे
नतदध्यायीत्रिमधुः।। त्रिसुपर्णकःऋग्यजुषोरेकदेशस्तद्व्रतंचतदाचरणेनयस्तदधी
तेसत्रिसुपर्णकः।। एतेब्राह्मणाःश्राद्धसंपदइतिवक्ष्यमाणेनक्रियासंबंधः।। ।।स्वस्री
योनातिनेयः।। ऋत्विग्गुरुक्तलक्षणः।। जामातादुहितुर्भर्त्ता।। त्रिणाचिकेतोयजुर्वेदैकदेश
स्तद्व्रतंचतद्व्रताचरणेनतदध्यायीत्रिणाचिकेतः।। अन्यत्प्रसिद्धं।। एतेचपूर्वोक्ताग्र्या
श्रोत्रियाद्यभावेवेदितव्याः।। एषवैप्रथमःकल्पःप्रदानेहव्यकव्ययोः।। अनुकल्पस्त्व
यंज्ञेयःसदासद्भिरनुष्ठितः।। इत्यभिधायमनुनास्वस्रीयादीनामभिहितत्वात्।। कर्मनिष्ठा
स्तपोनिष्ठाःपंचाग्निर्ब्रह्मचारिणः।। पितृमातृपराश्चैवब्राह्मणाःश्राद्धसंपदः।। ।।

 विद्धप्रजननेशिश्नेयेनछिन्नशिश्नइत्यर्थः ४७

४७ कर्मनिष्ठ विहितानुष्ठानतत्पराः। तपोनिष्ठास्तपःशीलाः॥ सभ्यावसथ्यौ त्रेता
त्रयश्च यस्य स इति सपञ्चाग्निः। विद्याध्यायी च ब्रह्मचारी उपकुर्वाणको नैष्ठिकश्च
। पितृमातृपरास्तत्सुश्रूषापराः॥ चकारात्॥ ज्ञाननिष्ठादयो ब्राह्मणा न क्षत्रियादयः।
श्राद्धसंपदे श्राद्धेषु अक्षयफलसंपत्तिहेतवः॥ ॥ वर्ज्यानाह॥ ॥रोगीहीनाति
रिक्ताङ्गः काणः पौनर्भवस्तथा॥ अवकीर्णी कुंडगोलौ कुनखी श्यावदन्तकः॥ ॥
रोगी महारोगोपसृष्टः॥ हीनमतिरिक्तं वाङ्गं यस्यासौ हीनातिरिक्ताङ्गः। एकेना
क्ष्णा यो न पश्यति स काणः। एतस्मादेवांधबधिरविद्धप्रजननखलतिश्चर्म
प्रभृतयो। निरस्ताः। पुनर्भूः स्त्रीलक्षणा तस्यां जातः पौनर्भवः। अवकीर्णी ब्रह्म राम
चार्येव स्खलितब्रह्मचर्यः। कुंडगोलौ। परक्षेत्रे प्रसूतौ। येतौ दासुतौ कुंडगोलकौ॥
पत्यौ जीवति कुंडः स्यान्मृते भर्तरि गोलकः॥ इत्येवंलक्षणौ। कुनखी संकुचितनखः।
श्यावदन्तः स्वभावकृष्णदन्तः। एते श्राद्धे निषिद्धा इति वक्ष्यमाणेन संबंधः॥ ॥
भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः॥ मित्रध्रुक्पिशुनः सोमविक्रयी प
रिविंदकः॥ वेतनग्रहणेन यो ध्यापयति स भृतकाध्यापकः। वेतनदानेन यो धीते सो
पि। क्लीबो नपुंसकः। असद्भिः तद्भिर्वी दोषैः कन्यां दूषयिता कन्यादूषी। सत्ता अस

भृतकेन अध्यापको ऽस्यास्ति व्यधिकरणबहुव्रीहिणा ४७
१२

तावाब्राह्मणस्यादिना॥ अभियुक्तो मिथ्याभिशस्तः॥ मित्रध्रुक् मित्रद्रोही मित्रस्यापकारी॥ प
रदोषकीर्त्तनशीलः पिशुनः॥ सोमविक्रयी यज्ञे सोमस्य विक्रेत्ता॥ परिविंदकः परि
वेत्ता॥ ज्येष्ठे अकृतदाराग्निपरिग्रहे वायः कनीयान् दारपरिग्रहं करोति अग्निपरि
ग्रहोस्थितः परिवेत्ता स विस्मृतः परिवेत्तिस्तु पूर्वजः इति॥ एवं दारस्याग्निकार्ये पि॥
परिवित्तिः परिवेत्ता यया च परिविद्यते सर्वे ते नरकं दारस्याजकपंचमो इति व
चनात्॥ ॥मातापितृगुरुत्यागी कुंडाशी वृषलात्मजः॥ परपूर्वापतिः स्ते
नः कर्मदुष्टाश्च निंदिताः॥ ॥विनाकारणेन मातापितृगुरुंस्त्यजंति स मातापि
तृगुरुत्यागी। एवं भार्यासुतस्याप्यपि॥ वृद्धौ च मातापितरौ साध्वी भार्या सुतः शि
शुः॥ अथकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्॥ इति समाननिर्देशात्॥ कुंडस्या
न्नं यो श्नाति स कुंडाशी। तत्सुतो वृषलात्मजः॥ परपूर्वा पुनर्भूः तस्याः पतिः पर
पूर्वापतिः॥ अदत्तादायी स्तेनः॥ कर्मदुष्टाः शास्त्रविरुद्धकारिणः स्वकारात्पुक
त्वं देवलकप्रभृतयः॥ एते श्राद्धे निंदिताः प्रतिषिद्धाः॥ अग्र्याः सर्वेषु वेदेषु सो
दिनाम्ना द्वायोग्यब्राह्मणप्रतिपादनेनैव तद्व्यतिरिक्तानामप्ययोग्यत्वसिद्धेः पुनः
केषांचिद्रोग्यादीनां प्रतिषेधवचनमुक्तलक्षणब्राह्मणासंभवे प्रतिषेधरहितानां

४८ प्रास्पर्शः॥ ॥एवं श्राद्धकालान्ब्राह्मणांश्चोक्त्वा अधुना पार्वणप्रयोगमाह॥ ॥निमंत्र
येत पूर्वेद्युर्ब्राह्मणानात्मवाञ्छुचिः॥ तैश्चापि संयतैर्भाव्यं मनोवाक्कायकर्मभिः॥ पू
र्वोक्तान्ब्राह्मणान् श्राद्धकृत् क्षिपन्नामि ति पूर्वेद्युः निमंत्रयेत प्रार्थनया आह्वानक
पगमयेत्। पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते॥ निमंत्रयेत त्र्यव
रान्सम्यग्विप्रान्यथोदितानिति मनुस्मरणात्। आत्मवानुक्तो क्रोधप्रमादरहितश्च
न। यदा आत्मवानिति नियतेन्द्रियो भवेत्। शुचिः प्रयतश्च। तैरपि निमंत्रितैर्ब्राह्म
णैर्मनोवाक्कायकर्मभिः व्यवायादिः संयतैर्नियतैर्भवितव्यमिति॥ ॥अपराह्णे स
मभ्यर्च्य स्वागतेनागतांस्तु तान्। पवित्रपाणिराचान्तानासनेषूपवेशयेत्॥ ॥ राम
अपराह्णे उक्तलक्षणे तान्विप्रान्निमंत्रितानाहूय स्वागतवचनेन पूजयित्वा कृतपा
दधावनानाचान्तान् कुशासनेषूपवेशयेत् पवित्रपाणिः। पवित्रपाणिरुपवेशयेत्। य
द्यपि सामान्येनापराह्णे इत्युक्तं। तथापि कुतपप्रारम्भस्तदादिपंचसु मुहूर्तेषुप
रिसमापनं श्रेयस्करं। अह्नो मुहूर्ता विख्याता दश पंच च सर्वदा॥ तत्राष्टमो
मुहूर्तो यः स कालः कुतपः स्मृतः॥ मध्याह्ने सर्वदा यस्मान्मंदीभवति भास्करः।
तस्मादनंतफलदस्तत्रारंभो विशिष्यते॥ ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयं।

मुहूर्ते पंचके चैतत्स्वधाभवनमिष्यते। इति वचनात्। तथान्यदपि श्राद्धे पयोगि कुतपाख्य स
प्तमे कमुहूर्त्ते मध्याह्नः स्वद्रुपात्रं वत्तथा नेपालकंबलः॥ सूप्यं दर्भास्तिला गावो। दौहि
त्रश्चाष्टमः स्मृतः॥ पापं कुत्सितमित्याहुस्तस्य संतापकारिणः॥ अष्टावेते यतस्तस्मात्कु
तपा इति विश्रुता इति॥ ॥युग्मान्दैवे यथाशक्ति पित्र्येऽयुग्मांस्तथैव च॥ परिश्रितेष्वशुचौ
देशे दक्षिणाप्लवेन तथा॥ ॥दैवे आभ्युदयिके श्राद्धे युग्मान् समान्ब्राह्मणानुपवेश
येत्। कथं यथाशक्ति। शक्तिमननतिक्रम्य। तत्रैव वैश्वदेवे द्वौ। नान्द्यादीनां तिसृणामेकैक
स्या द्वौ द्वौ। तिसृणां वा द्वौ॥ एवं पित्रादीनां त्रयाणामेकैकस्य द्वौ द्वौ। एवं मातामहादीनां चा
वर्गत्रये पि वैश्वदेविके एव कृतं तंत्रं वा। कर्मणां युगपत्प्रावृत्तेत्र्यां पित्र्ये पार्वणे श्राद्धे ऽ
युग्मान् नुपवेशयेदिति संबध्यते। एतच्च परिश्रिते सर्वतः प्रच्छादिते। शुचौ गो
मयादिना पलिप्ते दक्षिणाप्रवणे दक्षिणतो वनते दैवे कार्यं॥ ॥द्वौ दैवे प्राक्त्रीन्पि
त्र्योदगेकैकमेव वा॥ मातामहानामप्येवं तंत्रं वा वैश्वदेविकं॥ ॥अयुग्मान् पित्र्ये
इति पार्वणश्राद्धगर्भूते वैश्वदेवे युग्मप्रसंगं दर्शयितुमारभ्यते। द्वौ दैव इति वैश्वदेवे द्वौ
ब्राह्मणौ प्राङ्मुखावुपवेशयेत्। पित्र्ये त्वयुग्मानिति विशेषप्रसंगे विशेष उच्यते। त्रयः पित्र्य
इति पार्वणसंज्ञश्राद्धकर्मणि पित्र्ये पि दक्षिणाग्रे त्रय उदङ्मुखा उपवेश्याः॥ पक्षांतरमाह॥

४७ एकैकमेव वा दैवे पित्र्ये च एकैकमुपवेशयेत्। संभवतो विकल्पः। मातामहानामपि
श्राद्धं निमंत्रणादि। द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेवमेवमत्र पितृश्राद्धेन कर्तव्यं।
पितृश्राद्धं मातामहश्राद्धं च वैश्वदेविकं वैश्वदेवं तंत्रेण वा कर्तव्यं यदा तु द्वावेव ब्राह्म
णौ लब्धौ तदा वैश्वदेवे पात्रं प्रकल्प्य उभयपात्रे एकैकं ब्राह्मणं नियुंज्यात्। यथाह वसि
ष्ठः। यद्येकं भोजयेत् श्राद्धे दैवं तत्र कथं भवेत्। अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च
॥ देवायतने कृत्वा ततः श्राद्धं प्रवर्तयेत्। प्रास्येदग्नौ तदन्नं च दद्याद्वा ब्रह्मचारिणे इति
॥ ॥ पाणिप्रक्षालनं दत्वा विष्टरार्थं कुशानपि। आवाहयेदनुज्ञातो विश्वेदेवास इत्यृ
चा॥ ॥ तदनंतरं वैश्वदेवार्थं ब्राह्मणहस्ते जलं विष्टरार्थं कुशांश्च युग्मान् द्विगुणि राम
तानासनं दक्षिणतो दत्वा विश्वान्देवानावाहयिष्य इति ब्राह्मणान्पृष्ट्वा तैरावाहय
स्वेत्यनुज्ञातो विश्वेदेवास आगत इत्यनया ऋचा। आगच्छंतु महाभागा विश्वेदेवा महाबलाः
॥ ये यत्र विहिताः श्राद्धे सावधाना भवंतु ते इत्यनेन स्मार्तमंत्रेण तानावाहयेत्।
एतच्च यज्ञोपवीतिना सव्येन प्रदक्षिणं च कार्यं॥ अपसव्यं ततः कृत्वा पितृणा
मप्रदक्षिणमिति पित्र्ये विशेषश्रवणात्॥ ॥ यवैरन्ववकीर्याथ भाजने सपवित्रके।
शन्नोदेव्या पयः क्षिप्त्वा यवोसीति यवांस्तथा॥ या दिव्या इति मंत्रेण हस्तेष्वर्घं विनि

क्षिपेत् । ततो वैश्वदेवार्घपात्रासनस्य समीपे भूमिं प्रोक्ष्य दक्षिणेपन्यावेरास्तीर्य अनंतरं तैजसादिना
जनेसपवित्रके कुशयुग्मान्तर्हिते तेरान्नेहे नीरभेद पइतिमंत्रेण पयः क्षिप्त्वा यवोसि धान्यपूरितो
वेहाद्विनामंत्रेण पवान् । ततो गंधपुष्पाणि चाक्षिप्यानंतरस्य घेपात्रवित्रांतर्हिते पुत्रा सएहस्तेषु
पादि प्याआपटसादिमंत्रेण विश्वेदेवाइदं वो ऽर्घ्यामि सचोदकं विनिक्षिपेत् । दत्वोदकं गंधमा
ल्यं धूपदानं सदीपकं । अथ करशौचार्घमुदकं दत्वा पश्चात्क्रमेण गंधपुष्पधूपदीपदानं कुर्यात् ।
तथाच्छादनदानं च । गंधादीनां च स्वस्वसंतमौक्तो विशेषो द्रष्टव्यः । चंदनं कुंकुमं कर्पूरागरुकंपू
कान्यनुलेपनार्थमिति विष्णुनोक्तं । पुष्पाणि च । श्राद्धे जातयः प्रशस्ताः सुमल्लिका श्वेतयूथि
का । जलोद्भवानि सर्वाणि कुसुमानि च चंपकं । उत्साद्युक्तानि । वर्ज्यानि च । उग्रगंधीन्यगंधीनि । ५४
चैत्यवृक्षोद्भवानि च ॥ पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च ॥ न कंटकिजं कंटकिजमपि शुक्लं
सुगंधि यत्तु न दद्यात् रक्तं दद्यात् सरक्तमपि च कुंकुमं जलजं च दद्यात् । इत्यादीनि द्रव्याणि
। धूपे च विष्णुना विशेष उक्तः ॥ प्राण्यंगं सर्वधूपार्थं न दद्यात् । घृतमधुसंयुक्तं गुग्गुलश्रीखंडा
गुरुदेवदारुसरलादि दद्यादिति ॥ दीपे च विशेषः शंखेनोक्तः ॥ घृतेन दीपो दातव्यस्तिलतैले
न वा पुनः ॥ वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत् । आच्छादने वस्त्रमुक्तं नवमहतं सदशोर द्यादि
ति । एतच्च सर्वं वैश्वदेवानुष्ठानं प्राङ्मुख उदङ्मुखो वा कुर्यात् । पित्र्यं च दक्षिणामुखः । यथाह बृ
हस्पतिः ॥ उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः ॥ प्रदद्यात्पार्वणे सर्वं दैवपूर्वं विधा

५० नतइति॥ ॥अपसव्यंततःकृत्वापितॄणामप्रदक्षिणं। द्विगुणांस्तुकुशान्दत्वाह्युशंतस
स्त्वेत्यृचापितॄन्॥आवाह्यतदनुज्ञातोजपेदायंतुनस्ततः॥ ॥ततोवैश्वदेविकार्च
नंतरंअपसव्यंयज्ञोपवीतंप्राचीनावीतंकृत्वाअत्रततइतिवदताक्रमानुसमयोदर्शितः।
पित्रादीनांत्रयाणांअयुग्मान्कुशान्द्विगुणभुग्नान्प्रदक्षिणंवामतोविष्टरार्थमासनेषू
दकपूर्वंदत्वापुनरुदकंदद्यात्॥अपःप्रदायद्विगुणभुग्नास्तुकुशान्दत्वाअपःप्रदायेतिआ
श्वलायनस्मरणात्।एतच्चार्घ्यंतयोरुदकदानंवैश्वदेवेपित्र्येचप्रतिपदार्थंद्रष्टव्यं॥अ
थपितॄन्पितामहान्प्रपितामहान्आवाहयिष्यइतिब्राह्मणान्पृष्ट्वाआवाहयेति
तैरनुज्ञातःउशंतस्त्वेत्यृचापित्रादीनावाह्यआयंतुनःपितरइतिमंत्रेणोपतिष्ठेत॥ ॥ राम
यवार्थास्तुतिलैःकार्याःकुर्यादर्घ्यादिपूर्ववत्॥दत्वार्घ्यंसंस्रवांस्तेषांपात्रेकृत्वाविधानतः।
पितृभ्यःस्थानमसीतिन्युब्जंपात्रंकरोत्यधः॥ ॥यवार्थयवसाध्यानिकार्याणिअवकिर
णादीनितिलैः।कार्याणि।ततोर्घ्यपात्रसाधनाद्याच्छादनांतंपूर्ववत्कुर्यात्॥तत्रायंविशे
षः।तिलानपहताअसुरारक्षांसीत्यनेनमंत्रेणब्राह्मणान्परितोऽपदक्षिणमव
कीर्यपात्रेषुराजतादिपात्रेषुअयुग्मकुशनिर्मितकूर्चांतर्हितेषुशंनोदेवीरित्यपःक्षिप्त्वाति
लोसिसोमदेवत्यइत्यादिमंत्रेणतिलान्गंधपुष्पाणिचक्षिप्त्वास्वधार्घ्यइतिब्राह्मणा
नांपुरतोऽर्घ्यपात्राणिस्थापयित्वायादिव्याइतिमंत्रांतेपितरिदंतेर्घ्यंपितामहेदंतेर्घ्यंप्र ५०

पितामहेदत्तेऽर्घ्येनिनिब्राह्मणानांहस्तेऽर्घंदद्यादेकैकमुभयत्रैवेत्यस्मिन्नपिपक्षेपात्रत्र
यंकार्यं।एवमर्घ्यंदत्वातेषांमर्घ्याणांसंस्रवान्ब्राह्मणहस्तगलितान्पर्घोदकानिपितृ
पात्रेस्थाप्यहीत्वादक्षिणाग्रेकुशास्तीर्णभूमौनिधायतस्योपरिपितृभ्यःस्थानमसीत्यनेनमं
त्रेणतत्पात्रंसुब्जमधोमुखंकुर्यात्।तस्योपरिअर्घ्यपात्रपवित्राणिनिदध्यात्।अनं
तरंगंधपुष्पधूपदीपाच्छादनादीनिपितरयंतेगंधःपितरिदंतेपुष्पमित्यादिप्रयोगेण
दद्यात्।अग्नौकरिष्यन्नादायघृतसमन्वितंतत्कृतं।कुरुस्वेत्यभ्यनुज्ञातोहुत्वाग्नौपितृय
ज्ञवत्।हुतशेषंप्रदद्यात्भाजनेषुसमाहितः॥यथालाभोपपन्नेषुरौप्येषुचविशेषतः॥
॥अनंतरमग्नौकरिष्यन्नन्नघृताक्तमन्नमादायब्राह्मणान्पृच्छेत्।अग्नौकरिष्ये
इतिघृतग्रहणंसूपशाकादिनिवृत्त्यर्थं।ततस्तैःकुरुष्वेत्यभ्यनुज्ञातःप्राचीनावीतीग्नि
मुपसमाधायमेक्षणेनावदायसंपदानुरूपात्।सोमायपितृमतेस्वधानमः।अग्न
येकव्यवाहनायस्वधानमइतिपिंडपितृयज्ञकल्पेनाग्नौहुत्वामेक्षणमनुप्रहृत्यहुतशे
षमन्नमयवर्ज्यंयथालाभोपपन्नेषुविशेषतोरौप्येषुपित्रादिभाजनेषुदद्यात्।नवैश्वदे
वभाजनेषुसमाहितोऽनन्यमनस्कः।अत्रयद्यप्यग्नौहस्तविशेषेणोक्तेतथाप्याहि
ताग्नेःसर्वाधानपक्षेउपासनाग्नेरभावात्पिंडपितृयज्ञानंतरभाविनिपार्वणःश्राद्ध

५१ विच्छिन्नदक्षिणाग्नेः संनिधानाद्दक्षिणाग्नौ। कर्मसमर्थविप्रहस्ताभावविषयस्यापवादद
र्शनात्। यथाह मार्कण्डेयः॥ आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः॥ अनाहि
ताग्निस्त्वौपसदे अग्न्यभावे द्विजेऽप्सु वेति। अर्धाधानपक्षे त्वौपासनाग्निसद्भावादाहि
ताग्नेरनाहिताग्नेश्चौपासनाग्नावग्नौकरणहोमः। एवमन्वष्टकादिषु त्रिष्वपि पि
तृयज्ञकल्पातिदेशात्। काम्यादिषु चतुर्षु ब्राह्मणपाणावेव होमः। यथाहुर्गृह्यकाराः॥
अन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पार्वणं॥ काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्ट
मं॥ चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते॥ पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतु
र्ष्वपि॥ ॥ अस्यार्थः॥ हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाश्चतस्रोऽष्ट
का विहिताः। तत्र नवम्यां यत्क्रियते तदन्वष्टक्यं। सप्तम्यां तु क्रियमाणं पूर्वेद्युर्मा राम
सि कृष्णपक्षे पञ्चमीप्रभृतिषु यस्यां कस्यांचित्तिथावन्वष्टकातिदेशेन यद्विहितं।
अमावास्यायां पिण्डपितृयज्ञानन्तरं यद्विहितं तत्पार्वणं। स्वर्गादिकामानां कृत्तिका
दिषु नक्षत्रेषु यद्विहितं तत्काम्यं। अभ्युदयेषु तडागारामदेवताप्रतिष्ठादिषु यद्विहि
तं। अष्टम्यां याऽष्टका विहिता। एकोद्दिष्टं अत्रैकोद्दिष्टशब्देन सपिण्डीकरणं लक्ष्य
ते। तत्रैकोद्दिष्टस्यापि संभवात्। साक्षादेकोद्दिष्टे तदभावात्। अग्नौकरणस्याभा ५१

वहस्पर्च:। अथ प्राग्स्वभाय्यकारमतेन साग्नेः सदैकोद्दिष्टे पि पाणिहोमस्य सम्बद्धावैद
कोद्दिष्टमेव। एतेषामष्टानामाद्येषु चतुर्षु साग्निकस्याग्नौ होम:। उत्तरेषु चतुर्ष्वपि पित्र
ब्राह्मणहस्ते निरग्निकस्यापि प्रमीतपितृकस्य द्विजस्य पार्वणे नित्यमिति तस्यापि पाणा
वेव होम:। न निर्वपति य: श्राद्धं प्रमीतपितृको द्विज:। इंदुक्षये मासि मासि प्रायश्चित्तीयते
तु स इति वचनात्। एवं काम्याभ्युदयिकाष्टकैकोद्दिष्टेष्वपि पाणावेव होम:। अग्न्य
भावे तु विप्रस्य पाणावेवोपपादयेदिति मनुस्मरणात्। पाणिदत्तस्य पृथक् ग्रासप्रति
षेधश्च स्मृत्यर्थे। यथाकुर्यात् सकारा:। अन्नं पाणितले दत्तं पूर्वमश्नंत्यबुद्धय:। पितरस्ते
न तृप्यंति शेषान्नं न लभंति ते।। यच्च पाणितले दत्तं। यच्चान्यदुपकल्पितं। एकीभावेन
भोक्तव्यं पृथग्भावो न विद्यते इति।। ।। दत्वान्नं पृथिवी पात्रमिति पात्राभिमंत्रणं।।
कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत्। अन्नमोदनसूपपायसघृतादिकं भोज
नेषु दत्वा पृथिवि ते पात्रमित्यादिना मंत्रेण पात्राभिमंत्रणं कृत्वा इदं विष्णुर्विचक्रमे त्र
येत मंत्रेणान्ने द्विजांगुष्ठं निवेशयेत्। तत्र चैव स्वदेवे यज्ञोपवीती। नी विष्णो हव्यं रक्ष
ति पित्र्ये प्राचीनावीती विष्णो कव्यं रक्षेति। विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति वै क्रमा
दिति स्मरणात्।। ।। सत्यादर्ति कां गायत्रीं मधुवाता इति स्यं च।। जप्त्वा पश्चात् सुखं वा

५२ चभुंजीरंस्तेपिवाग्यताः॥ ॥अनंतरंविप्रेभ्योदेवेभ्यइदमन्नंपरिविष्टंपरिवेक्ष्यमाणं
चास्त्वितियवोदकेननिवेद्य।तथापित्रेअमुकगोत्रायामुकशर्मणेइदमन्नंपरिवेक्ष्य
माणंचास्तुस्वस्तितिलोदकेनपित्र्येनिवेद्यैवंपितामहप्रपितामहायचेतिनिवेद्यानंतर
मपोशानंदत्वापूर्वोक्ताभिर्व्याहृतिभिःसहितांगायत्रींमधुवाताऋतायतइतित्र्यृचं।मधुमध्विति
वारत्रयंजप्त्वायथासुखंजुषध्वमितिब्रूयात्।संकल्प्यपितृदेवेभ्यःसावित्रींमधुसंज्ञ
पः॥श्राद्धेविप्राःपोशानंजुषस्वेत्यथभोजनं॥तथा।गायत्रींत्रिःसकृद्वापिजपेद्व्याहृ
तिपूर्विकां॥मधुवाताइतीत्र्यृचंमध्वित्येतत्त्रिकंतथा।इतिपारस्करादिवचनात्।
भुंजीरंस्तेपिवाग्यताः।तेपिब्राह्मणावाग्यतामौनिनोभुंजीरन्॥ ॥अन्नमिष्टंहवि राम
ष्यंचदद्यादक्रोधनोत्वरः।आतृप्तेस्तुपवित्राणिजप्त्वापूर्वजपंतथा॥ ॥अन्नंभ
क्ष्यभोज्यलेह्यचोष्यपेयात्मकंपंचविधं।इष्टंयच्चब्राह्मणोयप्रेतायुकेत्रैवारोचते।
हविष्यंश्राद्धहविर्योग्यंव्रीहिशालियवगोधूममुद्गमाषमुन्यन्नकालशाकमहाशल्के
लाम्रंजीमरीचहिंगुगुडशर्कराकर्पूरसैंधवसांभरपनसनालिकेरकदलीबदर
गव्यपयोदधिघृतपायससमधुमांसप्रभृतिस्मृत्यंतरप्रसिद्धंवेदितव्यं।हविष्यानि
स्सनेनैवायोग्यस्यस्मृत्यंतरप्रतिषिद्धस्यकोद्रवमसूरचणककुलत्थपुलाकानि

कश्मीरदेशेकुरमकल्लेतिप्रसिद्धः१ मत्स्यविशेषः२ ४

ध्यानराजमाषकूष्माण्डवंशीकवृहतीपोपोदकीवंशांकुरपिप्पलीववाऽसानुपूष्योषाविरलवण
माहिषचामरक्षीरदधिघृतपायसादीनां निवृत्तिः ॥ अक्रोधनः शौचहेतुसंभवेपि । अत्वरः
अप्रमत्तः ॥ आह्रियेद्वाद्यादिति संबंधः ॥ तुराद्वात्तु यथाकिंचिच्छिद्यन्ते तथा स्यात् । उक्तं
चणस्य ह्यास्वर्गे भागधेयत्वात् । उक्तं स्मृतौ भूमिगतं मत्रिलसस्याश्च तस्य च ॥ दासवर्गस्य तत्सि
त्रेभागधेयं प्रचक्षते ॥ ॥ इति मनुस्मरणात् ॥ ॥ तथा आत्तसैः पवित्राणि पुरुषसूक्तं
पावमानप्रभृतीनि जप्यानि स्नानद्धाय पूर्वोक्तं जपेच्च सर्वं दृष्टिका भिसाधुकं जपेत् ॥ ॥
अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च ॥ तदन्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत्सकृ
त् ॥ ॥ अनंतरं सर्ववर्णमादाय तृप्ताः स्थ इति तान् पृच्छेत्तृप्ताः स्मः इति तैः प्रत्युक्ते
शेषमन्नम स्तिकिंक्रियतां इति पृच्छेत् । इष्टैः सहोपभुज्यतामिति अभ्यनुज्ञातस्तदन्नं पितृ
स्थाने ब्राह्मणस्य पुरस्तादुच्छिष्टसंनिधौ दक्षिणाग्रदर्भान्तर्हितायां भूमौ तिलोदकप्रक्षेप
पूर्वकं ये अग्निदग्धाः इत्यनया चोनिक्षिप्य पुनस्तिलोदकं प्रक्षिपेत् । तदनंतरं ब्राह्मणहस्ते
पुनर्दूषार्थं सकृत्सकृदपो दद्यात् ॥ ॥ सर्वमन्नमुपादाय सतिलं दक्षिणामुखः ॥ उच्छिष्ट
संनिधौ पिंडान् दद्याद्वै पितृयज्ञवत् ॥ ॥ सिंडपितृयज्ञकल्पातिदेशेन चरुश्रपणसमये
अग्नौ करणशिष्टशेषेण सह सर्वान्नमुपादाय अग्निसंनिकर्षे पिंडान्दद्यात् ॥ तदभावे
ब्राह्मणैकार्थं सार्ववर्णिकमन्नमुपादाय सतिलं तिलमिश्रं दक्षिणामुखः उच्छिष्टसंनिधौ

५३ पिंडपितृयज्ञकल्पेन पिंडान् दद्यात्।। मातामहानामप्येवं दद्यादाचमनं ततः।। स्वस्तिवाच्यं तत
तः कुर्यादक्षय्योदकमेव च।। ।।मातामहानामपि विश्वेदेवावाहनादि पिंडप्रदानपर्यंतं कर्म
एवमेव कर्तव्यं।। ।।अनंतरं ब्राह्मणानामाचमनं दद्यात्।। ततः स्वस्तीति ब्रूतेति ब्राह्मणा
न्स्वस्तिवाचयेत्तैश्च स्वस्तीत्युक्ते अक्षय्यमस्त्विति ब्रूतेति ब्राह्मणहस्ते उदकदानं कुर्या
त्।। तैश्चाक्षय्यमिति वक्तव्यं।। ।।दत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत्।। वाच्य
तामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यतां।। ।।अनंतरं यथाशक्ति हिरण्यरजतादि दक्षिणां
दत्वा स्वधां वाचयिष्ये इत्युक्ते ब्राह्मणैर्वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः पित्रादिभ्यो मा
तामहादिभ्यश्च स्वधोच्यतामिति स्वधाकारमुदाहरेत्।। ।।ब्रूयुरस्तु स्वधेत्युक्ते भूमौ राम
सिंचेत्ततो जलं।। विश्वेदेवाश्च प्रीयंतां विप्रैश्चोक्ते इदं जपेत्।। ।।ते च ब्राह्मणा अस्तु
स्वधेति ब्रूयुः। तैरेवमुक्ते अनंतरं कमंडलुना उदकं भूमौ सिंचेत्। ततो विश्वेदेवाः प्री
यंतामिति ब्रूयात्।। ब्राह्मणैश्च प्रीयंतां विश्वेदेवा इत्युक्ते इदमनंतरोच्यमानं च जपेत्।। ।।
दातारो नोभिवर्द्धंतां वेदाः संततिरेव च।। श्रद्धा च नो मा व्यगमद्बहुदेयं च नोस्त्विति।।
।।दातारो हिरण्यादेः नः अस्माकं कुले अभिवर्द्धंतां बहवः संतु वेदाश्च वर्द्धंतां।। अ
ध्ययनाध्यापन तदर्थज्ञानानुष्ठानद्वारेण। संततिश्च पुत्रपौत्रपरंपरया। श्रद्धा

चपित्र्येकर्मणिआस्था।नअस्माकंमावैमनस्यमस्तु।मापगच्छतु।देयंचहिरण्यादिवहुमप
र्यंतंअस्माकंभवत्वितिजपेदित्सम्वयः॥ ॥इत्स्कन्दोक्ताप्रियावाचः प्रणिपत्यविस
र्जयेत्॥वाजेवाजइतिप्रीतः पितृपूर्वंविसर्जनं॥ ॥एवंपूर्वोक्तप्रार्थनामंत्रंजपइत्युक्ता
व्रियावाचः प्रीतिकराणिवाक्यानि।धन्यावयंभवच्चरणकमलयुगलरजःपवित्रीकृ
तमस्मन्मंदिरंतत्काधन्यानयालोकेरामाविगणपाभवद्भिरनुगृहीतावयमित्येवंरूपाः।
प्रणिपत्यप्रदक्षिणपूर्वकंनमस्कृत्यविसर्जयेत्।कथंविसर्जयेदित्याह।वाजेवाजेव
तवाजिनोनइत्यनयर्चापितृपूर्वप्रपितामहादिविश्वेदेवांतंदर्भान्वारंभणे
नउत्तिष्ठतपितरइतिप्रीतः सुप्रीतमनाविसर्जनंकुर्यात्॥ ॥यस्मिंस्तेसंस्रवाः पूर्वम
र्घपात्रेनिवेशिताः॥पितृपात्रंतदुत्तानंकृत्वाविप्रान्विसर्जयेत्॥ ॥यस्मिन्नर्घपात्रेपूर्व
मर्घदानानंतरंतेसंस्रवाब्राह्मणहस्तगलितार्घोदकानिनिवेशिताः स्थापिताःस्वपि
तृपात्रेत्युक्तसदुत्तानमूर्ध्वमुखंकृत्वाविप्रान्विसर्जयेत्।एतच्चाशीर्मंत्रजपादूर्ध्वंवा
जेवाजइत्यतः प्राग्द्रष्टव्यंकृत्वाविसर्जीयादितिकात्यायनसूत्रवचनात्॥ ॥प्रदक्षिणमनु
व्रज्यभुंजीतपितृसेवितंब्रह्मचारीभवेत्तांतुरजनींब्राह्मणैःसहअनंतरंआसीमांतेब्राह्म
णाननुव्रज्यतेराप्यतामित्यनुज्ञातः तान्प्रदक्षिणीकृत्यप्रतिनिवृत्तः पितृसेवितंश्राद्ध
शिष्टमिष्टं।सहभुंजीतनियमएवायं।नपरिसंख्या।मांसंतुयथारुचीतिद्विजकाम्यये

५४ यत्रोक्तं। यस्मिन् दिने श्राद्धं कृतं तत्संबंधिनीं रात्रिं भोक्तृभिर्ब्राह्मणैः सह कर्ता ब्रह्मचारी भवेत्
तु श्राद्धात् पुनर्भोजनादिरहितः। पुनर्भोजनमध्वानं भाराध्ययनमैथुनं। दानं प्रतिग्रहं होमं श्रा
द्धभुक् अष्ट वर्जयेत्। दंतधावनं तांबूलं स्निग्धमभोजनं रसौषधपरान्नानि श्राद्धकृत्सर्
सं वर्जयेत्॥ इति वचनात्॥ एवं पार्वणश्राद्धमुक्त्वेदानीं वृद्धिश्राद्धमाह॥ ॥ एवं प्रदक्षि
णावृत्को वृद्धौ नांदीमुखान् पितॄन्॥ यजेत दधिकर्कंधुमिश्रान् पिंडान् यवैः क्रियाः॥ ॥
वृद्धौ पुत्रजन्मादिनिमित्ते श्राद्धे एवमुक्तेन प्रकारेण पितॄन् यजेत पूजयेत्। तत्र विशेषमाह।
प्रदक्षिणावृत्क इति प्रदक्षिणमावृत्त अनुष्ठानपद्धतिर्यस्यासौ प्रदक्षिणावृत्कः प्रदक्षि
णमुपचार इति यावत्। नांदीमुखानिति पितॄणां विशेषणं मत आवाहनादौ नांदीमुखा
न्पितॄनावाहयिष्ये नांदीमुखान्पितामहानित्यादिप्रयोगो द्रष्टव्यः। कथं यजेत तत्राह। राम
दधिकर्कंधुमिश्रानिति। कर्कंधु बदरफलं दध्ना बदरफलैश्च मिश्रान्पिंडान्दत्वा यजे
तेति संबध्यते। तिलसाध्याः क्रियाः सर्वा यवैः कर्तव्याः। अत्र च ब्राह्मणसंख्या दर्शितै
वा। द्वौ युग्मानेत्यत्र प्रदक्षिणावृत्कादिपरिगणनमन्येषामपि स्मृत्यंतरोक्तविशेषध
र्माणां प्रदर्शनार्थं। यथाहाश्वलायनः। आभ्युदयिके युग्मान्ब्राह्मणान्। अमूलादर्भाः।
प्रागग्रो यज्ञोपवीती स्यात्। प्रदक्षिणमुपचारो यवैस्तिलार्थो गंधादिदानं द्विर्द्विरंजुर

त्रीणां सन्नेदस्याग्यश्वोसिसोमदेवस्योगोसवोदेवनिर्मितः ॥ प्रत्नमद्भिः पृक्तः स्वधया नांदी-
मुखान्पितॄन्दनूप्तुमांल्लोकान्प्रीणाहि नः स्वाहेति यवावपनं विश्वेदेवा इदं वोर्घ्यं । नांदीमुखान्
पितर इदं वोऽर्घ्यमिति । यथालिंगमर्घप्रदानं । पाणौ होमो ग्नेयेकव्यवाहनाय स्वाहा । सोमाय
पितृमते स्वाहेति । मधुवाताऋतायत इति तृचस्थाने उपस्रेगापत इति पंचमधुमती । श्रावयेत्
॥ अक्षन्नमीमदन्तेति च पंक्ति ॥ आचांतेषु मुक्तेशयानगोमयेनोपलिप्तेषु प्राचीनाग्रान्द-
र्भान्संस्तीर्यतेषु पृषदाज्यमिश्रेण भुक्तशेषेणैकैकस्य द्वौ द्वौ पिंडौ दद्यादिति । यथाह शाता-
तपः । मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनंतरं ॥ ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृ-
तमिति । अत्र वश्राद्धे माघ्याणां पार्वणं द्विवत्पितृश्राद्धेष्वंततीयो नास्तीत्तेन प्रथमतमे-
चतासंकर्तव्यं । अत्र मातृश्राद्धे न पित्रादित्रयपत्नीमां ग्रहणं ॥ ॥ एकोद्दिष्टमाह ॥ ॥
एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं ॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥
एकोद्दिष्टं एक उद्दिष्टो यस्मिन्श्राद्धे तदेकोद्दिष्टमिति कर्मनामधेयं । शेषं पूर्ववदा-
चरेदिति ॥ उपसंहारा सार्वणसकलधर्मप्राप्तौ विशेषाभिधानात् । दैवहीनं विश्वे-
देवरहितं । एकार्घपात्रं एकं दर्भपवित्रं च । आवाहनाग्नौकरणहोमेन रहितं । अपस-
व्यवत् । प्राचीनावीतीब्रह्मसूत्रवत् । अनेनेतरश्लोकोक्तास्पुदविके यज्ञोपवीती त्वं सूचयति ॥ ।

५५ किंच॥ उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने। अभिरम्यतामिति वदेद्ब्रूयुस्तेभिरताःस्मह॥ स्वस्तिवाच्यं
ततः कुर्यादक्षय्योदकमेव च॥ तत्राक्षय्यस्थाने उपतिष्ठतामिति ब्रूयात् न वदेत्। ते चाभिरताः स्मः
विप्रविसर्जने कर्तव्ये वाजे वाजे वत इति जपानंतरं दर्भान्वेरमलेनाभिरम्यतामिति ब्रूयात् न वद
ते॥ ते चापि ब्राह्मणाः अभिरताः स्म ह इति ब्रूयुः। प्रसिद्धः शेषः प्रसिद्धपूर्ववदिति यावत्। एतच्च
मध्याह्ने कर्तव्यं। यथाह देवलः। पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकं॥ एकोद्दिष्टं तु मध्या
ह्ने प्रातर्वृद्धिनिमित्तकमिति॥ भुंजीरन्पितृसेवितमित्यस्य एकोद्दिष्टविशेषनिषेधोपवादः। नवश्रा
द्धेषु यच्छिष्टं गृहे पर्युषितं च यत्॥ दंपत्योर्भुक्तशेषं तु न भुंजीत कदाचन इति। नवश्राद्धं दर्शितं। प्र
थमेऽह्नि तृतीयेऽह्नि पंचमे सप्तमे तथा। नवमैकादशे चैव तन्नवश्राद्धमुच्यत इति॥ ॥सपिंडी
करणमाह॥ गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं॥ अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेच शम
येत्। ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्॥ एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रिया अपि॥
॥ गंधोदकतिलैर्युक्तं पात्रचतुष्टयमर्घसिद्ध्यर्थं पूर्वोक्तेन विधिना कुर्यात्। तिलैर्युक्तं पात्र
चतुष्टयं यद्यत्तत् पितृवर्गे चत्वारो ब्राह्मणगदत्रिताः। विश्वेदेवे द्वौ स्थितं दैव। तत्र प्रेतपात्रोद
कं किंचिद्वशेषं त्रिधा विभज्य पितृपात्रेषु सेचयेत्। ये समानाः समनस इति द्वाभ्यां मंत्राभ्यां
। शेषं विश्वेदेवावाहनादि विसर्जनांतं पूर्ववत् पार्वणवदाचरेत्। प्रेतार्घपात्रावशिष्टोदके
न प्रेतस्थाने ब्राह्मणहस्ते अर्घं दद्यात्। शेषमेकोद्दिष्टवत् समापयेत्। पित्र्येषु त्रिषु पार्वणवत्

षीसपिंडताइति। मृजुमनुवचनं। पितायस्यतुरत्रः स्याज्जीवेद्वापि पितामहः। पितुः
सनामसंकीर्त्यकीर्तयेत्स प्रपितामहमिति। तदपि श्राद्धप्रयोगनियमाय। न पिंडप्रदाना
र्थं कथं। प्रियमाणे च पितरि पूर्वेषामेव निर्वपेत्। पितायस्य प्रेतो न स्याज्जीवेद्वापि पिता
महः। सोपि पूर्वेषामेव निर्वपेत् इत्यन्वयः। पक्षद्वये कथं निर्वपेदित्याह। पितुः समो नो
सकीर्त्य कीर्तयेत्स प्रपितामहमिति। आवसन्ग्रहणेन सर्वत्र पितृभ्यः पितामहेभ्यः प्रपि
तामहेभ्य इत्येवं प्रयोगो न पुनः कदाचिदपि पितामहस्य प्रपितामहस्य प्रपितामहस्य
चादित्येव प्रपितामहस्य तत्पितुर्वा तत्समिति। अतश्च पित्रादिशब्दानां सर्व
त्रिवचनत्वात् प्रियमाणे पितरि पितुः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इति।
पितामहे प्रियमाणे पितामहस्य पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इत्यादि। अत
श्च पिंडपितृयज्ञे शुंधंतां पितर इत्यादिमंत्राणामूहो न भवति। यदपि विष्णुवचनं।
यस्य पिता प्रेतः स्यात्स पितुः पिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादि
ति। तस्याप्ययमर्थः। पितामहे प्रियमाणे प्रेते च पितरि पितुरेकं पिंडमेकोद्दिष्टविधि
नाविधाय पितुर्यः पितामहस्ततः पराभ्यां द्वाभ्यां दद्यादिति। पितामहस्तु स्वात्मनः प्रपि
तामहः संप्रदानभूतः स्थित एवेति। प्रपितामहाय ततः पराभ्यां द्वाभ्यां च दद्यादिति।

५७ शब्दप्रयोगनियमस्य पूर्वोक्तत्वात्। एवं गोत्रान्तरणादिह तस्याः पितृसपिंडीकरणाभावो वे
दितव्यः। यथाह कात्यायनः। ब्राह्मणादिहते ताते पतिते संगवर्जिते। व्युत्क्रमाच्च मृते दे
देयं येभ्य एव ददात्यसाविति। गोत्रान्तरणादिह तस्याः पितुः सपिंडीकरणासंभवे तन्मूल
स्य पितामहादिभ्यः पार्वणविधानमनुपपन्नमिति सपिंडीकरणाभावोवगम्यते। मातुः
पिंडदानार्हे गोत्रे विप्रतिपन्ने भर्त्तृगोत्रेण पितृगोत्रेण वा दातव्यमिति। उभयत्र वचननिर्दे
शात्। स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे। स्वामिगोत्रेण कर्त्तव्यास्तस्याः पिंडोद
कक्रियाः। इत्यादि भर्त्तृगोत्रविषयं वचनं। पितृगोत्रसमुत्पन्ने कुर्यात्स्वगोत्रतः। तन्म
न्त्रेव विपन्ने च नारीणां पितृकं कुलं। इत्यादि पितृगोत्रविषयं वचनं। एवं विप्रतिपन्ने आ राम
सुरादिविवाहेषु पुत्रिकाकरणे च पितृगोत्रमेव। ~~तन्न तत्र गोत्रविषयं वचनं। एवं वि~~
प्रतिपन्ने आसुरादि। तत्र विशेषवचनाद्दानस्यानिवृत्तेश्च। ब्राह्मादिषु विवाहेषु व्री
हियववत्। बृहद्रथन्तरवद्विकल्प एव मन्त्रश्च। येनास्य पितरो याता येन याताः पितामहाः
तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यतीति वचनाद्दशपरंपरायातसमाचारेण व्यव
स्था। एवंविधवैषयव्यतिरेकेणास्य वचनस्य विषयांतराभावात्। अत्र पुनः शा
स्त्रेतोन[illegible]व्यवस्थानोपाचो। एवंविधवैषयव्यतिरेकेणास्य वचनस्य विषया

तदभावे तु॥ यत्र पुनः शास्त्रतोऽन्यथा स्वशाखायां चारस्तत्रात्मनस्तुष्टिरेवेति वचनं [illegible]विध
दात्मनस्तुष्टिरेव व्यवस्थापिका। यथा गर्भाष्टमेऽष्टमे वाब्दे इति मातुः सपिंडीकरणेऽपि विरु
द्धानीव वाक्यानि दृश्यन्ते॥ तत्र पितामह्यादिभिः सार्द्धं सपिंडीकरणं स्मृतं तथा भर्त्रापि भा
र्यायाः स्वमात्रादिभिः सह वा भवेदिति। तत्र पितामह्यादिभिः सह सपिंडीकरणं कर्त्तव्य
मिति पैठीनसिराह॥ अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडतां। श्वश्र्वादिभिः सहैवास्याः
सपिंडीकरणं भवेदिति। पत्न्यासह सपिंडीकरणं यम आह। पत्न्या चैकेन कर्त्तव्यं सपिंडी
करणं स्त्रियाः। सा मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैरिति। उशनसा तु मातामहेन सा
पिंड्यमुक्तं। पितुः पितामहे यद्वत्पूर्णे संवत्सरे सुतैः। मातुर्मातामहे तद्वदेषा कार्या सपिंडता
॥तथा। पिता पितामहे योज्यः पूर्णे संवत्सरे सुतैः। माता मातामहे तद्व[illegible]त्याह भगवानुशि
नाः इति॥ एवंविधेषु वचनेषु सत्सु अपुत्रायां भार्यायां प्रमीतायां भर्त्ता स्वमात्रैव सा
पिंड्यं कुर्यात्। अन्वारोहणे तु पुत्रः स्वपित्रैव मातुः सापिंड्यं कुर्यात्। आसुरादिविवाहो
ढायाः पुत्रिकासुतश्च मातामहेनैव। ब्राह्मादिविवाहोढायाः पितामहेन पितामह
ह्या वा विकल्पेन कुर्यात्। अत्रापि यदि पत्नीवर्गे समाचारस्तदा तेनैव कुर्यात्।
वंशसमाचारोऽप्यनियतश्चेत्तदात्मनस्तुष्टिरेवेति॥ यथा स्वरुचि कुर्यादित्यन्ते।

५८ अत्र येनकेनचित्‌मातुः सापिंड्येऽपि यत्रान्वष्टकादिषु मातृश्राद्धं पृथग्विहितं। अन्वष्टकासु वृ
द्धौ च गयायां च क्षयेऽहनि। मातुः श्राद्धं पृथक्कार्यमन्यत्र पतिना सहेति। तत्र पितामह्यादिभिरे
व पार्वणं कर्तव्यं। अन्यत्र पतिना सहेति पतिसापिंड्ये तद्द्राभागित्वात्। मातामहसापिंड्ये तद्द्र
ाभागित्वान्नैव सह। यथाह शातातपः। एकमूर्तित्वमायाति सपिंडीकरणे हते। पत्नीप
तिपितॄणां च तस्मात्तेषु भागिनी। एवं च सति मातामहेन मातुः सापिंड्ये मातामहश्राद्धेऽपि
तच्छ्राद्धवन्नित्यमेव। पत्सापितामह्या वा मातुः सापिंड्ये मातामहश्राद्धं न नित्यं। उक्तेऽभ्यु
दयः। अत्रत्तेन प्रसंगात् इति निर्णयः॥ ॥अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत्॥
तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे॥ ॥संवत्सरादर्वाक्सपिंडीकरणं यस्य तेन त राम
स्य कृते प्रतिदिनं संप्राप्ते मासे वा यावत्संवत्सरं तावत्तेनुसारेण अन्नमुदकुंभसहितं ब्राह्म
णाय दद्यात्। अर्वाक्संवत्सरादिति वदता सपिंडीकरणं संवत्सरे पूर्णे वा प्राग्वा इति त
ज्ज्ञाप्य यथाहाश्वलायनः। अथ सपिंडीकरणं संवत्सरान्ते द्वादशाहे वेति। कात्यायनोऽपि॥ ततः
संवत्सरे पूर्णे सपिंडीकरणं त्रिपक्षे वा यदहर्वा वृद्धिरापद्येतेति द्वादशाहं त्रिपक्षे वृद्धौ प्रा
प्तौ संवत्सरे स्वेति चत्वारः पक्षा दर्शिताः। तत्र द्वादशाहे पितुः सपिंडीकरणं साग्निकेन का
र्यं। सपिंडीकरणं विना पिंडपितृयज्ञासिद्धेः। साग्निकस्तु यदा कर्ता प्रेतो वा प्यग्निमान्

वेत्॥ द्वादशाहे तदा कार्यं सपिंडीकरणं पितुरिति वचनात्। निरग्निकस्तु त्रिपक्षेव
द्विप्रासे संवत्सरे वा कुर्यात्॥ यदा प्राक्संवत्सरात्सपिंडीकरणं तदा षोडशश्राद्धा
नि कृत्वा सपिंडीकरणं कार्यं। उक्तं सपिंडीकरणं कृत्वा तानि स्वकाले कर्तव्यानीति
संप्रदायः। उभयथा वचननिर्देशात्॥ श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिंडतां। श्रा
द्धानि षोडशापाद्य विदधीत सपिंडनं। इति षोडशश्राद्धानि च। द्वादशाहे कृत्वा न तु कुर्या
त्सपिंडतां। श्राद्धानि षोडशापाद्य विदधीत सपिंडनं। इति षोडशश्राद्धानि। द्वादशा
हे त्रिपक्षे च षण्मासे मासिके आब्दिके। श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभि
रिति दर्शितानि। तथा॥ यस्यापि संवत्सरादर्वाक् सपिंडीकरणं भवेत्। मासिकं चो
दकुंभं च देयं तस्यापि वत्सरमिति। तत्र सपिंडीकरणं कृत्वा स्वकाले एतानि कर्तव्या
नीति प्रथमः कल्पः। अप्राप्तकालत्वेन प्रागनधिकारात्। यदपि वचनं षोडशश्रा
द्धानि कृत्वैव सपिंडीकरणं संवत्सरात्प्रागपि कर्तव्यमिति। सोपमापत्कल्पः। यदा त्वा
पत्कल्पत्वेन प्राक्सपिंडीकरणात्तत्र श्राद्धानि करोति तदैकोद्दिष्टविधानेन कुर्यात्।
यदा तु मुख्यकल्पत्वेन स्वकाल एव करोति तदाब्दिकं श्राद्धं यथा करोति पार्वणमे
कोद्दिष्टं वा तथा मासिकानि कुर्यात्। सपिंडीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश॥
एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥ सपिंडीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः॥

मसब्दं यो यथा कुर्यात्तथा कुर्यात्स्वच्छेकेनैव वस्तेनालं ॥ नसर्वैः कर्त्तव्यं ॥ न चश्राद्धं स
पिंडत्वं श्राद्धान्येकचषोडश ॥ एकोऽनेनतु कार्यो ऽसि सविभक्तधनेष्वपीति स्मरणात् ॥
दुर्द्वेत्तश्राद्धसहितं सपिंडीकरणं मसन्यासिनां पुत्रादिभिर्नियमेन कार्यं प्रेतत्वविमो
कार्यत्वात् ॥ संन्यासिनां तु न कर्त्तव्यं यथाहोशना ॥ एकोद्दिष्टं न कुर्वीत यतीनां चैव स
र्वदा ॥ अहन्येकादशे प्राप्ते पार्वणं त्वभिधीयते ॥ सपिंडीकरणं तेषां न कर्त्तव्यं सुतादि
भिः ॥ त्रिदंडग्रहणादेव प्रेतत्वं नैव जायत इति ॥ तेषां पुत्राः सन्निधानियेन सगोत्रादिना
दाहसंस्कारः कृतस्तेनैव दशाहकर्म कर्त्तव्यं ॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि
वा पुमान् ॥ प्रथमेहनि यो दद्यात्स दशाहं समापयेदिति स्मरणात् ॥ शूद्राणाममन्त्रकं क राम
र्त्तव्यममन्त्रकं द्वादशेऽहनि ॥ एवं सपिंडीकरणं मंत्रवर्जं शूद्राणां द्वादशेऽहनीति विष्णुस्मर
णात् ॥ सपिंडीकरणादूर्ध्वं सांवत्सरिकपार्वणादीनि पुनस्यानि यमेनैव कार्याणि ॥
अन्येषामनियतानि ॥ एकोद्दिष्टकालानाह ॥ ॥ मृतेहनि तु कर्त्तव्यं प्रतिमासं तु सं
वत्सरं ॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ ॥ मृतेहनि प्रतिमासं संवत्सरं या
वत् एकोद्दिष्टं कार्यं ॥ सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरमेव चैकोद्दिष्टमेव कार्यं ॥
आद्यं सर्वैकोद्दिष्टप्रकृतिभूतं मकोद्दिष्टमेकादशेऽहनि ॥ मृतदिवसापरिज्ञाने तु

तन्मरणदिवसेऽमावास्यायां वा कर्त्तव्यमिति । अपरिज्ञाते मृताहनि अमावास्यायां मर
णदिवसे वेति स्मरणात् । अमामावास्यायामिति गमनमासस्य चाधिन्यां अमावास्याया
मिति प्रवासवासरे वा ज्ञेयं । वासदिवसे ज्ञेये तन्मासे दृष्टेऽपि वा ॥ इति स्मरणात् मृते
हनी सत्र आहिताग्नेर्विशेषमाह कौपेनोक्तेः । ऊर्द्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहस्यैव तत्
स्मृतं ॥ अधस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः इति । त्रिपक्षादर्वाक् यस्त्रिपक्षं तत्कर्म
तद्दाहदिवसादारभ्य आहिताग्नेः कार्यं । त्रिपक्षादूर्ध्वं यदाब्दं तन्मरणदिवसे एवे
त्यर्थः ॥ अनाहिताग्नेस्तु सर्वं मृताह एव । आद्यमेकादशेऽहनीति स्वाशौचापगमल
णमिति केचित् । शुचिना कर्म कर्तव्यमिति स्मृदेवतेरंगत्वात् । अपाशौचापगमे इ
ति सामान्येनोपक्रम्य एकोद्दिष्टस्य विशुना विहितत्वाच्चेत्युक्तं । एकादशेऽह्नि पृ
ष्टाद्धत्याभ्यामुदाहृतं ॥ चतुर्थमपि वसग्नेनासूतकेचेत् यत्यक्रमणानिपैठी
नसि स्मरणविरोधात् ॥ आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि । कर्त्तुस्तात्कालि
की शुद्धिरशुद्धः पुनरेव सा इति शंखवचने विरोधाच्च सामान्योपक्रमं विशुवचने द
शाहाशौचविषयमपि घटते इति ॥ प्रतिसंवत्सरं चैवमिति । प्रतिसंवत्सरं मृतेऽहन्ये
कोद्दिष्टमुपदिष्टं योगीश्वरेण । तथा च स्मृत्यन्तरं ॥ वर्षे वर्षे च कर्त्तव्या मातापित्रो

६० स्तु सत्क्रिया॥ अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत्॥ यमोप्याह सपिंडीकरणादू
र्ध्वं प्रतिसंवत्सरं सुतैः। मातापित्रोः पृथक्कार्यमेकोद्दिष्टं क्षयेहनीति। व्यासस्तु पार्व
णं प्रतिषेधति॥ एकोद्दिष्टं परित्यज्य पार्वणं कुरुते द्विजः॥ अकृतं तद्विजानीयात्स
भवेत्पितृघातकः इति॥ जमदग्निस्तु पार्वणमाह। आपाद्य सहपिंडीकरणं कृत्वा कु
र्यात्पार्वणवत्सदा॥ प्रतिसंवत्सरं विद्वान् छागलेयोदितो विधिरिति॥ एवं च विप्र
तिपत्तौ दाक्षिणात्यास्त्वेवमाहुः॥ औरसक्षेत्रजाभ्यां मातापित्रोः क्षयाहे पार्वणमेव कार्यं।
दत्तकादिभिरेकोद्दिष्टमेव। जातूकर्ण्यवचनात्। प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ
॥ कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दशेति तदसत्। न ह्यत्र क्षयाहवचनमस्ति। अपितु प्र राम
त्यब्दमिति। संनिचक्षुपाह व्यतिरिक्तान्यपि प्रत्यब्दं श्राद्धान्यष्टम्यन्तोपामाघीवैशाखी
प्रभृतिष्विति। अतो न क्षयाहविषये एकोद्दिष्टपार्वणव्यवस्थापनायालं। यत्तु पराशरवचनं
पितुर्गतस्य देवत्वमौरसस्य त्रिपौरुषं। सर्वत्रानेकगोत्राणामेकस्यैव मृतेऽहनीति। तदपि
न व्यवस्थापकं। यस्मादस्यायमर्थः। द्विवंशगतस्य सपिंडीकृतस्य पितुः सर्वत्र औरसस्य त्रिपौ
रुषं औरसेन पार्वणं कार्यं। अनेकगोत्राणां भिन्नगोत्राणां मातुलपितृष्वस्रादीनां क्षयेह
नि[illegible]तदेकस्यैव एकोद्दिष्टमेवेति। किंच। सपिंडीकरणादूर्ध्वमेकोद्दिष्टमेव कर्तव्य

मेऽस्य सोमपितृ स्युक्तं पैठीनसिना । एकोद्दिष्टं हि कर्त्तव्यं तेनैव रसेनष्वेतेऽहनि ॥ सपिंडीकरणादूर्ध्वं माता
पित्रोर्न पार्वणमिति ॥ औदीच्याः पुनरेवं व्यवस्थापयंति । अमावास्यायां भाद्रपदकृष्णपक्षे चाम
नाहे पार्वणं । अन्यत्र मृताहे एकोद्दिष्टमेवेति । अमायां च क्षयपाये पायस्यपि नपक्षेष्वागां पुनः । पार्व
णं तत्र कर्त्तव्यं नैकोद्दिष्टं कदाचनेति स्मरणात् । एतदपि नाद्रियंते बुधाः । अनिश्चितमूलेना
नेन निश्चितमूलानां बहूनां क्षयाहमात्रपार्वणविषयाणां वचनानाममावास्यायामेतत्पक्षम
ताहविषयत्वेनोत्तिसंकोचस्यायुक्तत्वात् । सामान्यवचनानामर्थक्यच । तत्र हि सामान्यवचन
स्य विशेषवचनेनोपसंहारे यत्र सामान्यविशेषसंबंधज्ञानेन वचनद्वयमर्थवत् । यथा स
प्तदशसामिधेनीरनुब्रूयादिति सनारभ्याधीतस्य विकृतिमात्रविषयस्यासाम्यद्दशावाक्यस्य
सामिधेनीलक्षणद्वारसंबंधेनार्थवत्तो मित्रविंदादिप्रकरणपठितेन सासदशावाक्येनमि
त्रविंदाद्यधिकारापूर्वसंबंधबोधकत्वेनार्थवता मित्रविंदादिप्रकरणे उपसंहारः । इह तु
द्वयोर्मृताहमात्रविषयत्वान्नार्थवत्तेति । अतोऽत्र पार्श्विकएकोद्दिष्टनिवृत्तिफलतया पार्व
णनियमविधानमयुक्तं । न च पार्वणवचनानां मातापित्रोः क्षयाहविषयत्वेन । एकोद्दिष्ट
वचनानां च तदन्यक्षयाहविषयत्वेन व्यवस्थायुक्ता । उभयत्रापि मातापित्रोरुदाहरण
स्य विद्यमानत्वात् । सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः । मातापित्रोः पृथक्कार्यमेको

६१ द्दिष्टमन्तेऽहनीति। तथा। आपाद्य सहपिंडत्वमौरसो विधिवत्सुतः। कुर्वीत दर्शवच्छ्राद्धं मा
तापित्रोः क्षयेऽहनीति। यदपि कैश्चिदुक्तं। मातापित्रोः क्षयाहे सांवत्सरिकं पार्वणं कुर्यात्॥
निरग्निरेकोद्दिष्टमिति। वर्षे वर्षे सुतैः कुर्यात्पार्वणं योऽग्निमान्द्विजः। पित्रोरनग्निमा
न्धीर एकोद्दिष्टं मृतेऽहनीति सुमंतुस्मरणात्। तदपि सप्रतिपक्षत्वादुपेक्षणीयं। वह्
नयस्तु ये विप्रा ये चैकेऽग्नयः परिवर्जकाः। तेषां सपिंडनादूर्ध्वं एकोद्दिष्टं न पार्वणमिति स्मर
णात्।। तत्रैवं निर्णयः। संन्यासिनां क्षयाहे सुतेन पार्वणमेव कर्तव्यं।। एकोद्दिष्टं यतेर्ना
स्ति त्रिदंडग्रहणादिह।। सपिंडीकरणाभावात्पार्वणं तस्य सर्वदेति प्रचेतःस्मरणात्।
अमावास्यायां यो हि प्रेतपक्षे क्षयाहे च पार्वणमेव। अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवा राम
पुनः। इत्यादिवचनस्योक्तनीत्या नियमपरत्वात्। अन्यत्र क्षयाहे पार्वणैकोद्दिष्टयो
र्व्रीहियववद्विकल्प एव। तत्रापि वृद्धसमाचारश्चैव व्यवस्थापकः स्यात्। व्यवच्छिन्नो प्रस
क्तामेकस्थले मतिप्रसंगेन।। ।।नित्यश्राद्धव्यतिरिक्तसर्वश्राद्धशेषमिदमभिधीय
ते।। ।।पिंडांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा। प्रक्षिपेद्वाप्सु विप्रेषु द्विजोच्छिष्टं न मा
र्जयेत्।। ।।पूर्वं दत्तानां पिंडानामेव पिंडस्य वा प्रतिपत्तिरियं। गवे। अजाय ब्राह्मणाय
वा तं दद्यात् पिंडान् दद्यात्। अग्नौ। अगाधे जले वा प्रक्षिपेत्। किंच। सत्सु विप्रेषु भोजन

देशावस्थित्तेषु द्विजो च्छिष्टंनमार्जयेन्नोद्वासयेदितिति ॥ ॥ भोज्यविशेषात्फलविशेषमाह ॥
॥ हविष्यान्नेन वै मासं पायसेन तु वत्सरं । मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥ एण
रौरववाराहशाशैर्मांसैर्यथाक्रमं । मासवृद्ध्याभितृप्यन्ति दत्तैरिह पितामहाः ॥ हविष्यं ह
विर्योग्यं तिलव्रीह्यादि । यथाह मनुः ॥ तिलव्रीहियवैर्माषैरद्भिर्मूलफलेन वा । दत्तेन मासं प्री
यंते विधिवत्पितरो नृणामिति । तद्युक्तेन हविष्यान्नेन तिन मासं पितरस्तृप्यन्ति सनाग तेनान्न
प: पायसेन गव्यपय:सिद्धेन संवत्सरं ॥ संवत्सरं तु गव्येन पयसा पायसेन तु इति स्मरणा
त् । मत्स्यो भक्ष्यः पाठीनादिस्तत्संबंधि मात्स्यं । हारिणस्ताम्रमृगः । एणः कृष्णसारस्तत्योऽयस्ताम्रो
हरिण उच्यते । कृष्णास्यपूर्वेदस्मरणात् । तत्संबंधि हारिणं । औरभ्रं उरभ्रस्तत्संबंधि औ र
भ्रं । शाकुनं भक्ष्यपक्षिसंबंधि । अजः छागस्तदीयं छागं । पृषतश्चित्रमृगस्तज्जं पार्षतं । रौ
रवं स्यपदं शाशं ॥ एभिर्मांसैः पितृभ्यो दत्तैर्हविष्यान्नेनैव मासं एकैकमासवृद्ध्या यथा
क्रमं मासैकैकमासवृद्ध्या पितरस्तृप्यन्ति ॥ ॥ किंच ॥ खड्गामिषं महाशल्कं मधु मुन्यन्नमे
व च ॥ लोहामिषं महाशाकं मांसं वार्ध्रीणसस्य च ॥ यद्ददाति गयास्थश्च सर्वमानंत्यम
श्नुते ॥ तथा वर्षात्रयोदश्यां मघासु च विशेषतः ॥ ॥ खड्गो गंडकस्तस्य मांसं । महाश
ल्को मत्स्यभेदः । मधु क्षौद्रं । मुन्यन्नं सर्वमारण्यकंदनीवारादि । लोहो रक्तच्छागस्तदी

अर्बुदः पर्वतविशेषो वाराहक्षेत्रदेशे प्रसिद्धः ॥ एते नाम्नी नदी ॥ वंतोयस्य सम्पर्थे द्वितीया ॥

६२ निर्मलोहामिषं। कालशाकं शाकविशेषः। वार्ध्रीणसः श्वेतवृद्धछागस्तदामिषं। त्रिःपिब
स्त्विंद्रियक्षीणः श्वेतावृद्धस्तुजापतिः। वार्ध्रीणस इति प्रोक्तो याज्ञिकैः पितृकर्मणीति
। याज्ञिकप्रसिद्धः। त्रिपिबः कर्णौ जिह्वा च यस्य जलं स्पृशन्ति त्रिभिः पिबतीति स त्रिपिबः।
तस्य वार्ध्रीणसस्य मांसं यच्च ददाति। गयायां स्वयं स्थूपत्के त्रिशाकादिकमपि गयायां स्थोद
दाति च शब्दात् गंगाद्वारादिषु च। गंगाद्वारे प्रयागे च पुष्करे नैमिषेर्बुदे। संनिहित्यां
गयायां च श्राद्धमक्षय्यतां व्रजेत्। इति। आनन्त्यमश्नुत इति आनंत्यफलहेतुत्वं प्राप्नोति।
आनंत्यमश्नुत इति प्रत्येकमभिसंबध्यते। तथा वर्षात्रयोदश्यां भाद्रपदस्य त्रयो
दश्यां निशेषतो मघायुक्तायां यत्किंचिद्दीयते तत्सर्वमानंत्यमश्नुत इति गतेन संबं राम
धः। अत्र यद्यपि मुन्यन्नमांसमध्वादीनि सर्वेषां सामान्येनश्राद्धयोग्यानि दर्शि
तानि। तथापि लघुपुलस्त्योक्तव्यवस्थाचरणीया। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्ष
त्रियावैश्ययोः। मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यत्। अस्यार्थः। मुन्यन्नं नीवा
रादि यतेश्राद्धयोग्यमुक्तं तद्ब्राह्मणस्य प्रधानं सम्यक्फलदं। एवं मांसं तत्क्षत्रियवै
श्ययोः प्रधानं। यच्छ्राद्धेऽत्रमुक्तं तच्छूद्रस्य। एतत्त्रितयव्यतिरिक्तं यदविरोधि यत्।
अस्मान्नेषिद्धं वास्तुकादि यच्च विहितहविष्यकालशाकादि तत्सर्वेषां ममग्रफलद ६२

मिति।तिथिविशेषात्फलविशेषमाह॥ ॥कन्यांवेदिनश्चपशून्वैसत्सुतानपि।द्यूतंकृषि
वाणिज्यंचद्विशफैकशफांस्तथा॥ब्रह्मवर्चस्विनःपुत्रान्स्वर्णरूप्येसकुप्यके॥ज्ञातिश्रै
ष्ठ्यंसर्वकामानाप्नोतिश्राद्धदःसदा॥प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं।शस्त्रे
णतुहतायेवैतेभ्यस्तत्रप्रदीयते॥ ॥कन्याफलंस्पष्टंमौलिवर्त्तीकन्यावेदिनोजामा
तरोबुद्धिरूपलक्षणसंपन्नाः।पशवःक्षुद्राअजादयः।सत्सुताःसन्मार्गवर्तिनःपुत्राः
।द्यूतंद्यूतविजयः।कृषिःकृषिफलं।वाणिज्यंवाणिज्यलाभः।द्विशफागवादयः।एकश
फाअश्वादयः।ब्रह्मवर्चस्विनःपुत्रावेदाध्ययनतदर्थानुष्ठानजन्यादिजनितंतेजोब्रह्म
वर्चसंतद्वंतः।स्वर्णरूप्येहेमरजते।तद्व्यतिरिक्तंत्रपुसीसकादिकुप्यकं।ज्ञातिश्र
ज्ञातिभ्यउत्कृष्टत्वं।सर्वकामाःकाम्यंतइतिकामाःस्वर्गपुत्रपश्वादयः।इत्येतानिकृ
त्यादीनिचतुर्दशफलानिकृष्णपक्षस्यप्रतिपत्प्रभृतिअमावास्यापर्यंतासुचतुर्दशी
वर्जितासुतिथिषुश्राद्धदोयथाक्रममाप्नोति।येकेचनशस्त्रेणहतास्तेभ्यःकृष्णप
क्षचतुर्दश्यामेकोद्दिष्टविधानेनश्राद्धंदद्यात्।यदिशस्त्रादिहतानभवंति।समस्त
मागतस्यापिपितुःशस्त्रहतस्यैवएकोद्दिष्टंसुतैःकार्यंचतुर्दश्यांमहालये।इतिस्म
रणात्।समन्वमागतस्यसपिंडीकृतस्यमहालयेनाद्यपदस्यैवकृष्णपक्षेचतुर्दश्यांत्वास्म

६३ हतस्यैव नान्यस्येति नियम्यते न पुनः शस्त्रहतस्य चतुर्दश्यामेवेति। अतश्च पक्षपातादौ
शस्त्रहतस्यापि यथाप्राप्तमेव श्राद्धं। न च भाद्रपदकृष्णपक्षस्य चायं विधिरिति मन्तव्यं। प्रौ
ष्ठपद्यामपरपक्षमासि मासि चैवमिति शौनकस्मरणात्। नक्षत्रविशेषात्फलविशेष
माह॥ ॥स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा॥ पुत्रा न[illegible]कस्मर
णात्। नक्षत्रविशेषान्फलविशेषमाह। ॥स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं त
था॥ पुत्रान्श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभं॥ प्रवृत्तचक्रतां चैव वाणिज्य
प्रभृतीस्तथा। अरोगित्वं यशो वीतशोकतां परमां गतिं। धनं वेदान्भिषक्सिद्धिं कु राम
प्यं गा अप्यजाविकं॥ अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति॥ ॥कृत्तिका
दिभरण्यन्तं स कामानाप्नुयादिमान्॥ आस्तिकः श्रद्धानश्च व्यपेतमदमत्सरः॥ ॥
कृत्तिकादिभरण्यन्तं प्रतिनक्षत्रं यः श्राद्धं ददाति स यथाक्रमं स्वर्गादीनायुः
पर्यन्तान्कामानाप्नोति यद्यास्तिकः श्रद्धानो व्यपेतमदमत्सरश्च भवति। यद्यास्ति
को विश्वासवान्। श्रद्धानः श्रादरातिशययुक्तः स्यात्। व्यपेतमदमत्सरः मदो ग
र्वः। मत्सरः ईर्ष्या ताभ्यां रहितः। स्वर्गो निरतिशयसुखं। अपत्यमविशेषेणोक्तं। ओ
जः प्रागल्भ्यातिशयः। शौर्यं निर्भयत्वं। क्षेत्रं फलवत्। बलं शारीरं। पुत्रो गुणवान्। ६३

श्रेष्ठ्यं ज्ञातिषु सौभाग्यं जनताप्रियता। समृद्धिर्धनादेः। मुख्यता अग्र्यता। शुभं सामान्ये
न। प्रवृत्तचक्रता अप्रतिहताज्ञता। वाणिज्यप्रभृतौ निर्वाणिज्यस्य कृषिकुसीदगोरक्षा
। आरोग्यमनामयत्वं। यशः प्रख्यातिः। वीतशोकता शोकदुःखवियोगादिजनितदुःखा
भावः। परमा गतिः ब्रह्मलोकाप्तिः। धनं सर्वविदां वेदशास्त्रविदादयः। अभिप्रेतसिद्धिः
रूप्यधकलावाप्तिः। कुप्यं सुवर्णरजतव्यतिरिक्तं ताम्रादि। गावः प्रसिद्धाः। प्रजा
अपत्यं। अश्वाः अश्वाः। आयुः दीर्घजीवनं। मासवर्णा पित्र्यं निवृत्तिरिह पितामहाः
सनेन श्राद्धेन पितरः तृप्ता भवन्ति इत्युक्तं तदनुपपन्नं। प्राणिनां स्वकृतशुभाशुभकर्म
वशेन स्वर्गनरकादिगतानां मनुष्याणां पुत्रादिदत्तैरन्नपानादिभिस्तत्संभवात्।
संभवेपि स्वयममात्मनामप्यनीशानाः स्वर्गादिफलं कथं प्रयच्छन्तीत्यत आह॥ ॥
वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः। प्रीणयंति मनुष्याणां पितॄन् श्राद्धेन
तर्पिताः॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छंति तथा राज्यं प्रीता
नृणां पितामहाः॥ ॥ न ह्यत्र देवदत्तादय एव श्राद्धकर्मणि संप्रदानभूताः पित्रादि
शब्दैरुच्यंते। किंत्वधिष्ठातृवस्वादिदेवतासहिता एव यथा देवदत्तादिशब्दैर्न शरी
रमात्रेनाप्यात्ममात्रं। किंतु शरीरविशिष्टात्मा न उच्यते॥ एवमधिष्ठातृदेव

६४ नासहिता एव देवदत्तादयः पित्रादिशब्दैरुच्यन्ते ।। अतश्च अधिष्ठातृदेवता वस्वादयः पु
त्रादिभिर्दत्तेनान्नपानादिना तृप्ताः सन्तस्तानपि देवदत्तादींस्तर्पयन्ति । कर्तॄंश्च पु
त्रादीञ्छुभफलेन संयोजयन्ति । यथा माता गर्भपोषणाय दत्तेन दोहदान्नपानादिना स्व
यमुपभुक्तेन प्रीता सती स्वजठरगतमपत्यं तर्पयति । दोहदान्नादिप्रदायिनश्च प्र
त्युपकारफलेन संयोजयति । तद्वद्वसवो रुद्रा अदितिसुताः श्राद्धदेवताः ।। ते पितरः
पितृपितामहप्रपितामहशब्दवाच्याः । तथा न केवलं देवदत्तादय एव श्राद्धदेवताः
श्राद्धकर्मणि संप्रदानभूताः किंतु मनुष्याणां पितृशब्देन देवदत्तादीनुद्दिश्य श्राद्धेन त
र्पिताः स्तर्पयन्ति । ज्ञानशक्त्यतिशययोगेन । किंच न केवलं पितॄंस्तर्पयन्ति । अपि तु श्रा राम
द्धकारिणः । आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।। प्रयच्छन्ति तथा राज्यं प्रीता
नृणां पितामहाः ।। चकारात्तत्तत् — स्तोकमन्यदपि फलं स्वयं प्रीताः पितामहा वस्वा
दयः प्रयच्छन्ति ।। ।। इति श्राद्धप्रकरणं दशमं समाप्तं ।। ।। दृष्टादृष्टफलसाधना
नि कर्माण्यभिहितान्यभिधास्यन्ते च । तेषां स्वरूपनिष्पत्तिफलसाधनत्वे च । विघ्न
भवतीत्यविघ्नार्थं कर्म विधास्यन् च विघ्नस्य कारकज्ञापकोत्पत्तिमाह ।। ।। विनायकः
कर्मविघ्नसिद्ध्यर्थं विनियोजित इत्यादिना उभयहेतुपरिज्ञानात्तु विघ्नस्य प्रागभावपरि

जानाति। विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः॥ गणानामाधिपत्ये च रुद्रेण ब्र
ह्मणा तथा॥ ॥विनायको विघ्नराजः पुरुषार्थसाधनानां कर्मणां विघ्नसिद्ध्यर्थं स्वरू
पसाधनस्य च विघ्नानां सिद्धये विनियोजितः नियुक्तः। रुद्रेण ब्रह्मणा च कारादिसुना
गणानां पुष्पदन्तप्रभृतीनामाधिपत्ये स्वाम्ये च॥ ॥पूर्वं विघ्नकारकत्वेनोक्तोऽ
धुना ज्ञापककेतुप्रदर्शनार्थमाह॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत। स्व
प्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति॥ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति
॥ अन्त्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते। व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः॥ ॥
तेन विनायकेनोपसृष्टो गृहीतो यस्तस्य लक्षणानि ज्ञापकानि निमित्तानि जानीध्वं।
हे मुनयः पुनर्मुनीनां प्रत्यवमर्शः शान्तिप्रकरणप्रावेशार्थः। स्वप्ने स्वप्नावस्थायां
जलमत्यर्थमवगाहते। स्रोतसा क्षिप्यते निमज्जति वा। मुण्डितशिरसः पुरुषान्पश्य
ति॥ कषायवाससो रक्तनीलादिवस्त्रप्रावरणांश्च। क्रव्यादान् आममांसाशि
नः पक्षिणो गृध्रादीन्मृगांश्च व्याघ्रादींश्चाधिरोहति। अन्त्यजैश्चण्डालादिभिः गर्द
भैः खरैः। उष्ट्रैः क्रमेलकैः सह परिवृतस्तिष्ठति। व्रजन् गच्छन्नात्मानं परैः शत्रुभिः
पश्चाद्धावद्भिरनुगतो म्रियमाणमभिभूतमात्मानं मन्यते॥ ॥एवं स्वप्नदर्शी

नान्कृत्काप्रस्यस्य लिंगानाह ॥ ॥ विमना विफलारंभः संसीदत्यनिमित्ततः ॥ तेनो-
पसृष्टो लभते न राज्यं राजनंदनः ॥ कुमारी न च भर्तारमपत्यं गर्भमंगना ॥ आचार्य-
त्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा ॥ वणिग्लाभं न चाप्नोति कृषिं चापि कृषीवलः ॥ वि-
मना विक्षिप्तचित्तः । विफलारंभो यस्य स विफलारंभ[illegible]कस्य सफलमासीत् ।
संसीदत्यनिमित्ततः विनाकारणेन दीनचित्तो भवतीति । राजनंदनो राजकुले जा-
तः युनसौंदर्यशौर्यधैर्यादिगुणयुक्तोपि राज्यं न लभते । कुमारी रूपलक्षणाभिजना-
दिसंपन्नापि उत्तमं भर्तारं । अंगना गर्भिण्यपत्यं । ऋतुमती गर्भं । अध्ययनतदर्थज्ञा-
नेसंपन्नोपि श्रोत्रिय आचार्यत्वं । विनयाचारादियुक्तोपि शिष्योऽध्ययनं अवगमं वा न रण
लभते । न लभते इति सर्वत्र संबध्यते । वणिक्कुवलिज्योपजीवी तत्र कृतालोपि धा-
न्यादिक्रयविक्रयादिषु लाभं कृषीवलः कर्षुकस्तत्राभियुक्तोपि कृषिफलं नाप्नोति
सेवेयोयमाव स्याजीवति सत्तत्र निःफलारंभश्च तेनोपसृष्टो वेदितव्यः ॥ एवं कार-
कत्राएकहेतून् अभिधाय विघ्नोपशांत्यर्थं कर्मविधानमाह ॥ ॥ स्नपनं तस्य कर्तव्यं
पुण्येह्नि विधिपूर्वकं ॥ गौरसर्षपकल्केन साज्येनोत्सादितस्य च ॥ सर्वौषधैः सर्वगं-
धैर्विलिप्तशिरसस्तथा ॥ भद्रासनोपविष्टस्य स्वस्ति वाच्या द्विजाः शुभाः ॥ ॥

एतच्च सपिंडीकरणमनंतरोक्तमेकोद्दिष्टं च ततः प्रागुक्तक्रियया अपि मातुरपि कर्तव्यं। एवं वर्त
तापार्वणे मातुः श्राद्धं पृथक् कर्तव्यमित्युक्तं भवति। अत्र प्रेतत्वमात्र्यपितुः पितामहविषये केचि
द्वर्णयंति। तस्य त्रिंशत्तमभावेन सपिंडीकरणोत्तरकालं पिंडदानादिनिवृत्त्युपपत्तेः समनंत
रमतस्य तूत्तरत्र पिंडोदकदानानुवृत्तेरंतर्गतो नपुक्तः। अतएवाह यमः। यः सपिंडीकृतं प्रे
तं पृथक् पिंडे नियोजयेत्। पितृघ्नेवाशयेत्तत्र पुनः प्रेतेनानिर्दिशेत्। इति सपिंडीकरणोत्तरका
लं प्रेतस्य श्राद्धादिप्रतिषेधो दृश्यते। सत्वानंतरमतस्य न भवति। अमावास्याद्दौ श्राद्धादि
विधानात्। सपिंडत्रयस्यापित्वं पंचमस्य पिंडद्वयस्यापित्वं षष्ठस्यैकपिंडस्यापित्वं सममेव विनि
वर्ततइति। पितृपात्रेष्ठिस्यैतदापि पितृमुख्यत्वादस्मिन्नेव पक्षे घटते। नान्यथा। पितामहस्य मु
ख्यत्वात्तस्मासिंत्पात्रेषु प्रेतपात्रं प्रसेचयेत्। इति पितुः पितामहपात्रं पित्रादिपात्रेषु
प्रसेचयेदित्ति तदयुक्तं। नह्यत्र पिंडसंयोजनमुत्तरत्र पिंडदानादिनिवृत्तिप्रयोजनं भवति।
अपितु प्रेतत्वनिवृत्त्या पितृत्वप्राप्त्यर्थं। प्रेतत्वं च क्षुत्तृष्णापत्तनिमित्तं तदुःखानुभवाव
स्था। यथाह मार्कंडेयः। प्रेतलोकेतु वसतिर्नृणांवर्षं प्रकीर्तिता॥ क्षुत्तृष्णे प्रत्यहं तत्र भ
वतां भृगुनंदन इति। पितृत्वप्राप्तिश्च वस्वादिश्राद्धदेवतासंबंधः। प्रागुक्तैकोद्दिष्टसहिते
न सपिंडीकरणेन प्रेतत्वनिवृत्त्या पितृत्वं प्राप्नोतीत्यवगम्यते। यस्यैतानि न दत्तानि स प्रेतस्था

५६ त्वानिषोडशाप्रेतत्वंसुस्थिरंतस्यदत्तैःश्राद्धशतैरपि।तथा।चतुरोनिर्वपेत्पिंडान्पूर्वंतेषु
समावपेत्।ततःप्रभृतिवैप्रेतःपितृसामान्यमश्नुतइतिवचनात्।यःसपिंडीकृतंप्रेतमि
त्यनेनापिपृथगेकोद्दिष्टविधानेनपिंडदाननिषेधात्पार्वणविधानेनसहपिंडदानमव
गम्यते।तच्चसांवत्सरैकपाक्षिकैकोद्दिष्टविधानेनोपपद्यते।यदपिपुनःप्रेतेननिर्दिशे
दितितदपिप्रेतत्वादनोच्चारयेदपितुपितृशब्दमेवेत्येवमर्थंनचप्रकर्षगमनात्तत्रैवम
तशब्दःपत्तोविशिष्टदुःखानुभाववस्थाप्रेतशब्देनरूप्याभिहिताइत्युक्तं।योपिप्रमीत
मात्रेप्रेतशब्दप्रयोगः।सोपिभूतपूर्वगत्या।सपिंडतानुपुरुषेससमेविनिवर्त्ततेइतिच। राम
प्रथमस्यचतुर्थस्यपित्रादेतीयस्यपंचमस्यापित्वात्तृतीयस्यषष्ठस्यापित्वात्ससमेवि
निवर्त्ततेइत्येवमेवघटते।अपिचाभिर्वाप्यपिंडान्वयेननसापिंडानव्यापकत्वात्।अपिचे
केशरिराज्यवान्वयेनेत्युक्तं।पितृशब्दस्याप्रेततवनिवत्साश्राद्धदेवतात्पुगतेषुवस्वा
दिपुवर्त्ततइतिपितृपात्रेषुस्याविरुद्धं।तस्माद्दनेनरमतपात्रोदकस्यतत्पिंडस्यचपितृ
पात्रेषुतत्पिंडेषुचविभज्यसंसर्जनमितिसिद्धं।आचार्यस्तुपरमतमेवोपन्यस्तवान्।
एतच्चपितुःसपिंडीकरणंपितामहादिषुत्रिषुप्रमीतेषुवेदितव्यं।पितरिप्रमीतेपितामहे
प्रपितामहेप्रपितामहेवाजीवतिसपिंडीकरणंनास्त्येव।व्युत्क्रमाच्चप्रमीतानांनैवका

तस्य विनायकोपसृष्टस्य । अनागतविनायकोपसर्गपरिहारार्थिनो वा स्नपनमभि
कर्तव्यं । पुराणे स्वानुकूल्यादिनक्षत्रयुक्तेऽन्हि दिवसे न रात्रौ ॥ विधिपूर्वकं शास्त्रो
क्तेतिकर्तव्यतासहितं । स्नपनविधिमाह ॥ ॥ गौरसर्षपकल्केन साज्यपिष्ट
न साज्येन घृततैलोलीढतनेनोत्सादितोस्य दुरितांगस्य । तथा सर्वौषधैः प्रियंगु
नागकेसरादिभिः । कुष्ठंमांसीहरिद्रेद्वे मूर्वाशैलेयचंदनं ॥ वचाकचोरमुस्तानिस्त
सर्वौषध्यः प्रकीर्तिताः ॥ सर्वगंधैश्चंदनागरुकस्तूरिकादिभिर्विलिप्तशिरसो वस्य
माण भद्रासनोपविष्टस्य द्विजा ब्राह्मणाः शुभाः श्रुताध्ययनवृत्तसंपन्नाः
शोभनास्ततयश्च वास्ये स्वस्त्ययनं वृत्तो ब्रुवात्वे त्ति वाच्याः । अस्मिन्समये ग
णेशः । विधिमार्गं तु पुराणाद्वचनं कुर्यादित्यर्थः ॥ ॥ किंच ॥ अश्वस्थाना
द्गजस्थानात्तथा वल्मीकात्संगमात् ह्रदात् ॥ मृत्तिकां रोचनां गंधान्गुग्गुलं
चाप्सु निक्षिपेत् ॥ या आहृता एकवर्णैश्चतुर्भिः कलशैर्ह्रदात् ॥ चर्मण्यान
डुहे रक्ते स्थाप्यं भद्रासनं ततः ॥ ॥ अश्वस्थानगजस्थानवल्मीकसरित्
संगमाद्धोह्रदेभ्यश्च आहृता पंचविधा मृत्तिका रोचना गंधाश्चंदनकुंकुमा
गरुप्रभृतयो गुग्गुलश्च तास्वप्सु निक्षिपेत् । या अपः आहृता एकवर्णैः

६८ समानवर्णैश्चतुर्भिः शुभैः कलशैरव्रणैरस्फुटितैरकालैर्हृदादसो व्याघ्रंगमादा॥ तत्र
श्चानडुहे चर्मणि रक्ते लोहिते वर्णे उत्तरलोम्नि प्राचीनग्रीवे भद्रमनोरमासने श्री
पर्ण्यो विनिर्मिते स्नापयेत्। तत्र उक्तोदकुम्भैश्चतुःकोणं भावितैः सहितान् स्नानदिवस उ
पर्शोभिनानन्तास्त्रग्दामवेष्टितकं वा नवंदनचर्चितान्नवाहतवस्त्रशोभितांश्चतुरस्सुपूर्वा
दिदिक्षु स्थापयित्वा कामुखो सुलिप्ते रविततपच्चवर्णस्वस्तिके लोहितमानडुहं चर्माधिर
लोमप्राचीनग्रीवमास्तीर्य तस्योपरि भद्रासनं प्रच्छादितमसनेस्थापयेत्। तदिस्वनस्य द्वा
सने॥ एतस्मिन्नुपविष्टस्य स्वस्ति वाच्यास्ततो द्विजाः॥ सहस्राक्षं शतधारमृषिभिः पाव
नं कृतं। तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते॥ ॥स्वस्ति वाचनानंतरं जीवत्पति राम
पुत्राभीरूपगुणशालिनीभिः कृतमंगलं। पूर्वादिदिग्देशावस्थितेन कलशमादायानेन
मंत्रेण गुरुरभिषिंचेत्॥ सहस्राक्षमनेकशक्तिकं शतधारमनेकप्रवाहमृषिभिर्य्यद्
दकं पावनं पवित्रं कृतमुत्पादितं तेनोदकेन त्वां विनायकोपसृष्टं उपसर्गोपशांतये ऽ
भिषिंचामि॥ पावमान्यः श्वेताः आपस्त्वां पुनंतु॥ तदनंतरं दक्षिणदिग्देशावस्थितं
द्वितीयं कलशमादायानेन मंत्रेणाभिषिंचेत्॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः।
भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः॥ ॥भगं कलशेन तु भगं वरुणो राजा भगं

सर्पावृहस्पतिरिंद्रोवायुःसप्तर्षयश्चभगंददुरिति॥ ॥ततःपश्चिमदिक्संस्थंतृतीयंक
लशमादायपाठेनेनमंत्रेणाभिषिंचेत्॥यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि॥ललाटेक
र्णयोरक्ष्णोरापस्तद्घ्नंतुतेसदा॥ ॥तेनतवकेशेषुयद्दौर्भाग्यंअलकेललाटेसीमंते
मूर्द्धनिललाटेकर्णयोरक्ष्णोतत्सर्वमापोदेवताःघ्नंतुशमयंतुसर्वदेति॥ ॥
ततउत्तरदिक्संस्थंचतुर्थंकलशमादायपूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिंचेत्॥सर्वैर्मं
त्रैश्चतुर्थमितिलिंगात्॥ ॥स्नानस्यसार्षपंतैलंस्रुवेणौदुंबरेणतु॥जुहुया-
न्मूर्द्धनिकुशान्सव्येनपरिगृह्यच॥ ॥उक्तेनप्रकारेणस्नानाभिषेकस्यमूर्द्धनिस
व्येनपाणिनागृहीतकुशानांहितेसार्षपंतैलमुदुंबरेणौदुंबरस्वसौम्देवेनस्रुवेणव
क्ष्यमाणैर्मंत्रैर्जुहुयादाचार्यः॥ ॥मितश्चसंमितश्चैवतथाशालकटंकटौ॥कू
ष्मांडोराजपुत्रश्चेत्येतेस्वाहासमन्वितैः॥नामभिर्बलिमंत्रैश्चनमस्कारसमन्वि
तैः॥ ॥मितसंमितादिभिर्विनायकनामभिःस्वाहाकारांतैःप्रागेवोक्तैर्जुहुया
दितिगतेनसंबंधः॥स्वाहाकारयोगमत्रचतुर्थीविभक्तिः॥प्रयोगश्च॥ॐमितायस्वा
हा॥ॐसंमितायस्वाहा॥ॐशालायस्वाहा॥ॐकटंकटायस्वाहा॥ॐकूष्मांडायस्वाहा।
ॐराजपुत्रायस्वाहा॥इतिषण्मंत्रा॥ततोलौकिकाग्नौस्थालीपाकविधिनाचरुंश्र

मिता०

६७ पचिस्वाणैतैरेवमंत्रैः षडिंद्रस्वस्मिंनेवाग्नौहुत्वातुक्षेपंबलिमंत्रैरिंद्राग्नियमनैर्ऋतवरु
णवायुकुबेरेशानब्रह्मानंतानांनामभिश्चतुर्थ्यंतैर्नमोन्वितैभ्यो बलिंदद्यात्॥ ॥अनं
तरं किंकुर्यादित्यत आह॥ ॥दध्यान्नंतुच्छसूपंकृशरान्नास्तीयेसर्वतः॥ ॥कृतान्कृतां
स्तंदुलांश्चपललौदनमेवच॥ ॥मत्स्यान्मांसंस्तथैवामान्मांसमेतान्वदेदवतु॥ ॥पुष्पंचि
त्रंसुगंधंचसुरांचत्रिविधामपि॥ ॥मूलकंपूरिकापूपांस्तथैवोंडेरकस्रजः॥ ॥दध्यन्नं
पायसंचैवगुडपिष्टंचमोदकं॥ ॥एतान्सर्वान्समाहृत्यभूमौकृत्वा ततः शिरः॥ ॥विना
यकस्यजननीमुपतिष्ठेत्ततोंबिकां॥ ॥कृतान्नकृताद्युपहारद्रव्यमातृविनायकस्यो
परस्यसंनिधानात्तज्जनन्याश्चशिरसाभूमिंगत्वा॥ ॥तत्पुरुषायविद्महेवक्रतुंडायधी राम
महि॥ ॥तन्नोदंतीप्रचोदयात्॥ ॥इत्यनेनमंत्रेणविनायकं॥ ॥सुभगायैविद्महेकाम
मालिन्यैधीमहि॥ ॥तन्नोगौरीप्रचोदयात्॥ ॥इत्यनेनमंत्रेणांबिकांचनमस्कुर्यात्।
ततउपहारशेषमास्तीर्यकुशैस्तूर्यनिनादैश्चतुःपथेनिदध्यात्॥ ॥बलिंदत्तेति
मंदेवाआदित्यावसवस्तथा॥ ॥मरुतोयाश्विनौरुद्राः सुपर्णाः पन्नगाग्रहाः॥ ॥
असुरायातुधानाश्चपिशाचामातरोनगाः॥ ॥शाकिन्योयक्षवेतालायोगिन्यःपूतनाः
शिवाः॥ ॥जृंभकाःसिद्धगंधर्वामालाविद्याधरानराः॥ दिक्पालालोकपालाश्चयेच

विघ्नविनायकाः ॥ जगतां शांतिकर्त्तारो ब्रह्मणाद्याश्च महर्षयः ॥ मा विघ्नो मा च मे पापं मा
सन्तु परिपंथिनः ॥ सौम्यान्यनंतु त्रसांश्च भूतप्रेताः स्वाहा ॥ ॥ इत्येतैर्मंत्रैः कृता
कृताः सरद्वहस्तांस्तंडुलाः। पललं तिलपिष्टं तन्मिश्र ओदनः पललोदनः। मत्स्याः
पक्वाः अपक्वाश्च। मांसमेतावदेव तु। पक्वमपक्वं च। पुष्पं चित्रं रक्तपीतादिनानावर्णं।
चंदनादि सुगंधद्रव्यं। सुरा त्रिविधा गौडी पैष्टी माध्वी चेति। मूलकं केकराकोरोमस्य
विशेषः। पूरिका प्रसिद्धा। अपूपः अस्ते ह्यो धूमविकारः। उंडेरकाः स्रजः उंडेरकाः
पिष्टादिमय्यः तत्स्रोलाः स्रजः मालाः ॥ दध्यन्नं दधिमिश्रमन्नं ॥ पायसं दुग्धविकारः
॥ गुडपिष्टं गुडमिश्रं शाल्यादिपिष्टं। मोदकाल्लड्डुकाः। अनंतरं तज्जनंतोयाविकांच
वस्यमालमंत्रेणोपतिष्ठेत ॥ ॥ किं कुर्वन्नित्याह। दूर्वासर्षपपुष्पाणामर्घपूर्णं
मंजलिं ॥ ॥ सकुसुमोदकेनार्घं दत्वा दूर्वासर्षपपुष्पाणां पूर्णमंजलिं च दत्वोपतिष्ठे
तेति गत्वेन संबंधः। उपस्थानमंत्रानाह ॥ ॥ रूपं देहि यशो देहि भगं भगवति देहि मे
॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ ॥ विनायकस्योपस्थाने भगवंतीस्पृह ॥
॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥ ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गु
रोरपि ॥ ॥ ततोऽभिषेकानंतरं यजमानः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ब्रा

९६ ब्राह्मणान्भोजयेत्तु यथाशक्ति। गुरवे चाचार्याय स्नपनकर्त्रे संपूज्याय विनायकस्नपनविधि
ज्ञाय वस्त्रयुग्मं दद्यात्॥ अपिशब्दाद्यथाशक्ति दक्षिणां विनायकोद्देशेन ब्राह्मणे-
भ्यश्च॥ तत्रायं प्रयोगः। चतुर्भिर्ब्राह्मणैः सार्द्धमुक्तलक्षणगुरुर्भद्रासनरचनान-
न्तरं तत्संनिधौ विनायकं तज्जननीं चाम्बिकां मन्त्राभ्यां धूपपुष्पादिभिः समभ्यर्च्य च स्था-
पयित्वा भद्रासनोपविष्टस्य यजमानस्य पुण्याहवाचनं कृत्वा चतुर्भिः कलशैरभि-
षिच्य सार्षपतैलं शिरसि हुत्वा चरुस्रावं हुत्वा। अभिषेकशालायां दिक्षु लोकपालेभ्यो
बलिं दद्यात्। यजमानस्तु स्नानानन्तरं शुक्लाम्बरधरो गुरुणा सह विनायकमम्बिका- राम
म्युपहारं दत्त्वा गौरसर्षपभूमिगचाकुसुमादिकेनार्घं दत्त्वा दूर्वासर्षपपुष्पाञ्जलिं च
द विनायकमम्बिकां चोपतिष्ठेत। गुरुरुपहारशेषं भूतेभ्यो बलिं चत्वरे निदध्यात्।
अनन्तरं वस्त्रयुग्मं दत्त्वा नपादक्षिणां दत्त्वा ब्राह्मणान्भोजयेदिति॥ ॥इति विना-
यकस्नपनविधिः॥ ॥अस्यैव विनायकस्य कर्मोपसंहारेण संयोगान्तरं दर्शयि-
तुमाह। ॥एवं विनायकं पूज्य ग्रहांश्चैव विधानतः। कर्मणां फलमाप्नोति
श्रियं प्राप्नोत्यनुत्तमाम्॥ ॥एवमुक्तेन प्रकारेण विनायकं संपूज्य कर्मणां फलमवि-
घ्नेनाप्नोति स कर्मोपसंहारः॥ संयोगान्तरमाह। श्रियं चोत्कृष्टसमामाप्नोति श्रीका।

मुख्यानेनैवविधानेनविनायकंसपूजयेदित्यर्थः॥ आदित्यादिग्रहपीडाशान्तिका
मस्यलक्ष्म्यादिकामस्यचग्रहपूजादिकंस्यविधास्यन्नुग्रहपूजामुपक्षिपति। ग्रहा
श्चैवविधानतरतिग्रहान्नादित्यादीन्वक्ष्यमाणविधिनासंपूज्यकर्मणांफलंश्रियं
चाप्नोतीति॥ ॥नित्यकामसंयोगा ह॥ आदित्यस्यासदापूज्योतिलकस्वामिन
स्तथा। महागणपतेश्चैवकुर्वन्सिद्धिमवाप्नुयात्॥ ॥आदित्यस्यसदाभक्ति
दिवसरक्तचंदनकुंकुमादिभिः पूजांकुर्वन्स्कंदस्यमहागणपतेश्चनित्यसंपूजांकुर्वन्
सिद्धिमोक्षमदस्मोति। आत्मज्ञानद्वारेणप्राप्नोतीति। नित्यसंयोगः। आदित्यस्कं
दमहागणपतीनामन्यतमस्यसर्वेषांवास्वस्वनिर्मितंसूप्याविनिर्मितंचाति
स्तवांकुर्वन्सिद्धिमभिलषितांनामाप्नोति। नाप्यात्रचद्युपीत्येति॥ कामसंयोगइति
गणपतिकस्य॥ ग्रहाश्चैवविधानेनः कर्मणाफलमाप्नोतिनिषियंप्राप्नोत्यसन्नुक्त
मामिसन्नेनग्रहपूजाख्याः कर्मणामविघ्नेनफलसिद्धिः श्रीश्चफलमित्युक्तेमिद
नीफलांतराण्याह॥ ॥श्रीकामः शांतिकामोवाग्रहयज्ञंसमाचरेत्॥ वृष्ट्यायुःपु
ष्टिकामोवातयेभिचरंनपि॥ ॥श्रीकामइतिपूर्वोक्तस्यानुवादः॥ शांतिकामःश्रा
पडुपशांतिकामः। सस्यादिवृद्ध्यर्थंप्रवर्षणंवृष्टिः॥ आयुरपमृत्युजयेनदीर्घ

६१ कालजीवनं पुष्टिरनघशरीरत्वं। एताः कामयमान इति वृष्ट्यायुःपुष्टिकामः।ए
तेन श्रीकामादयो ग्रहयज्ञं समाचरेत्॥ ग्रहानाह॥ सूर्यः सोमो महीपुत्रः सोमपुत्रो बृ
हस्पतिः॥ शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः॥ ॥एते सूर्यादयो ग्रहाः।
ग्रहाः पूज्या इत्युक्ते कैः किंरूपेत्याह॥ ॥ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकावुभौ॥
रजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात्॥ स्ववर्णैर्वा पटे लेख्या गंधैर्मं
डलकेषु वा॥ ॥सूर्यादीनां मूर्तयस्ताम्रादिभिर्यथाक्रमं कार्याः। तदभावे स्वर्गै
रिकादिभिर्वर्णकैः पटे लेख्याः। मंडलेषु वा गंधैश्च रक्तचंदनादिभिर्यथावर्णं ले-
ख्या इत्यर्थः॥ द्विभुजत्वादिविशेषो मत्स्यपुराणोक्तो द्रष्टव्यः॥ ॥यथाह॥ राम
पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः॥ सप्ताश्वः सप्तरज्जुश्च द्वि
भुजः स्यात्सदा रविः॥ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः॥ गदापाणिर्द्वि
भुजश्च कर्तव्यो वरदः शशी॥ रक्तमाल्यांबरधरः शूलशक्तिगदाधरः॥ चतु
र्भुजो मेषगमो वरदः स्याद्धरात्मजः॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः॥
खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भु
जौ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः॥

बाणबाणासनधरः कर्त्तव्योर्कसुतः सदा॥ करालवदनः खड्गचर्मशूली वरप्रदः॥ नीलसिं
हासनस्थश्च राहुरत्र प्रशस्यते॥ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः॥ गृध्रासनगता
नित्यं केतवः स्युर्वरप्रदाः॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः॥ स्वांगुले
नोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा इति॥ एतेषां स्थापनं देशाश्च तन्त्रेवोक्तः॥ मध्ये तु भा
स्करं विंद्यात्सोमं दक्षिणपूर्वके॥ दक्षिणे लोहितं विंद्यात् बुधं पूर्वोत्तरे तथा॥ उत्त
रेण तु स्थापयेच्छुक्लैस्तंदुलैरिति॥ ॥पूजाविधिमाह॥ यथावर्णं प्रदेयानि वासांसि
कुसुमानि च॥ गंधाश्च बलयश्चैव धूपो देयश्च गुग्गुलः॥ कर्त्तव्या मंत्रवंतश्च च
रवः प्रतिदैवतं॥ यथावर्णं यस्य ग्रहस्य यो वर्णस्तद्वर्णानि वस्त्रगंधपुष्पाणि
देयानि॥ बलयश्च॥ धूपश्च सर्वेभ्यो गुग्गुलो देयः॥ चरवः प्रतिदैवतं॥ अग्निप्र
तिष्ठापनानंतरमादित्यपूर्वकं चतुरश्चतुरो मुष्टीन्निर्वपति॥ अमुष्मै त्वा जुष्टं निर्व
पामीत्यादिविधिना कार्याः॥ अनंतरं सुसमिद्धेग्नौ ध्यानादि प्रोक्षावांतं कृ
त्वा आदित्यादिपुद्देशेन यथाक्रमं वक्ष्यमाणमंत्रैर्वक्ष्यमाणाः समिधो वक्ष्यमा
णप्रकारेणाहुत्या चरवो होतव्याः॥ मंत्रानाह॥ आसत्येनेमं देवा॥ अग्निर्मूर्द्धा दिवः
ककुत्॥ उद्बुध्यस्वेति त्र्यृचो यथासंख्यं प्रकीर्त्तिताः॥ बृहस्पते अति यदर्यस्तथैवा

न्मासौरिस्तुतः ॥ शन्नोदेवीस्तथा कांडात्केतुं सुत एवं निमांस्तथा ॥ आकृष्णेन रजसा वर्त्त
मानो इत्याद्येन च मंत्रा वेदितव्याः सूर्यादीनां यथाक्रमं ॥ ॥ इदानीं समिध आह ॥
अर्कः पलाशः खदिरस्त्वपामार्गोथ पिप्पलः ॥ उदुंबरः शमी दूर्वा कुशाश्च समिधः
क्रमात् ॥ ॥ अर्कपलाशादयो यथाक्रमं सूर्यादीनां समिधो भवंति ॥ ताश्च सार्द्रा
अभग्नाः सत्वचः प्रादेशमात्राः समिधः कर्तव्याः ॥ किंच ॥ एकैकस्यात्राष्टशतमष्टा
विंशतिरेव वा ॥ होतव्या मधुसर्पिर्भ्यां दध्ना क्षीरेण वा पुनः ॥ ॥ आदित्यादीना
मेकैकस्याष्टशतसंख्याता अष्टाविंशतिसंख्याता वा यथासंभवं मधुना क्षीरेण
दध्ना सर्पिषा वा पुनः अर्कादिसमिधो होतव्याः ॥ ॥ गुडौदनं पायसं च ह
विष्यं क्षीरषाष्टिकं ॥ दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च ॥ दद्याद्ग्रहक्र ग्रम
मादेतद्द्विजेभ्यो भोजनं बुधः ॥ शक्तितो वा यथालाभं सत्कृत्य विधिपूर्वकं ॥ ॥
गुडमिश्र ओदनो गुडौदनः। पायसं प्रसिद्धं हविष्यमुन्यन्नादि। क्षीरषाष्टिकं क्षीरमि
श्र ओदनः। दध्योदनो दधिमिश्र ओदनः। हविश्चूर्णेनोदनः। चूर्णं तिलचूर्णमिश्र ओ
दनः ॥ मांसं भक्ष्यमांसमिश्र ओदनः। चित्रान्नं नानावर्ण ओदनः। एतानि गुडौदना
दीनि यथाक्रमं आदित्यादिग्रहेभ्यो भोजनार्थं द्विजेभ्यो ब्राह्मणेभ्यो दद्यात्। शा
क्त्या संख्या च यथासंभवं द्रष्टव्या। गुडौदनाद्यभावे तु यथालाभं मोदका

दिपादप्रक्षालनादिविधिपूर्वं सत्कृत्य सम्मानपुरःसरं दद्यात्॥ दक्षिणामाह॥ ॥धेनुः
शंखस्तथानड्वान्हेमवासो हयः क्रमात्॥ कृष्णागौरायसं छाग एता वै दक्षिणाः क्रमा
त्॥ ॥धेनुर्दोग्ध्री। शंखः प्रसिद्धो मौक्तिकादियुक्तः। अनड्वान्भारवाहो बलीवर्दः।
हेम सुवर्णं। वासः पीतं। हयः श्वेतोऽश्वः। कृष्णगौः। आयसमयादि। छागः प्रसिद्धः।
एता धेन्वाद्या यथाक्रमं आदित्याद्युद्देशेन ब्राह्मणानां दक्षिणाः स्मृता उक्ता मन्वा
दिभिः। एतच्च संभवे सति। असंभवे तु यथालाभं शक्तितः। अन्यद्वा किंचिद्देयं॥ शांति
कामेन विशेषेण सर्वे ग्रहाः पूज्या इत्युक्तं। तत्र विशेषमाह॥ ॥यश्च यस्य यदा दुःस्थः
स तं यत्नेन पूजयेत्॥ ब्रह्मणैषां वरो दत्तः पूजिताः पूजयिष्यथ॥ यस्य पुरुषस्य यो ग्र
हो यदा दुःस्थोऽष्टमादिदुःस्थानस्थितस्तदा स तं ग्रहं यत्नेन विशेषेण पूजयेत्॥ यस्मा
देषां ग्रहाणां पूर्वं ब्रह्मणा वरो दत्तः॥ पूजिताः संतो यूयं इष्टप्रापणेन अनिष्टनिर
सनेन च पूजयितारं पूजयिष्यथेति॥ अविशेषेणाधिकारिणां शांतिकपौष्टिका
दीनि कर्माण्यनुक्रांतानि तत्राभिषेकगुणं पुत्रस्य राज्ञो विशेषेणाधिकार इति द
र्शयति॥ ॥ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च॥ भावाभावौ च जगतस्तस्मा
त्पूज्यतमा ग्रहाः॥ ॥नरेंद्राणामभिषिक्तक्षत्रियाणां ग्रहाः पूज्या इत्यनेन अन्येषा

७१ मपिपूजनमाह इति गम्यते॰ उभयत्र कारणमाह॰ प्राणिनामभ्युदयविनिपातौ ग्रहाधीनौ
यस्मात्तेनाधिकारिभिः पूज्याः किं च जगतः स्थावरजंगमात्मकस्य भावाभावावुत्पत्ति
निरोधौ ग्रहाधीनौ॰ तत्र ये ये तु पूजितास्तदा स्वकाले उत्पत्तिनिरोधौ भवतोऽन्यथोत्प
त्तिसमये तस्य नोत्पादो न्यकाले च निरोधो। जगदीश्वरस्याप्यन्तरेन्द्राणां तद्योगक्षे
मकारिणां पूज्यत्वमाग्रहा इति तथा विशेषेण शान्तिकादिष्वधिकारः। तथा च गौतमे
न राजा सर्वस्येष्टे ब्राह्मणवर्जमिति राजानमधिकृत्य सवर्णानाश्रमांश्च न्यायतोऽभिरक्षे
च्चलतश्चैतान्स्वधर्मे स्थापयेदित्यादीन्कांश्चिद्धर्मानुक्त्वा यानि वेदे वा स्यानचित
काः प्रब्रूयुः तान्याद्रियेत तदधीनमपि हि केयोगक्षेमं प्रतिजानते इति शान्तिकपौष्टि राम
काद्यनुष्ठाने हेतुमभिधाय शान्तिपुण्याहस्वस्त्ययनायुष्यमंगलसंयुक्तान्याभ्युदयि
कानि विद्वेषणस्तंभनाभिचारद्विषद्व्याधियुक्तानि च शालाग्नौ कुर्यादिति दर्शितानि॥
॥इति ग्रहशान्तिप्रकरणं॥ ॥साधारणान्गृहस्थधर्मानभिधायेदानीं राज्याभिषि
क्तादिगुणयुक्तस्य विशेषधर्मानाह॥ महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः। विनी
तः सत्त्वसंपन्नः कुलीनः सत्यवाक्छुचिः। अदीर्घसूत्रः स्मृतिमानक्षुद्रोऽपरुषस्तथा।
धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्॰ स्वरंध्रगोप्तान्वीक्षिक्यां दंडनीत्यांत

ध्येयश्च विनीतस्तथा वार्तायां त्रय्यां चैव नराधिपः। पुरुषार्थसाधनकर्मारंभाध्यवसा
यउत्साहः। महानुत्साहो यस्यासौ महोत्साहः। वक्रुदेषार्थदर्शी स्थूललक्षः। परकृतोपका
रेपकारो न विस्मरतीति कृतज्ञः। तपोज्ञानादिवृद्धानां सेवकः। वृद्धसेवकः। विनयेनयु
क्तो विनीतः। विनयेषष्ठाध्ये प्रविस्तरपूर्वोक्तस्तात्कधर्मकलापरुच्यते। न संशयं
प्रपद्येत नाकस्मादप्रियं वदेदित्यादिनोक्तः। सत्त्वसंपन्नः संपदापदयोर्हर्षविषादरहि
तः। मातृतः पितृतश्चाभिजनवान् कुलीनः। सत्यवाक् सत्यवदनशीलः। शुचिर्बाह्या
भ्यंतरशौचयुक्तः। प्रवृत्तस्य कार्यादीनां कर्मणामारंभे प्रारब्धानां च समाप्यनेयो न विलंब
नेऽसावदीर्घसूत्रः। अधिगतार्थविस्मरणशीलः स्मृतिमान्। प्रश्रुप्रश्रसह एव दूषो
ऽपरुषः परदोषाकीर्तनः। धार्मिको वर्णाश्रमधर्मान्वितः। न विद्यंते व्यसनानि
यस्यासावव्यसनः। व्यसनानि चाष्टादश। यथाह मनुः। मृगयाक्षा दिवास्वप्नः परिवा
वाच्यविशेषः दः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः। पैशुन्यं साहसं द्रोह ईर्ष्या
सूयार्थदूषणं। वाग्दंडजं च पारुष्यं क्रोधजोऽपि गणोऽष्टक इति। तत्र च सप्तकष्टतमानि।
यथाह मनुः। पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं। एतत्कष्टतमं विद्याच्चतुष्कं काम
जे गणे। दंडस्य पातनं चैव वाक्पारुष्यार्थदूषणे। क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं स
दति। प्राज्ञो गंभीरार्थावधारणक्षमः। शूरो निर्भयः। रहस्यविद्गोपनीयार्थगोपनचतुरः।

७२ स्वरंध्रगोप्तास्वस्यपरस्यसुरंध्रयोगेषुपरस्त्रवेक्षादारक्षोपित्स्यंततःस्वरंध्रगोप्तास्यात्साप्रछाद्दपि
ता॰।आन्वीक्षिक्यांआत्मविद्यायां।दंडनीत्यां।अर्थयोगक्षेमोपयोगिन्यां।वार्तायांकृषिवाणिज्य
पशुपालनरूपायांधनोपचयहेतुभूतायां।त्रय्यांऋग्यजुःसामात्मिकायां।विनीतस्तदभिज्ञैः
प्रापितःएवंनीतः।यथाहमनुः।त्रैविद्येभ्यस्त्रयींविद्यांदंडनीतिंचशाश्वतीं।आन्वीक्षिकींचा
त्मविद्यांवार्तारंभांश्चलोकतः।इति।नराधिपोराज्येभिषिक्तःस्यादितिसर्वत्रसंबंधः।ए
वमभिषिक्तस्यगुणयुक्तस्यांतरंगान्धर्मानभिधायेदानींबहिरंगानाह।सनुमंत्रिणः
प्रकुर्वीतप्राज्ञान्मौलान्स्थिरान्शुचीन्।तैःसार्धंचिंतयेद्राज्यंविप्रेणाथततःस्वयं।
सउत्साहादिगुणयुक्तोराजामंत्रिणःकुर्वीत।कथंभूतान्।प्राज्ञान्हिताहितविवेककुशला राम
न्।मौलान्स्ववंशपरंपरायातान्।स्थिरान्महत्यपिहर्षविषादस्थानेविकाररहि
तान्।शुचीन्।धर्मार्थकामभयोपधाशुद्धान्।तेचसप्ताष्टौवाकर्तव्याः।यथाह
मनुः।मौलान्शास्त्रविदःशूरान्लब्धलक्षान्कुलोद्भवान्।सचिवान्सप्तस
वाकुर्वीतसुपरीक्षितान्।इति।एवंमंत्रिणःपूर्वंकृत्वातैःसहराज्यंतत्संधिवि
ग्रहादिकंचिंतयन्व्यस्तैःसमस्तैःसमस्तैश्च।अनंतरंतेषामभिप्रायंज्ञात्वास
कलशास्त्रार्थविचारकुशलेनब्राह्मणेनविपुरोहितेनसहकार्यविनिसततः

स्वबुध्या कार्यं विचिंतयेत् · कीदृशं पुरोहितं कुर्यादित्याह · पुरोहितं प्रकुर्वीत दैवज्ञं मुदितोदितं ·
दंडनीत्यां च कुशलमथर्वांगिरसे तथा · पुरोहितं सर्वेषु दृष्टादृष्टेषु कर्मसु । पुरोहितं दानमानस
त्कारेण मत्संबंधं कुर्यात् · कथंभूतं दैवज्ञं ज्योतिर्होरास्थानं तच्छमनादेवैदिनो वरं उदितोदितं · वि
द्याभिजनानुष्ठानादिभिरुदितैः शास्त्रोक्तैरुदितं समृद्धं · दंडनीत्यामर्थशास्त्रे कुशलं
अथर्वांगिरसे च शांत्यादिकर्मणि · श्रौतस्मार्तक्रियाहेतोर्वृणुयादेव चर्त्विजः । यज्ञांश्चै
व प्रकुर्वीत विधिवद्भूरिदक्षिणान् · श्रौताग्निहोत्रादि स्मार्तौपासनादि क्रियानुष्ठानसिध्य
र्थं ऋत्विजो वृणुयात् · यज्ञांश्च राजसूयादीन्विधिवद्यथाविधानं भूरिदक्षिणान्बहुद
क्षिणान्कुर्यात् · किंच भोगांश्च दद्याद्विप्रेभ्यो वसूनि च · अक्षय्योयं निधी राज्ञां यद्विप्रेषु
पादितं · ब्राह्मणेभ्यो भोगान्सुखानि तत्साधनद्वारेण दद्यात् · वसूनि च सुवर्णरौप्यप्रभृ
तीनि नानाप्रकाराणि · यस्मादेव राज्ञामक्षयो निधिर्ब्राह्मणेभ्यो दीयते · साधारणधर्म
त्वेन दानप्रशंसा सर्वस्यां राज्ञां दानप्रतिपादनार्थं पुनर्वचनं । किंच प्रस्कन्नमव्यथं चैव प्राय
श्चित्तैरदूषितं · अग्नेः सकाशाद्धि विप्राग्नौ हुतं श्रेष्ठमिहोच्यते · अग्नेः सकाशाद्दाग्निसा
ध्याद्भूरिदक्षिणराजसूयादेरपि विप्रमुखाग्नौ हुतं श्रेष्ठमुच्यते · यत्तदप्रस्कन्नं सर
णरहितं · अव्यथं पशुहिंसारहितं । प्रायश्चित्तैरदूषितं प्रायश्चित्तापासरहितं · वसू
नि विप्रेभ्यो दद्यादित्युक्तं · कथापरिपाद्य दद्यादित्याह · फलं धर्माहे दुर्मेलाल ध्येयफले

७३ नपालयेत्‌·पालितंवर्धयेन्नीत्यावृद्धंपात्रेषुनिक्षिपेत्‌·अलब्धलाभार्थंधर्मशास्त्रानुसा
रेणयतेत·लब्धंपरिपालयेत्स्वयमेवक्षयपरिहारेण·पालितंनीत्यावाणिज्यादिकु
मार्गेवृद्धिंनयेत्‌·वृद्धंचपात्रेषुधर्मार्थकामपात्रेषुनिक्षिपेत्दद्यात्‌·पात्रेनिक्षिप्य
किंकुर्यादित्याह·दत्त्वाभूमिंनिबंधंवाकृत्वालेख्यंतुकारयेत्‌·आगामिभद्रनृपति
परिज्ञानायपार्थिवः।यथोक्तविधिनाभूमिंस्वामस्वत्वनिवृत्तिंकृत्वा·निबंधंवा·एकस्य
भांडभरकस्येयंतोरूपकाः।।एकस्यपर्णभरकस्येयंतिपर्णानीतिवानिबंधंवालेख्य
कारयेत्‌·किमर्थमागामिनएष्यंतोयेभद्राःसाधवोनृपतयोभूपतयस्तेषामनेनद
त्तंअनेनपरिग्रहीतमितिपरिज्ञानायपार्थिवोभूपतिःअनेनभूपतेरेवभूमिदानेनि राम
बंधदानेचाधिकारोनभोगपतेरितिदर्शितं·लेख्यंकारयेदित्युक्तंकथंकारयेदित्या
ह·पटेवाताम्र·पट्टेवास्वमुद्रोपरिचिन्हितं·अभिलेख्यात्मनोवंश्यानात्मानंचमही
पतिः।प्रतिग्रहपरीमाणंदानछेदोपवर्णनं·स्वहस्तकालसंपन्नंशासनंकारयेत्स्थि
रं·कार्पासिकेपटेताम्रपट्टेताम्रफलकेवात्मनोवंश्यान्प्रपितामहपितामहपितॄन्ब
हुवचनस्यार्थवत्त्वायवंश्यवीर्यश्रुतादिगुणोपवर्णनपूर्वकमभिलेख्यात्मानंचचे
शब्दात्प्रतिग्रहीतारं·प्रतिग्रहपरिमाणंदानच्छेदोपवर्णनंचाभिलेख्यप्रतिग्रह ७२

न इति प्रतिग्रहो निबंधस्तस्य रूपकादिपरिमाणं॰ दीयत इति दानं क्षेत्रादि॰ तस्य छे
दः छिद्यते विछिद्यते नेनेति छेदो नद्याद्याघाटः निवर्तनपरिमाणं तस्योपवर्णनं॰ अ
मुकनद्या दक्षिणतो यं ग्रामः क्षेत्रं वा पूर्वतो ऽमुकग्रामस्य तावन्निवर्तनमितमिति
निवर्तनपरिमाणं च लेख्यमेव॰ आघाटस्य नदीनगरवर्त्मादेः संचारित्वेन भूमेर्न्यू
नाधिकभावसंपन्नं युक्तं कालेन च द्विविधेन॰ शकनृपातीतसंवत्सररूपेण दानका
लेन च चंद्रसूर्योपरागादिना संपन्नं स्वमुद्रया गरुडवराहादिरूपयोपरिचिह्नि
तं॰ तेनैवं कृतं स्थिरं दृढं शासनं शिष्यंते भविष्यंतो नृपतयो नेन दानाच्छ्रेयोनुपालनमि
ति शासनं कारयेन्महीपतिर्न भोगपतिः। संधिविग्रहादिकारिणा न येन केनचित्॰ संधि
विग्रहकारी तु भवेद्यस्तु स पालेखकः। स्वयं राज्ञा समादिष्टः स लिखेद्राजशासनमि
ति स्मरणात्॰ दानमात्रेणैव दानफले सिद्धे शासनकरणं तत्रैव भोगादिव्याप
त्यतिशयार्थं॥ ॥इदानीं राज्ञो निवासस्थानमाह॥ ॥रम्यं पशव्यमाजीव्यं जांगलं
देशमावसेत्॰ तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये॰ रम्यं रमणीयं अशोकचंप
कादिभिः। पशव्यं पशुभ्यो हितं तत्पशुसमृद्धिकरं॰ आजीव्यमुपजीव्यं कंदमूलपुष्पफ
लादिभिः। जांगलं यद्यप्यल्पोदकतृणपर्वतोद्देशो जांगलस्तथाप्यत्र समजलतरूप

मिता०

७४ वैतो देशो जांगलस्तथाप्यत्र समजलतरुपर्वतो देशो जांगलशब्देनाभिधीयते। तं देश
मावसेदधिवसेत्। तत्रैवंविधे देशे जनानां कोशस्य सुवर्णादेरात्मनश्च रक्षणार्थं दु
र्गं कुर्वीत। दुर्गं च षड्विधं यथाह मनुः। धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च। नृदुर्गं गिरि
दुर्गं च समाश्रित्य वसेत्पुरमिति। किंच। तत्र तत्र च निपुणान् अध्यक्षान् कुशलान् शु
चीन् प्रकुर्यादायकर्मान्तव्ययकर्मसु चोद्यतान्। ~~स्त्रीषु क्लीबान्नियुञ्जीत नीचा~~
तत्र तत्र च धर्माद्येष्वादिषु अध्यक्षान् योग्यानधिकारिणः प्रकुर्यान्नियुञ्जीत। यथा
हुः। धर्मकृत्येषु धर्मज्ञानर्थकृत्येषु पण्डितान्। स्त्रीषु क्लीबान्नियुञ्जीत नीचान्नीचेषु क
र्मस्विति। कीदृशान्निपुणान् अनन्यव्यापारान्। कुशलान् स्वव्यापारचतुरान्। शुची राम
न् चतुर्विधोपधाशुद्धान्। आयकर्मसु सुवर्णादिषूत्पत्तिस्थानेषु व्ययकर्मसु सुवर्णा
दिदानस्थानेषु ~~व्यसनाभावः स्वामिभक्तिश्च योग्यतेति भोगांश्च दद्याद्विप्रेभ्यो वसू~~
उद्यतान् अनलसान्। चशब्दादाज्ञत्वादिगुणयुक्तान्। उक्तं च। प्राज्ञत्वमुपधाशुद्धि
रप्रमादोऽभियुक्तता। कार्येषु व्यसनाभावः स्वामिभक्तिश्च योग्यतेति। भोगांश्च दद्या
द्विप्रेभ्यो वसूनि विविधानि चेति सामान्येन स्वस्य दानमुक्तं॥ ॥इदानीं नृपाणां विक्रमा
र्जितस्य दानेन फलातिशयमाह॥ ॥नातः परतरो धर्मो नृपाणां यद्रणार्जितं। विप्रेभ्यो ७४

दीयते द्रव्यं प्रजाभ्यः स्वाभयं तथा ॥ नास्मादुत्कृष्टतमो धर्मो नृपाणां विद्यते । पद्रुलार्जितं
द्रव्यं निष्क्रेभ्यो दीयते । पक्षप्राजाभ्यो भयप्रदानं । रणार्जितं देयमित्युक्ते । द्रव्यार्जनापरलो
प्रकृतस्य विपत्तिरपि संभवति । तेन धर्मो नाप्यर्थो हन्ति तत्तो निवृत्तिरेव श्रेयसी । सूत्रे ऽत्रा
ह ॥ ॥ ये ऽत्राहवेषु वध्यन्ते भूम्यर्थमपराङ्मुखाः ॥ अकूटैरायुधैर्यान्ति ते स्वर्गं योगि
नो यथा ॥ ये भूम्याद्यर्थमाहवेषु प्रहृत्ताः अपराङ्मुखा अभिमुखा वध्यन्ते मार्यन्ते ।
ते स्वर्गं यान्ति । योगाभ्यासरता यथा यथा कूटैरविषदिग्धादिभिरायुधैर्यो ऽकारभ
वंति । किं च ॥ पाटानि क्रतुतुल्यानि भग्नेष्वविनिवर्त्तिनां । राज्ञां सुकृतमादत्ते हतानि
विपलायिनां ॥ स्वबलेषु करितुरगरथपदातिषु भग्नेषु अविनिवर्त्तिनां परबलाभि
मुखयायिनां पदानि क्रतुतुल्यानि अश्वमेधतुल्यानि । विपर्यये दोषमाह । विपला
यिनां पराङ्मुखानां हतानां राज्ञां सुकृतान्यादत्ते । अपि च ॥ न वाहं वादिनं क्लीवं निर्हेतिं
परसंगतं । नस्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकं ॥ न वा हिंस्यादिति यो वदति तं । क्ली
वं नपुंसकं । निर्हेतिं निरायुधं । परसंगतं अन्येन सह युध्यमानं । निवृत्तं युद्धादिनिवृ
त्तं । युद्धप्रेक्षणकं युद्धदर्शनं न हन्यादिति सर्वत्र संबंधः ॥ आदिग्रहणात् द्रुष्वसा
रथ्यादीनां ग्रहणं ॥ मद्यागोनम ॥ न दोषो हिंसायामाहवे अन्यत्र अश्वसारथ्यान ॥

युधकृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादि
भ्यहन्ति॥ शंखोप्याह। न पानीयं पिबंतं न भुंजानं नोपानहौ मुंचंतं नोवर्माणं सवर्माण
स्त्रियेन करेणुं न वाजिनं न सारथिनं न सूतं न दूतं न ब्राह्मणं न राजानं नराजो हन्यादिति।
॥ ततरक्षः समुत्थाय पश्येदायव्ययौ स्वयं। व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुंजीत का
मतः॥ ततरक्षांपुरस्यात्मनश्च रक्षां विधाय प्रतिदिनं प्रातःकाले उत्थाय स्वय
मेव आयव्ययौ पश्येत्। ततो व्यवहारान्दृष्ट्वा मध्याह्नकाले स्नात्वा कामतो यथारु
चिं भुंजीत॥ हिरण्यं व्यापृतानीतं भांडागारेषु निक्षिपेत्। पश्येच्चारांस्ततो दूतान्प्रे
षयेन्मंत्रिसंगतः॥ तदनंतरं हिरण्यादिकं व्यापृतैर्हिरण्याद्यानयननिपुणैरानी
तं स्वयमेव निरीक्ष्य भांडागारेषु निक्षिपेत्। ततश्चारानविश्वास्यान्प्रत्यागतानपा
रपेक्ष्य। ये परराज्यवृत्तांतपरिज्ञानाय परिव्राजकतापसादिरूपेण गूढचारिणः प्रे
षितास्तांश्च दृष्ट्वा कस्मिंश्चिन्निवेशयेत् तदनंतरं दूतांश्च पश्येत्। दूतांश्चये प्रकट
मेव राज्ञांतरं प्रतिगत्वागत्य माचरंति। ते च त्रिविधाः। निसृष्टार्थाः संदिष्टार्थाः शास
नहस्ताश्चेति। तत्र निसृष्टार्थाः राजकार्याणि देशकालोचितानि स्वयमेव कथयितुं
क्षमाः॥ उक्तमात्रं ये परस्मै निवेदयंति। ते संदिष्टार्थाः। शासनहस्तास्तु राजराज

राम

लेख्यहरिणः। तान्पूर्वप्रेषितानागतान्मंत्रिसंगतः परपेत दृष्ट्वा नचात्रीमानलु
प्यपुनः प्रेषयेत्॥ ततः स्वैरविहारी स्यान्मंत्रिभिर्वा समागतः। बलानांदर्शनं कृत्वा से
नान्यासह चिंतयेत्॥ तदनंतरमपराह्णे स्वैरं यथेष्टमेकैकोऽतः पुरविहारी स्यात्॥
मंत्रिभिर्वा विश्वासिभिः कलाकुशलैः परिहासवेदिभिः परिवृतः स्त्रीभिश्च रूपयौ
वनवैदग्ध्यशालिनीभिः॥ भुक्त्वा विहरेच्चैव स्त्रीभिरंतःपुरे सदा। विदूसंचयपाको
मंपुनः कार्याणि चिंतयेद्दिनमनुस्मरणात्। ततो निशि शिबिरस्यकुसुमविलेनालंकारै
रलंकृतः हस्त्यश्वरथपदातिबलानि दृष्ट्वा सेनान्यासा सारथिना परिनासह तद्रक्षणा
दिदृक्षाकालाविर्तं चिंतयेत्॥ संध्यामुपास्य श्रृणुयाच्चाराणां गूढभाषितं। गीतनृत्यै
श्च भुंजीत पश्चात्स्वाध्यायमुच्चैव॥ ततः सायंकाले संध्यामुपास्य सामान्यैः प्रासस्था
पिपुनर्वचनं कार्यो कुलक्षादविस्मरणार्थं अनंतरं ये पूर्वदृष्टाः क[illegible]स्थाने निवे
शितास्तेषां चाराणां गूढभाषितं तेभ्यं नैवेद्यमनिशास्त्रपालिः श्रृणुयात् [illegible]केवल॥ संध्यां
चोपास्य श्रृणुयादंते नैशमनिशास्त्रमतः। रहस्याख्यायिनां वै च प्रणिधीनां च चेष्टि
तमिति॥ ततोऽनृत्यगीतादिभिः केलिस्काले क्रीडित्वा कक्षांतरं प्रविश्य पश्चात् भुंजीत॥

७६ गत्वा कक्षान्तरं च स्वस्वमनुज्ञाप्य तेन जनं । प्रविश्य भोजनार्थं च स्त्रीभिरन्तःपुरे सह । ततोऽवि
स्मरणार्थं यथाशक्ति स्वाध्यायं पठेच्च ।। संविश्य तूर्यघोषेण प्रतिबुध्येत्तथैव च । शास्त्रा
णि चिन्तयेद्बुध्वा सर्वकर्तव्यतास्तथा ।। तदनन्तरं तूर्यशंखवादित्रघोषेण संविश्य तु स्वप्या
त् । तथैव तूर्यवादित्रघोषेण प्रतिबुध्येत् । प्रतिबुध्य च शास्त्रविद्भिर्विश्वासिभिः सहए
काकी वा पश्चिमे यामे शास्त्राणि चिन्तयेत् सर्वकर्तव्यतां च सर्वकार्याणि च । एतच्च
स्वस्थं प्रत्युच्यते । अस्वस्थः पुनः सर्वकार्येषु स्वं नियोजयेत् । यथाह । एनद्वृत्तं समा
तिष्ठेदरोगः पृथिवीपतिः । अस्वस्थः सर्वमेवैतन्मन्त्रिमुख्ये निवेशयेत् । प्रेषयेच्च ततश्चा
रान् स्वेष्वन्येषु च सादरान् । ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनन्दितः ।। दृष्ट्वा ज्योति रणम
र्विदो वैद्यान्दद्याद्गां काञ्चनं महीं । नै । वेशिकानि च ततः श्रोत्रियेभ्यो गृहाणि च ।।
अनन्तरं तत्रस्थ एव विश्वस्ताभ्यां शास्त्रज्ञान्मानसत्कारैः पूजितान् स्वेषु साम
न्तादिकारिषु अन्येषु च महीपतिषु प्रेषयेत् [illegible] विकोषितपरिज्ञानार्थम् । ततः प्रातः
संध्यामुपास्य अग्निहोत्रं हुत्वा पुरोहितर्त्विगाचार्यादिभिराशीर्भिरभिनन्दितो ज्योतिर्विदो
दृष्ट्वा तेभ्यश्च ग्रहादिस्थितिं विदित्वा शान्तिकादीनि च पुरोहितादिरूप·वैद्यांश्च दृष्ट्वा
तेभ्यश्च स्वशरीरस्थितिं निवेद्य प्रतिविधानं चादिरूप·गां हिरण्यं·काञ्चनं महीं च·नै

वैरीकानि स्वसुते विवाहोपयोगी निष्कन्यालंकारादीनि गृहाणि वसुधाधवलितानि श्रो
त्रियेभ्योऽधीतवेदेभ्यो ब्राह्मणेभ्यो दद्यादिति प्रसंगेन संबध्यते॥ ब्राह्मणेषु क्षमी स्निग्धे
ष्वजिह्मः क्रोधनो रिपुः स्याद्राजा भृत्सवर्गेषु प्रजासु च यथा पिता॥ ब्राह्मणेष्वधिक्षिप
पि क्षमी क्षमी क्षमावान् स्निग्धेषु जिह्मः क्रोधनो रिपुः स्याद्राजा भृत्सवर्गेषु प्रजासु च
यथा पिता॥ ब्राह्मणेष्वधिक्षिपत्स्वपि क्षमी क्षमावान् स्निग्धेषु स्नेहवत्सु मित्रा
दिष्वजिह्मः ~~क्रोधनो रिपुः स्याद्राजा भृत्सवर्गेषु प्रजासु च यथा पिता॥ ब्राह्मण~~ अवक्रः॥ अरिषु
क्रोधनः॥ भृत्सवर्गेषु प्रजासु च हितान्वरणे न प्रहितानिवर्तनेन च पितेव दयावान् स्यादि
ति प्रसंगेन संबध्यते॥ किंच पुण्यपापस्य षड्भागपाद्यते न्यायेन परिपालयन्॥ सर्वदानापि
कं यस्मात्प्रजानां परिपालनं॥ यस्मान्न्यायेन शास्त्रोक्तमार्गेण प्रजाः परिपालयन् परिपा
लितप्रजो यश्चितपुण्यपापस्य षड्भागं षष्ठभागमादत्ते यस्माच्च सर्वेभ्यो भूम्यादिदानेभ्यः प्रजा
नां परिपालनमधिकफलं तस्मात्प्रसुपथ्यापितानन्थैवास्यादिति गतेन संबंधः॥ चाटतस्क
रदुर्वृत्तमहासाहसिकादिभिः पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः॥ चाटाः प्र
तारकाः विश्वास्य ये परधनमपहरंति प्रच्छन्नापहारिणः तस्कराः दुर्वृत्ताः ऐ
न्द्रजालिककितवादयः सहोबलेन सहसा बलेन कृतं साहसं महच्च तत्साहसं च महा

साहसं तेन वर्त्तन्त इति साहसिकाः प्रसह्यापहारिणः। आदिशब्दात्कौलिककुहक
प्रभृतयः। तैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत्। कायस्था गणककालेखकाः तैः
पीड्यमाना विशेषतो रक्षेत्। तेषां राजवल्लभतयातिमायावित्वाच्च दुर्निवारत्वा
त्॥ अरक्ष्यमाणाः कुर्वन्ति यत्किंचित्किल्बिषं प्रजाः। तस्मात्तु नृपतेरर्धं भवति। यस्माद
सौ राजा रक्षणार्थं प्रजाभ्यः करान्गृह्णाति॥ ये राष्ट्राधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितं।
साधून्संमानयेद्राजा विपरीतांश्च घातयेत्॥ उत्कोचजीविनो द्रव्यहीनान्कृत्वा विवा
सयेत्। सद्दानमानसत्कारान् श्रोत्रियान्वासयेत्सदा॥ राष्ट्रे राज्ञाधिकारेषु ये नियु
क्तास्तेषां विचेष्टितं चरितं चारैः तल्लक्षणैः सम्यग्ज्ञात्वा साधून्सुचरितान्संमान रोम
येत् दानमानसत्कारैः पूजयेत्। विपरीतान्दुश्चरित्रान्सम्यग्विदित्वा घातयेदपरा
उत्कोच्य ग्राहिणः धानुसारेण। ये पुनरुत्कोचजीविनस्तान्द्रव्यरहितान्कृत्वा स्वराष्ट्रात्प्रवासयेत्॥ श्रो
त्रियान्दानमानसत्कारैः सहितान्कृत्वा स्वराष्ट्रे स्वदेशे सदैव वासयेत्॥ अन्यायेन
नृपो राष्ट्रात्स्वकोशं योऽभिवर्धयेत्। सोऽचिराद्विगतश्रीको नाशमेति सबांधवः॥
योऽसौ राजा स्वराष्ट्रादन्यायेन धनमादाय स्वकोशं वर्धयति सोऽचिरात् शीघ्रमेव
विगतश्रीको विनष्टलक्ष्मीको बंधुभिः सह विनाशं प्राप्नोति॥ प्रजापीडनसंतापा

समुद्भूतो हुताशनः ॥ राज्ञः श्रियं कुलं प्राणान् नादग्ध्वा विनिवर्त्तते । प्रजानां तस्य
राद्दिलेन पीडनेन यः संतापः तस्मादुद्भूतो हुताशनः स्वसंतापकारित्वाद्गुणपराशिद्धु
ताशनशब्देनोच्यते ॥ स राज्ञः श्रियं कुलं प्राणान् अदग्ध्वा नाशमनीत्वा न निवर्त्तते नो
पशाम्यति । यथा च नृपतेर्धर्मः स्वराष्ट्रपरिपालने । तमेव वक्तुमाह मामीति परराष्ट्रं वशं
नयन् । न्यायतः स्वराष्ट्रपरिपालेने राज्ञो यो धर्मः तं सकलं वक्ष्यमाणं न्यायेन पर
राष्ट्रं वशं नयन् आत्मसात् कुर्वन् आप्नोति धर्मस्य भागं च ॥ यस्मिन् देशे य आचारो
व्यवहारः कुलस्थितिः । तथैव परिपाल्योऽसौ यदा वशमुपागतः ॥ यदा परदेशो
वशमुपगतस्तदा स्वदेशाचारादिसंकरो न कार्यः ॥ स यस्मिन् देशे य आचारः कु
लस्थितिर्व्यवहारो वा यथैव प्रागासीत् तथैवासौ परिपालनीयो यदि राष्ट्रविरञ्जो
न भवति ॥ यदा वशमुपागतः स्वनेन वशोपगमनात् प्रागनियम इति दर्शितं । यथो
क्तं । उपरि ध्यारिमासीत राष्ट्रं चास्योपपीडयन् । दूषयेच्चास्य सततं यवसान्नोद
केन्धनानीति ॥ मंत्रमूलं यतो राज्यं तस्मान्मंत्रं सुरक्षितं । कुर्यात् यथास्य न विदुः क
र्मणामापलोदयात् ॥ यस्मात् तैः सार्धं चिंतयेद्राज्यमित्याद्युक्तं मंत्रमूलं राज्यं तत्तस्मा
न्मंत्रं यत्नेन तथा सुरक्षितं कुर्यात् यथास्य राज्ञः कर्मणां संधिविग्रहादीनामा

फलोदयात्तत्फलनिष्पत्तेर्यावत्तत्प्रत्ययमंत्रं न जानंति॥ किंच॥ अरिर्मित्रमुदासीनोनं
तरस्तत्परः परः॥ क्रमशो मंडलं चिंत्यं सामादिभिरुपक्रमैः॥ अरिः शत्रुः मित्रं सु
हृत् उभयविलक्षण उदासीनः। ते च त्रयः प्रत्येकं त्रिविधाः। सहजाः कृत्रिमाः प्राकृता
श्चेति। तत्र सहजोऽरिः सापत्नपितृव्यतत्पुत्रादयः। कृत्रिमोऽरिर्यस्यापकृ
तं येन चापकृतं। प्राकृतस्त्वनंतरदेशाधिपतिः। अरिश्चतुर्विधः। यातव्य उच्छेत्तव्यः पी
डनीयः कर्शनीयभेदेन। तत्र यातव्योऽनंतरभूमिपतिः। व्यसनी हीनबलो विरक्तप्रकृ
तिः विदुर्गो मित्रहीनो मूलोच्छेद्यः। पीडनीयो मंत्रबलहीनः प्रबलो मित्रबल
युक्तः कर्शनीयः। निर्मूलनाशविच्छेदपीडनैर्बलनिग्रहं। कर्शनं पुनः प्राहुः कोशदं राम
डापकर्षणादिति। मित्रं च द्विविधं। वंहणीयं कर्शनीयमिति। कोशबलहीनं वं
हणीयं। कोशबलाधिकं कर्शनीयं। अनंतरस्तत्परः पर इति प्राकृतानि मित्रो
दासीनानाह॥ अनंतरः प्राकृतोऽरिः तत्परः प्राकृतं मित्रं। तस्मात्पर उदासीनः। शे
षाः पुनः प्रसिद्धत्वान्नोक्ताः। एतद्राजमंडलकं मंत्रः पूर्वादिक्रमेण चिंत्यं तेषां
चेष्टितं ज्ञातव्यं॥ ज्ञात्वा च सामादिभिरुपायैर्वक्ष्यमाणैरिमाननुसंधेयं। एवं

पुरतः पृष्ठतः पार्श्वतश्चत्रयस्त्रयः प्रात्मान्वैकइतित्रयोदशराजकमिदंराजमं
डलंपश्चाकारः पार्ष्णिग्राहाक्रंदासाराद्यस्त्वरिमित्रोदासीनेष्वेवान्तर्भूतइतिसं
क्षेपेदगान्नमेवाननेदर्शितमितियोगीश्वरेणानन्थयुक्ताः। सामादिभिरुपक्र
मैरिसुत्कमिदानीन्नानुपायानाह॥ उपायाः सामदानंचभेदोदंडस्तथैवच॥ सम्य
क्प्रयुक्ताः। सामादिभिरुपक्रमैरिसूक्तमिदानीन्नानुपायानाह॥ उपायाः सामदा
नंचभेदसिद्धेपुदंडस्तथागतिकागतिः॥ साम प्रियभाषणं· दानंसुवर्णादेः· भेदोभे
दकरणंतत्सामंतादीनांपरस्परतोवैरस्योत्पादनं· दंडउपांशुप्रकाशाभ्यांधना
पहारादिर्वधपर्यंतोपकारः। एतेपरिपंथ्यादीनांसाधनोपायाः सामादयः। एते
चदेशकालाद्यनुसारेणसम्यक्प्रयुक्ताःसिद्धयेपुः। तेषांमध्येदंडस्तथागतिकाग
तिः। उपायांतरसंभवेनप्रयोक्तव्यः। एतच्चपीडनीयकर्षणीयाभिप्रायेण। या
पानभ्योन्यत्तव्ययेदिडएवमुख्यः। एतेसामाद्यौनकेवलंराज्यव्यवहारविष
याअपितुसकललोकव्यवहारविषयाः॥ यथा· अधीष्वपुत्रकाधीष्वदास्यामित

७७ वमोदकान्·यदाप्यसैन्यप्रयच्छामि कर्णमुसाद्यामिते॥संधिंचविग्रहंचैवयानमा
सनसंश्रयाः।द्वैधीभावंगुणानेतान्यथावसरंकल्पयेत्॥संधिर्मैत्रीकरणं॥विग्र
होपकारः।यानंपरंप्रतियात्रा।आसनमुपेक्षा·संश्रयोबलवदाश्रयणं·द्वैधीभावःस्वब
लस्यद्विधाकरणं·एतान्संधिप्रभृतीन्गुणान्यथावद्देशकालशक्तिमित्रादिवशेनकल्प
येत्॥यानकालमाह॥यदासस्यगुणोपेतंपरराष्ट्रंतदाव्रजेत्।परश्चहीनआत्माचहृ
ष्टवाहनपूरुषः॥यदापरराष्ट्रंसस्यैर्व्रीह्यादिभिर्गुणैश्चसमजलेंधनतृणादिभिरु
पेतंसंपन्नंशत्रुश्चहीनोबलादिभिः।आत्माचहृष्टवाहनपूरुषः।वाहनानिहस्त्यश्वादी
नितानिचपुरुषाश्चवाहनपुरुषाः।हृष्टावाहनपुरुषायस्यसतथोक्तः।तदापरराष्ट्रं राम
मात्मसात्कर्तुंव्रजेत्।प्राणिनामभ्युदयविनिपातौदैवायत्तौ।यदिदैवमस्तितदा
स्वयमेवपरराष्ट्रादिवशीभविष्यति।अथनास्तितदापिपौरुषेणनभविष्यतीत्यतोव्य
र्थएवायंयात्राप्रयासइत्यतआह॥दैवेपुरुषकारेचकर्मसिद्धिर्व्यवस्थिता।तत्रदैव
मभिव्यक्तंपौरुषंपौर्वदैहिकं॥कर्मसिद्धिःफलप्राप्तिःइष्टानिष्टलक्षणा·सानकेव
लेदैवेव्यवस्थिता·अपितुपुरुषकारेपिलोकेतथादर्शनाच्चिकित्सकादिशास्त्र

वैयर्थ्योक्तेः॥ अपिच पुरुषकाराभावे दैवमेव नास्तीत्याह। त्याह। तत्र दैवमिति। यतः
पूर्वदेहार्जितं पौरुषमेव दैवमुच्यते· अतस्तपुरुषकारं तत्तरं महाफलोदयाभिव्यक्तं पौरुषं
पूर्वदैहिकं कर्म· तस्मात्पुरुषकाराभावेन दैवमस्तीति पुरुषकारे यत्नो विधातव्यः। इ
दानीं मतांतरं एवाह। केचिद्दैवात्स्वभावाद्वा कालात्पुरुषकारतः। केचिदिच्छंति च्छल
फलं फलं दैवादिच्छंति· केचित्स्वभावात्स्वयमेव भवतीति नकारणमपेक्षत इति· केचित्का
लात् केचित्पुरुषकारतः एवेति। स्वमतमाह॥ संयोगे केचिदिच्छंति फलं कुशलबुद्धयः॥
दैवादीनां संयोगे समुच्चये फलं भवतीति कुशलबुद्धयो मन्वादयो मन्यंते· एकैकस्त
स्मात्फलं न भवतीत्यत्र दृष्टांतमाह॥ यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत्॥ एवं पुरुषका
रेण विना दैवं न सिध्यति· नात्र तिरोहितमस्ति· लाभापरस्यांगं तव्यं· लाभस्त्रिविधः
हिरण्यलाभो भूमिलाभो मित्रलाभश्चेति तेषु मित्रलाभो सापात्· ततस्तस्मात्सुपाय
त्नो विधातव्यः। तत्राप्युपायस्वरूपस्य वचनमिति साह॥ हिरण्यभूमिलाभेभ्यो मित्रलब्धि
र्वरा यतः। अतो यत्ते तत्र स्येर क्षेमसंसमाहितः। यस्माद्धिरण्यभूमिमित्रलब्धिर्वरा
उत्कृष्टा तस्मात्तत्रासौ यत्नेन यत्नं कुर्यात्सामादिभिः सत्संचरक्षेत्रसमाहितः सावधानः।

८० सत्यमूलत्वान्मित्रलाभस्य॥ इदानीं राज्यमात्याह॥ स्वाम्यमात्यजनो दुर्गं कोशो दंडस्तथै
व च। मित्राण्येताः प्रकृतयो राज्यं सप्तांगमुच्यते॥ महोत्साह इत्याद्युक्तलक्षणो महीप
तिः स्वामी। अमात्या मंत्रिपुरोहितादयः। जनो ब्राह्मणादिप्रजाः। दुर्गं धन्वदुर्गादि।
कोशः सुवर्णादिद्रव्यराशिः। दंडो हस्त्यश्वरथपदातिलक्षणं चतुरंगबलं। मित्राणि
सहजकृत्रिमप्राकृतानि। एता स्वाम्याद्या राज्यस्य प्रकृतयो मूलकारणानि। एवं
राज्यं सप्तांगमुच्यते॥ तदवाप्य नृपो दंडं दुर्वृत्तेषु निपातयेत्। धर्मो हि दंडरूपेण ब्र
ह्मणा निर्मितः पुरा॥ तदेवंविधं राज्यं प्राप्य दुर्वृत्तेषु चौरकंटकधूर्तपरदारपरद्र राम
व्यापहारिहिंसादिषु नृपो दंडं पातयेत् प्रयोजयेत्। हि यस्माद्धर्म एव दंडरूपेण पू
र्वं निर्मितो ब्रह्मणा तस्य च दंड इति यौगिकी संज्ञा। दंडो दमनादित्याहुस्तेनादांतान्दम
येदित्यादिगौतमवचनात्॥ स नेतुं न्यायतोऽशक्यो लुब्धेनाकृतबुद्धिना॥ स पूर्वो
क्तो दंडो लुब्धेन लंपटेन अप्रकृतबुद्धिना अज्ञानतो न्यायानुसारेण नेतुं प्रयोक्तुं शक्यो
न भवति। कीदृशेन तर्हि शक्य इत्याह॥ सत्यसंधेन शुचिना सुसहायेन धीमता॥
सत्यसंधेन अप्रतारकेण शुचिना जितारिषड्वर्गेण सुसहायेन पूर्वोक्तसहायसहि ८०

तेन धीमता नयापनयनकुशलेन सदंडो न्याय्यतो धर्मानुसारेणानेतुं शक्यः ।। यथाशास्त्र
प्रयुक्तः सन् सदेवासुरमानवं । जगदानंदयेत्सर्वमन्यथा तु प्रकोपयेत् ।। सदंडः शास्त्रा
क्रमार्गेण प्रयुज्यमानः सन् देवासुरमानवैः सहितमिदं सर्वं जगदानंदयेत् हर्षये
त् ।। अन्यथा शास्त्रातिक्रमेण प्रयुक्तश्चेत् जगत्प्रकोपयेत् ।। न केवलमधर्मदंडेन
जगत्प्रकोपो ऽपि तु प्रयोक्तुर्देहाद्द्रव्यहानिरपि स्यादिह ।। अधर्मदंडेन स्वर्गकीर्तिलोकांश्च
नाशयेत् ।। सम्यक्कृतं तु दंडनं राज्ञः स्वर्गकीर्तिजयावहं ।। यः पुनः शास्त्रातिक्रमेण लोभा
दिना दंडनं तत् सपापहेतुः स्वर्गकीर्तिलोकांश्च विनाशयतीति ।। शास्त्राक्रमे
णानुसृतः स्वर्गकीर्तिजयानां हेतुर्भवति ।। अपि भ्राता सुतो ऽर्घ्यो वा श्वशुरो मातुलो
पि वा ।। नादंड्यो नाम राज्ञो ऽस्ति धर्माद्विचलितः स्वकात् ।। अर्घ्यः ऽर्घार्हः आचा
र्यादिः शेषं प्रसिद्धं । एते भ्रातृसुतप्रभृतयो ऽपि स्वधर्माच्चलिता दंड्याः विमुक्ता
न्यपरः स्वधर्माच्चलितो ऽदंड्यो नाम राज्ञः कोपि नास्ति · एतच्च मातापित्रादिव्यति
रेकेण · तथा च स्मृत्यंतरं । अदंड्यौ मातापितरौ स्नातकपुरोहितपुरोहितपरि
व्राजकवानप्रस्थाः श्रुतशीलशौचाचारवंतस्ते हि धर्माधिकारिणः इति ।। यो

दंड्यान्दंडयेद्राजा सम्यक् वध्यांश्च घातयेत्। इष्टं स्यात्क्रतुभिस्तेन समाप्तवरदक्षिणैः
॥ यस्तु राजा दंड्यान्स्वधर्मचलितान्दिनादंडयोग्यान्सम्यक् शास्त्रदृष्टमार्गेणाधिकृत्य दंड
दानादिना दंडयति । वध्यांश्च वधार्हान्घातयति तेन नरा भूरिदक्षिणैः क्रतुभिरिष्टं भ
वति विपुलदक्षिणक्रतुफलं प्राप्नोतीत्यर्थः॥ न च फलश्रवणाद्दंडप्रणयनं काम्यमिति
मंतव्यं अकरणे प्रायश्चित्तस्मरणात्॥ यथाह वसिष्ठः॥ दंड्योत्सर्गे राजैकरात्रमुपव
सेत् त्रिरात्रं पुरोहितः कृच्छ्रमदंड्यदंडने पुरोहितस्त्रिरात्रं राजेति। दुष्टसम्यग्दंडप्रणय
नं चं दुष्टपरिज्ञानं च व्यवहारदर्शनमंतरेण न भवतीति तत्परिज्ञानाय व्य
वहारदर्शनमहरहः स्वयं कर्तव्यमित्याह॥ इति संचिंत्य नृपतिः क्रतुतुल्यफलं पृ राम
थक्॥ व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोन्वहं॥ इत्येवमुक्तेन प्रकारेण क्रतु
तुल्यफलं दंड्यदंडनेन स्वर्गादि साधनं च अदंड्यदंडनेन सम्यक् विचिंत्य पृथक् वर्णा
दिक्रमेण वक्ष्यमाणलक्षणैः परिवृतः प्रतिदिनं व्यवहारान्वक्ष्यमाणमार्गेण दुष्टा
दुष्टपरिज्ञानार्थं राजा स्वयं पश्येत्॥ कुलानि जातीः श्रेणीश्च गणान्जानपदान
पि॥ स्वधर्माच्चलितान्राजा विनीय स्थापयेत्पथि॥ कुलानि ब्राह्मणादीनां जातयो

मूर्द्धावसिक्तप्रभृतयः श्रेणयस्तक्षकादीनां। गणोहल्लाबुकादीनांजानपदाःका
रुकादयः एतान्स्वधर्माच्चलितान्प्रच्युतान्ज्ञात्वापथापराधंदंडयित्वापथिस्व
धर्मेस्थापयेत्। दंडंदुर्वृत्तेषुनिपातयेदित्युक्तेसचदंडोद्विविधःशारीरोर्थदं
डश्चेति। यथाहनारदः॥ शारीरश्चार्थदंडश्चदंडस्तुद्विविधःस्मृतः। शारीरस्ता
डनादिस्तुमरणांतःप्रकीर्तितः। काकिण्यादिस्त्वर्थदंडः सर्वस्वांतस्तथैवचेति॥—
द्विविधोप्यपराधानुसारेणअनेकधाभवति॥ आहस्म। शारीरोदशधाप्रोक्तोऽर्थ
दंडः ~~सर्वस्वांतस्तथैवचेति। द्विविधोप्यपराधानुसारेणअनेकधा~~ स्त्वनेकधे
ति। तत्रकृष्णलमाषसुवर्णपलादिरूपोर्थदंडोवक्तव्यः तेचप्रतिदेशंभिन्नपरि
माणाःयथाह्यस्यैकरूपापराधेपिदेशभेदेनन्यूनाधिकदंडोमाभूदितिकृष्णलादीनां
नियतपरिमाणविषयंदंडप्रवहारदर्शयितुमाह॥ जालसूर्यमरीचिस्थं
त्रसरेणूरजःस्मृतं। तेऽष्टौलिक्षास्तुतास्तिस्रोराजसर्षपउच्यते। गौरस्तुतेत्र
यः षट्तेयवोमध्यस्तुतेत्रयः। कृष्णलःपंचतेमाषस्तेसुवर्णस्तुषोडश॥ पलंसुव
र्णाश्चत्वारःपंचवापिप्रकीर्तितं॥ जालकांतरप्रविष्टादित्यरश्मिस्थितंयद्रजो

८२ स्तनूत्रसरेणुरित्युक्तं योगीश्वरादिभिस्तत्त्वदर्शिभिः ॥ ते त्रसरेणवोऽष्टौ लिक्षाः स्वेदजं यूकांडं ।
तालिक्षास्तिस्रो राजसर्षपो राजिका । ते राजसर्षपास्त्रयो गौरसर्षपः सिद्धार्थः । गौरसर्ष
पाः षड् यवो मध्यमो मध्यमो न स्थूलो न सूक्ष्मः । एतेन गौरसर्षपा अपि मध्यमा इति ग
म्यते । तथा राजसर्षपा अपि । तृणादादेर्वेषम्याद्विज्ञानं केवलमनुमानवचना: किंतु तद्
क्ति तद्व्यवचनादिति गम्यते । यथा प्रस्थपरिमितानां यवानां प्रस्थादुच्यते । एवं सर्षपा
द्युन्मितं द्रव्यं सर्षपादिशब्दैः सर्षपादिज्ञानाच्च केवलोन्मानवचनं ते त्रसरेणूनां
मुपसंहृत्यो न्यानुमज्ञाकस्तत्तद्वारेण कृष्णलादिव्यवहारोन स्यात् कृ तत्र स्थूलस्थू
लतरस्थूलतमसूक्ष्मतरसूक्ष्मतममध्यमसर्षपाद्युन्मानभेदेन प्रतिदेशं व्यवहार राम
भेदः स्थितेदं व्यवहारे मध्यमः इति नियम्यते । ते मध्यमा यवास्त्रय एक एव कृष्णलः ।
ते कृष्णलाः पंच एको माषः । ते माषाः षोडश एकः सुवर्णः । सुवर्णाश्चत्वारः पलमि
ति संज्ञा कथितेति । पंच वापि पलं कीर्तितं नारदादिभिः । सुवर्णः कृष्णलाः ८० । प
लं कृष्णलाश्च ३२० । संप्रमाणेन ॥ तत्र स्थूलैस्त्रिभिर्यवैः कृष्णलं परिकल्पनायां व्या गुंजे
वहारिकनिष्कस्य षोडशांशः कृष्णलो भवति । तैः पंचभिर्माषो माषैः षोडशभिः सुवर्णः
। स च व्यावहारिकैः पंचभिर्निष्कैरेकः सुवर्णो भवति । ते चत्वारः पलमिति । निष्का

णां विंशतिः पलं। यदा तु सूक्ष्मैर्यवैस्त्रिभिः कृष्णलः परिकल्प्यते तदा व्यवहारकस्य
द्वात्रिंशत्तमो भागः कृष्णलो भवति। तस्मिन्पक्षे सुवर्णः सार्धनिष्कद्वयं भवति। पलं च
दशनिष्कं· यदा तु मध्यमयवैः कृष्णलकल्पना तदा निष्कस्य विंशतितमो भागः कृष्णलः
सुवर्णश्चतुर्निष्कषोडशांशो निष्कः पलं· पंचसुवर्णाः पलमिति पक्षे विंशतिनिष्कं पलं· एवं
मन्यदपि निष्कस्य चत्वारिंशो भागः कृष्णलो द्विनिष्कः सुवर्णोऽष्टनिष्कं पलमित्यादि लो
कव्यवहारानुसारेण प्रस्मादेव सूत्रादूहनीयं॥ एवं सुवर्णस्य उन्मानं प्रतिपाद्येदानीं
रजतस्याह। द्वे कृष्णले पूर्वोक्तो रूप्यमाषो रूप्यस्यैव धीमाषः ते रूप्यमाषाः षोडशाथ
रणं पुराण इत्यस्य रूप्यस्यैव संज्ञान्तरं। ते षोडशास्याद्धरणं पुराणश्चैव राजत इति मनुस्म
रणात्· दशाभिर्धरणैः शतमानेन पलमिति चाभिधीयते· पूर्वोक्तश्चत्वारः सुवर्णेन
कोराजतो निष्को भवति॥ इदानीं ताम्रस्योन्मानमाह॥ कार्षिकस्ताम्रिकः पणः। पलस्य
चतुर्थांशः कर्ष इति लोकप्रसिद्धः कर्षेणोन्मितः कार्षिकः। ताम्रस्य विकारस्ताम्रिकः।
कर्षसंमितस्ताम्रविकारः पणसंज्ञो भवति कार्षापणसंज्ञश्च। कर्षाणस्तु विज्ञेयस्ता
म्रिकः कार्षिकः पण इति मनुवचनात्। पंचसुवर्णपलपक्षे विंशतिमाषः पणो भवति·
आसीच्चपक्षे सुवर्णस्तथा सति माषो [illegible] भवति विंशतितमो भागः पणस्य परिकीर्ति

तद्गत्येत्यादिव्यवहारः सिद्धो भवति। चतुःसुवर्णपलपक्षे तु षोडशमाषः पणो भवति।
अस्मिंश्च पक्षे सुवर्णकार्षापणपणशब्दानां समानार्थत्वेपि पणकार्षपणशब्दौ ता
म्रविषयावेव। एवं तावद्धेमरूप्यताम्राणामुन्मानमुक्तं। दण्डव्यवहारोपयोगित्वात्।
कांस्यरीतिकादीनामपि लोकव्यवहारांगभूतानामिवोन्मानं द्रष्टव्यं॥ स्वशास्त्रपरिभा
षामाह। साशीतिः पणसाहस्रो दण्ड उत्तमसाहसः। तदर्धं मध्यमः प्रोक्तस्तदर्धमध
मः स्मृतः॥ पणानां सहस्रं पणसहस्रं तत्परिमाणमस्येति पणसाहस्रः। अशीत्या सह
वर्त्तत इति साशीतिः। अशीत्यधिकपणसहस्रपरिमितो यो दण्डः स उत्तमसाहससंज्ञो
वेदितव्यः। तदर्धं मध्यमः तस्य साशीतिपणसाहस्रस्यार्धं चत्वारिंशदधिकपणपं
चशतं। तस्यार्धं सप्तत्यधिकपणशतद्वयपरिमितो दण्डोधमसाहससंज्ञः स्मृतः उ राम
क्तो मन्वादिभिः॥ यत्तु पणानां द्वेशते सार्धे प्रथमः साहसः स्मृतः। मध्यमः पंचवि
ज्ञेयः सहस्रं त्वेव चोत्तम इति मनुवचनं तत्पक्षान्तरमभिमतिपूर्वापराधविषयं द्र
ष्टव्यं॥ दण्डभेदानाह॥ धिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा॥ योज्या व्यस्ताः समस्ता
वाह्यपराधवशादिमे॥ धिग्दण्डो धिग्धिगिति कुत्सनं। वाग्दण्डस्तु परुषशापवचनात्म
कः। धनदण्डो धनापहारकः। वधदण्डः शारीरावरोधादिर्जीवितान्तः। एते चतुर्विधा

दंडा व्यस्ताः एकैकशः समस्ता द्वित्राः सर्वे चत्वारो वा अपराधानुसारेण प्रयोक्तव्याः ॥
उत्क्रमेण पूर्वासाध्ये उत्तर उत्तरः प्रयोक्तव्यः ॥ यथाह मनुः ॥ धिग्दंडं प्रथमं कुर्याद्वा
ग्दंडं तदनंतरं ॥ तृतीयं धनदंडं तु वधदंडमतः परं ॥ दंडव्यवस्थानिमित्तान्याह ॥ ज्ञा
त्वापराधं देशं च कालं बलमथापि वा । वयः कर्म च वित्तं च दंडमनुपातयेत् ॥ यथा
पराधं ज्ञात्वा तदनुसारेण दंडप्रणयनमेवं देशकालवयःकर्मवित्तानि ज्ञात्वा तद
नुसारेण दंड्येषु दंडार्हेषु दंडप्रणयनं कुर्यात् । तथा बुद्धिपूर्वाबुद्धिपूर्वसकृदाव
त्त्यनुसारेण च । यद्यपि राजानमधिकृत्यायं राजधर्मकलापः उक्तः तथापि वर्णा
न्तरस्यापि विषयमंडलादिपरिपालनाधिकृतस्यायं धर्मो वेदितव्यः ॥ राज
धर्मोऽत्र वस्यामियथावृत्तो भवेन्नृप इति पद्यऽन्नपयन्नहणेन त्वकरग्रहणस्य रक्षित्वा
च रक्षणस्य दंडप्रणयनाय तत्त्वादिति ॥ ॥ इति श्रीपद्मनाभभट्टोपाध्यायात्मजस्य
श्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां या
ज्ञवल्क्यधर्मशास्त्रविवृतौ प्रथमोऽध्यायः समाप्तः ॥ ॥ अस्मिन्नध्याये उपोद्घा
तप्रकरणं ब्रह्मचारिप्रकरणं स्नातकप्रकरणं · विवाहप्र जातिविवेक · गृहस्थध

मिता॰

८४ र्म॰ द्रव्यशुद्धि॰ श्राद्धप्र॰ गणपतिकल्पः। शांतिप्रकरणं॰ राजधर्मप्रकरणं॥१०॥
॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

राम